कथारत्नाकरः

(तस्य चायं प्रथमस्तरङ्गः)

प्रणेता

वाक् कन्बे

The Katharatnakara

(Volume One)

By

Bak Kanbe

नेशनल पब्लिशिंग हाउस, दिल्ली

कथारत्नाकरः

Preface

I feel it a great pleasure to write these few lines by way of introducing 'KATHARATNAKARA' (Vol. 1) to the world of scholars. The book is a product of my friend Shri Bak Kanbe (Kunbae) who wields almost a classical pen when he writes his commentaries in Sanskrit on various classical works in Sanskrit literature like The Meghaduta, or The Amarushataka, commentaries which are already known to the lovers of Saskrit. Shri Bak Kanbe's contributions to Sanskrit literature through his commentaries are very significant and indeed serve as an inspiration to others to emulate him.

The present work gives further proof of Mr. Kanbe's interest in Poems and Folklore of Ancient India and also his ability to write excellent Sanskrit. It was my privilege as well as pleasure as The Head of the Department of Sanskrit in the Delhi University to peruse his work before it went to the press and now I express my hope that the world of scholars will heartily welcome this work. I wish Mr. Bak Kanbe many fruitful years to come.

T. G. Mainkar
Bhandarkar Professor
Head of the Department of Sanskrit,
BOMBAY UNIVERSITY.

Bombay
23rd October, 1969.

कथारत्नाकरप्रस्तावः

वाक्कन्दे

कथार्थिसार्थकल्पद्रुं कल्पान्तस्थायिकीर्तिकम् ।
सोमदेवमभिष्टौमि क्षेमेन्द्रं च महाकविम् ॥२॥
वस्तुसारं समुद्धृत्य यदीयकृतितो मया ।
कथारत्नाकरो गद्यमयोऽधुना वितन्यते ॥२॥
कान्ताकटाक्षशरवद्रुचिरार्थगर्भः
प्रीणाति कस्य न मनो नु कथाप्रकर्षः ।
आश्चर्यचित्ररसदे मधुरे ममापि
तुष्यन्तु गद्यरसिकाः सुतरां कथाब्धौ ॥३॥
द्राघीयसा प्रवासेन विदूरदेशवर्तिनः ।
देदीर्यते ह हृन्मर्म पुष्पं परशुना यथा ॥४॥
समिद्धेव वियोगाग्निः संधुक्षितः प्रदीप्यते ।
अधिकं जन्मभूमेश्च बन्धूनां स्मरणेन च ॥५॥
केनासह्यवियोगदुर्गतिमयो हृन्मर्मसंशोषणो
निर्वाप्येत मुहूर्तमात्रमपि वा संतापवैश्वानरः ।
विस्मर्येत कथं प्रवासविषमं वैवं मुहुश्चिन्तयन्
संतापापनुदं तनोमि तु कथारत्नाकरं मञ्जुलम् ॥६॥
कथानां रत्नानां निधिमतनुकान्तिं वितनितुम्
चमत्काराधेयं श्रवणसुखकारं मधुरसम् ।

यतिष्ये वाक्कन्वेऽभिलषितफलोद्भूतय इह
नितान्तं मोदन्ते हि सुचरितकार्यात् सुकृतिनः ॥७॥
महानगरबोम्बेस्थे विश्वविद्यालयेऽस्ति वै ।
श्रीमांस्त्र्यम्बकगोविन्दः शम्भुकृष्णप्रसादितः ॥८॥
विद्यासागरनिष्णातो विद्वत्कुलशिरोमणिः ।
श्रीमाईणकरोपाह्वो विपश्चित्सार्थपूजितः ॥९॥
विद्यानौकर्णधारस्य विततसंस्कृतार्णवे ।
तस्याभिमतसौहार्दात् सेयं सिध्यतु मे कृतिः ॥१०॥

.....
.....

मृगाक्षि संप्रति कर्णे कुरुष्वाप्रमेयहर्षसंपज्जनयित्रीममरमनुजविषय-कविचित्रार्थमयीं कथामिमामित्येवं सप्तानां विद्याधरभूभुजां चक्र-वर्तिनां विस्मयाविष्टमनोहारिणि कथाप्रसंगेऽथ प्रवृत्ते सति प्रमथाधिपं धूर्जटिं दिदृक्षुः पुष्पदन्तो नाम गणाग्रेसरः समाया-तस्तथापि नन्दिना प्रतीहारेण निषिद्धप्रवेशः सन् कर्हिचिदप्य-निवारितचरं मां प्रति किमेतदिति कौतूहलाकुलमनस्कत्वात् सपदि समीरणपरिणतात्मदेहोऽदृष्ट एवान्तः प्रविश्य शंभुना हिमाद्रि-सुतायै निगद्यमानां तामेव कथां स्वच्छन्दमश्रौषीत् ततश्चासौ पुष्पदन्तोऽपि स्वीयभार्यां जयानाम्नीं मेनकात्मजाप्रतीहारीं कथा-मेनां चेतोविस्मापनीमन्वशुश्रवत् पुनश्च तदनन्तरमेव तुहिनाद्रि-दुहित्रा भवान्यानुयुक्ता मौग्ध्यविभूषणा जया मनोज्ञकथाजाला-कर्णनजनितानन्दव्याकोशमुखसरसीरुहा भूत्वा भर्तृमुखाच्छ्रुतं तदेव कथाजालं तत्समक्षं विततान तदनु च क्रोधव्याकुलीकृतचे-तोवृत्तिश्चन्द्रमौलिवल्लभा दयितं भर्तारमिति सरोषमवोचदन-न्याकर्णितपूर्वं कथानकं ननु मेऽचकथद् भवानिति प्रेयसीवचनं श्रुत्वा, कारणमत्र तु तदानीं पृषदश्वभूतेन पुष्पदन्तेनास्मद्गेहा-भ्यन्तरं रहः प्रविश्य तस्याः कथायाः श्रवणगोचरीकृतत्वमेवेत्थं तद्रहस्यप्रकाशनं कुर्वाणे शंभौ तत्रापराधिनं गणाग्रीयं पुष्पदन्तं झटिति समाहूय प्रज्वलितरोषज्वलनारुणीकृतकपोलभित्तिः पर्व-तेन्द्रदुहिता—अरे कथातस्कर निर्लज्ज मर्त्यलोके क्षणभंगुरे द्रुतमेव निपतेति सभ्रूभङ्गं शप्तवती हे करुणार्द्रहृदये महेश्वरि भजस्व

प्रसन्नतां शापं चाधुना निर्वापयेति सुहृदर्थं याचमानं पांशुले भूतले प्रणिपतितं पुष्पदन्तस्य सखायं गणोत्तमं माल्यवन्तमपि, रे रे आख्यायिकापाटच्चर पुष्पदन्त शृणु यदा कोशाधिपेन वैश्रवणेन प्राक् शप्तत्वाद् विन्ध्याचलगहने पिशाचतां गतः काणभूतिर्नाम गुह्यकचरस्त्वन्मुखादेव साक्षादिमामाख्यायिकामाकर्णयिष्यति तदा त्वं शापपर्यवसानं प्राप्स्यसि पुनः काणभूतितस्तामेव कथामनुश्रुत्य सोऽयं माल्यवानपि शापान्तं गमिष्यतीति शापावधिकल्पनां विधाय ततोऽशाप्सीत् क्षणान्तरे च प्रबलाभिशापदण्डताडितौ वयस्यौ तौ, अहो कष्टं, मर्त्यलोकमवतेरतुस्ततश्च काले व्यतीते बहुतिथे तीव्रशापवज्रनिपातितयोर्दुर्वहदौर्भाग्यभारपेपीड्यमानहृदयकूपयोस्तयोर्लोकयात्रावार्ताजिज्ञासाप्रेरितकौतूहलया गिरिसुतया पृष्टः सन् सर्वज्ञः कृत्तिवासाः खण्डपरशुस्तां प्रत्यवादीद् यद्यथा कौशाम्बीपुरवास्तव्यस्य द्विजातेः सोमदत्तनाम्नस्तनूजभावमवाप्तः पुष्पदन्तो वसुधातले कात्यायनः श्रुतिधरो वररुचिश्चेति नामधेयत्रयेण विख्यातकीर्तिर्महावैयाकरणकुञ्जरो यशस्कोटिमारूढो वरीवर्ति तथा माल्यवानपि प्रतिष्ठानपुरि दक्षिणाहि गृहीतमनुजजन्मा सर्वलोकविश्रुतयशस्यगुणाढ्यो गुणाढ्यो नाम परममहिमभ्राजिष्णुर्बृहत्कथाप्रणेतृत्वेनाद्य खलु शोशुभ्यत इति कैलासगिरिशयनिगदितं संश्रुत्य गौरी किंचित्करुणाविष्टमनाः संववृते तथा च तदीयप्रतीहारी जयापि स्वीयप्राणेश्वरविरहतनूनपात्तनूकृततनूस्तत्समागमैकाग्रमनोवृत्तिः किल बभूव ।

(२) पाटलिपुत्रकथा

ततोऽतिदारुणशापकुलिशाधोनिपातितोऽपहृतसदानन्दमया-मर्त्यभावः पुष्पदन्ताभिधः पाशुपतपारिषदप्राग्रहरः कान्स्न्र्येन विस्मृतात्मपूर्वजन्मप्रवृत्तिर्विश्वंभरामवतीर्य क्षणविध्वंसिनि जीव-लोकेऽसारे लब्धफल्गुमनुष्यजनुः शैशवात् प्रभृति सकृच्छ्रुतमात्रा-धिगतसाङ्गवेदपुरस्सरसाधारणबुद्धिमन्मानवदुरवगाहानेकशास्त्रक-लादिरत्नसंदोहपरिपूर्णविद्यारत्नाकरपारंगताति सूक्ष्मकुशाग्रशेमुषी-प्रभाप्रभास्वरयशस्यात्मस्वरूप-निर्ज़ितदुरारोहप्रांशुकीर्तिश्रृङ्गसमा-रूढो मूर्तिमान् सरस्वतीविलास इव विलसितप्रतिभातिशयचमत्कृ-ताशेषजनमना यद्यदेकवारं श्रुतं तत्तत् स्मृतौ धारयत्ययमसाविति तस्यैव कुशाग्रबुद्धिमत्त्वविस्मितेन लोकेन श्रुतिधर इति कृतय-थार्थनामा कात्यायनो वररुचिश्चेति खल्वाह्वयद्वयेनापरेणापि विश्रुतो भूत्वा पाटलिपुत्राधीशस्य मागधभूमण्डलपार्थिवस्य योग-नन्दस्य महामात्यपदं संवत्सरान् बहून् यथाशक्ति चोपसेव्य निकामं निर्विष्टविविधैहलौकिकविषयसंभोगसौख्योऽपि कालेऽनित्ये समीर-णातिगेन तरसाग्रेऽग्रे प्रधावति वयोजर्जरितजीर्णवाराङ्गनायामि-वानिष्टायां जरायामपि पलितेन साकमागच्छन्त्यां शनैः शनैर्मर्त्य-लोकसंपत्संभोगेषु विरक्तिं गच्छन् पयसि सततजातनष्टबुद्बुदवद-

सारस्येहलोके जन्मजरामृत्युभिः सह चक्रवत्संसेस्रीयमाणस्य संसारस्य तुच्छतां मनसा कृत्वा संपरित्यक्तमहामात्रपदविर्विन्ध्यपर्वतकल्पितनिकेतनां कात्यायनीं दिदृक्षुः प्रयाणपथे तस्थौ ततश्च स्वानुरूपतपश्चर्याराधनार्जितदर्शनप्रसादया देव्या प्रीतास्मि गच्छ गह्वरे काणभूतिनामानं पिशाचमधुना दृग्गोचरे कुरुष्वेत्यादिष्टस्तत्रैव गुहायां घोराकृतिपिशाचशतपरिवारितमुच्छ्रितसालाकारमहाकायं भीषणदर्शनं काणभूतिं महाभूतं समासाद्य विप्रावस्थासदृशेनार्चनाविधिना तेन सत्कृतस्तमनुयुयुजे विनीतशीलः शिष्टाचार इवावलोक्यसे कथं नाम दशामीदृशीं यातोऽसि केनवा कारणेन निस्तोयकर्कशकण्टकद्रुमभूयिष्ठे विरलविरलमानुषसंचारे दुरासदेऽटवीकान्तारे विहितवासोऽसीति पृष्टे तस्मिंश्च काणभूतौ श्रूयतां महानुभाव यदि कौतुकम् पुराहं धनाधिपवैश्रवणानुचरो यक्षोऽतिनिकृष्टमित्रसंगमदापात् प्रभुणा यथार्हं दण्डितस्तच्छापेन निष्ठुरपिशाचतां गमित ईदृशमवस्थान्तरं दुस्सहमनुवोभवीमि, दुःखोदर्केण स्वपापेन पापेन मया दुर्वसेऽतिभयानकेऽत्र कान्तारे सुचिरमुषितं संप्रति शापवधौ मे पर्यवसितप्रायेऽचिरेण पुष्पदन्तसमागमावधिकं शापं तरिष्यामि वार्तेयमाकर्णितं मया श्मशाननिवासिनः कपालभृत इति व्याहृत्या विरते तस्मिन् सहसा निज-जन्मान्तरवृत्तान्तजालं सविस्तारं तदानीं कैलासाद्रौ शंभूदीरितविचित्रकथापूर्वकं संस्मृत्य सुप्तोत्थित इव अहो हन्त सोऽहं पुष्पदन्तोऽस्मि, शृणु मत्तः कथामिति प्रस्तुत्य जातिस्मरो भूत्वोन्नतदयालुधीरत्यन्त-

चमत्कारिणीं सप्तविद्याधरचक्रवर्तिसंबंधिनीं कथां महतीं काणभूतिं संश्रावयन् कथान्तेऽवोचद् दाक्षिणात्यो गुणाढ्यो नाम मौनव्रतमुद्रितवदनोऽग्रजन्मा त्वामासाद्य त्वन्मुखान्मयोदीरितां कथामेनां श्रोष्यति तदा युवां शापश्रृङ्खलाद् विमाक्ष्येथे निःसंशयमिति । अथ कल्याणाब्रहतत्कथासंश्रवणनितान्तविस्मृतान्तरात्मा सामीप्यसमासन्नदीर्घीकृतशापावधिपर्यवसानबोधनप्रफुल्लास्योऽत्युद्दामसंमोदविस्फारिताक्षः स राजराजानुचरचरः काणभूतिस्तस्यातिमानुषं प्रभावं विदित्वा सविनयं, हे प्रभो कृतज्ञोऽस्मि महानुभावशालिनं भवन्तमृते कोऽन्यो रोमहर्षणीं कथामीदृशीं वेत्ति भवदीयानुग्रहेणैव निष्ठुरात् कौबेरशापान्मुक्तप्रायोऽहमभ्यर्थये ब्रवीत्वत्रभवानात्मनो लोकपूजितजन्मोदन्तं यदि न गुह्यमत्रेति कृताञ्जलिरप्राक्षीत् ततस्तदभ्यर्थनानुरोधाच्च स पुष्पदन्तः पूर्वजातिप्रतिपत्तिं प्रतिपद्य दीर्घीभूतासह्यपीडप्रभुविरहद्विगुणीकृततद्दिदृक्षाकुलाकुलमनस्कत्वाच्छंभोः पार्श्वे समुपतिष्ठासुरपि सर्वमाजन्मवार्तामात्मीयां विस्तरश इत्थं कथापयति स्म अभूतां कौशाम्बीनगरे द्विजदंपती सोमदत्तापराह्वयोऽग्निसोमो नाम श्रुतिसागरनिष्णातो निरवद्यचारित्रकवचो विपश्चिदग्रणीस्तस्य जाया वसुदत्ता नाम । सोऽहं शर्वाणीशापवशात् तस्माद्विप्रवरेण्यात् तस्यामुत्पन्न औरसस्तनयोऽस्मि श्रुतधरः कात्यायनो वररुचिश्चेति यथावल्लोके विदितयथार्थनामा । शैशवे मे दैवदुर्विपाकाज्जनके कालधर्माकृष्टः प्राणात्ययमुपगते जननी मां कृच्छ्रादपूपुषत । एकदा दूराध्वमार्गधूलिधूसरौ

द्वौ विप्रावध्वनीनौ व्याडीन्द्रदत्तनामानावेकरात्रपरिश्रयार्थमस्मद्-गृहमशिश्रियेताम् । तत्रान्तरे मृदङ्गध्वनिपुरस्सरं कोऽपि शैलूषो यदृच्छया प्रादुर्भूयास्मासु तिष्ठत्सु नृत्यं कर्तुं प्रारब्धः । ततश्च यथैव तेन कुशीलवेन नाटितं तथैव तौर्यत्रिकमनुकृत्य साकल्येन मयापि प्रदर्शितम् । मां च दृष्ट्वा शैलूपिकदर्शितनाट्यानुकृतिकुशलं सकृदधिगततौर्यत्रिकप्रयोगनैपुण्यशालिनं तावध्वगौ परमविस्मयोत्फारितदृशौ मद्गोत्रनामधेयमुपलभ्य मातरमित्यभाषिषाताम्, हे अम्ब वेतसपत्तने वशिष्ठगोत्रौ द्विजाती भ्रातरौ मानिनौ परस्पर-दृढबद्धभ्रातृस्नेहावभूतां करम्भदेवसोमाभिधौ ययोः पृथग्जातौ सूनू विद्यालिप्सयावां पाटलिपुत्रसमाख्यं पुटभेदनं प्राप्तौ । पुरीह वर्षनामा ब्राह्मणोऽस्ति विद्यावारिधिस्तस्माद् विद्यासाकल्यं युवाभ्यां प्राप्यतामिति शिखिवाहनादेशाद् वर्षवसतिमासाद्य कुशलप्रश्नपूर्वं निजागमनप्रयोजनं विज्ञाप्य तत्कुटुम्बिनीं गुरुदेवप्रवृत्तिमप्राक्षव । अनुयुक्ता सा मधुरभाषिणी सरलहृदया प्रत्यवोचद् यदासीदेतस्मिनेव पत्तने श्रोत्रियोत्तमः शङ्करस्वामी नाम, प्रज्वलितविद्याद्युम्नस्य तस्यात्मजौ वर्षोपवर्षाख्यौ, तयोर्मध्येऽवरजो मम देवर उपवर्षः सम्यगधीतनिर्वाच्यविद्याविख्यातः सर्वजनसपर्याभाजनं धनाढ्यश्च तथापि मदीयप्राणेश्वरभूतोऽग्रजस्तु विद्याविहीनो देवानांप्रियोऽतिनिन्द्यमौर्ख्यादात्मनोऽकिंचिज्ज्ञोऽकिञ्चनश्च पूर्वमभूत् ततश्चैकदा स्वविभवोत्सिक्ताहं-श्रेयोदूषिता दुर्विनीता देवगद्गिणी

गुह्यलाञ्छनचिह्नितं भक्ष्यं स्वयं ददौ तच्च गृहीत्वा मूर्खे तस्मिन् सहर्षं गृहं प्रत्यागते किं करोमि मन्दभागिनी हा धिग् हा धिग् हताशास्मि मूर्खवल्लभेति सवाष्पोद्गारं सशोकमक्रुक्षम् क्षणान्तरे चासावपि निजमौर्ख्यापत्रपितोऽन्तर्मन्युना भृशं परिसंतातप्यमानः कार्तिकेयमन्दिरमविलम्बितमुपेत्यानल्पं तपस्तप्तवांस्ततो भक्तिप्रीणितस्य वरदस्य षाण्मातुरस्य प्रसादेन सर्वज्ञतां लब्ध्वा, ज्ञानमिदं कात्स्न्र्येन श्रुतधराय स्वयं प्रदेहीति भगवदनुशासनमपि प्राप्य सांप्रतं प्रत्यावृत्तो गृह आस्त इति वर्षोपाध्यायभार्याव्याहृतिं श्रवणविषये कृत्वा गुरुदेवं प्रश्रयपूर्वमभिवाद्य श्रुतधरानयये तदीयादेशं सगौरवं शिरसि धृत्वा वसुंधरामण्डलमतिविशालं सर्वत्र परिवम्भ्रम्यमाणौ दैवयोगाद् दिष्ट्या ते सूनुरयं चिरादवाप्तौ त्वदनुमत्येदानीमेनं बुद्धिमन्तमादाय गुरुसकाशं समुपस्थास्यावहेऽनुज्ञां देहि त्वत्पुत्रापनयने मातरिति । अयि भो दयितबन्धुसुहृज्जनविरहे कस्य हृदयं कण्ठप्रतिरुद्धवाष्पौघेन परिपोपूर्यमाणं शोकेन न संतातप्येत, किं पुनरप्रमेयवात्सल्यपात्रीभूतस्य तनूजरत्नस्य हृदयछेदिनि विरहसमये ? कथंचित् कथंचिदनुनीता ताभ्यां विप्रयुक्ताभ्यामुदश्रुवदना जननी मे, भूयासुः शिवाः वः पन्थानः, पुत्रक दिवानिशमतन्द्रितेन शास्त्राभ्यासेन चरितार्थो भूत्वा मामानन्दय नन्दनेति भाविकल्याणशंसिनीमाशिषं ददती वत्सं मां दृढमुरसि कृत्वा शिरसि सस्नेहं जिघ्रन्ती कृच्छ्रेण महता मत्प्रयाणानुज्ञां व्यश्रिश्रणत् । अथ कालक्रमेण वयं सर्वे व्याडीन्द्रदत्तश्रुतधराः कार्ति-

केयप्रसादितवर्षोपाध्यायवेश्म समासाद्य विद्यापरिशीलनदीक्षापवित्रीकृतात्मानः सन्तो रात्रिंदिवमेकाग्रेण मनसाध्ययनतत्परा अभूम ततः पश्चात् कियत्कालव्यत्ययेऽहं गुरुपादेभ्यः सकृच्छ्रुतमात्रेण शिक्षितसाङ्गवेदाद्यागमसंदोहो विद्यानिधिः समवर्तिषीत्येवं व्याहृत्य मुहूर्तं विरतो गणाग्रेसरपुष्पदन्तावतारः कात्यायनः कथाश्रवणनिरते काणभूतिनाम्नि यक्षचरे सावधानं शृण्वति पुनर्वक्तुमुपचक्रमे। एकदा पाटलिपुत्रीयमितिवृत्तं पृष्टो मया पूज्यो गुरुदेवः कथापयति स्म यत् पुरा दारुणावग्रहपरिशोषिते समये दुर्भिक्षं दुस्सहं समजायत तस्यां चानावृष्टौ दीर्घीभूतायां केचन त्रयो द्विजभ्रातरो नृशंस्यविकृतचित्तावृत्तयस्तिस्रः स्वस्वभार्याः पतिदेवता जीर्णोपानह इव लघु परित्यज्य देशान्तरं किल प्रययुः। कदर्याणां मनःसु कथं नाम बन्धुजनं प्रति सौहार्दं संजायेत ? ततस्तासां साध्वीनां मध्य एकाऽन्तर्वत्नी समया पुत्ररत्नं पुत्रकाभिधं सुषुवे। अथ कालेन तिसृणामस्मिञ्शिशौ सुदृढबद्धसमानस्नेहानां सतीनां भक्तिवात्सल्यतुष्टेन पिनाकिना वरदानेनानुगृहीतस्य प्रतिदिनं सुप्तप्रबुद्धस्य शिरसि सुवर्णसहस्रं निरन्तरमुदपादि तेन च काञ्चनसहस्रेणाहर्दिवि प्रादुर्भूतेनातिमात्रस्फीतकोशोऽसौ पुत्रको राज्यं लब्ध्वा रञ्जितपौरजानपदो यथान्यायं दण्डनीतिं नियुज्य सर्वाः प्रजाः प्रशास्ति स्म। एकस्मिन् समये भूरिदक्षिणं शंभूपासनविधौ तेन नृपेण विधीयमाने बुभुक्षिता भिक्षार्थिनस्ते नृशंसाः सोदरा जनपदान्तराणि परिभ्रम्य समाजग्मुः। स्वभावदयालुरुदारधीर्भूपतिः पुत्रको मातृ-

भिरभिज्ञातानागन्तुकान् पितरं पितृव्यौ च तांस्त्रींस्तत्समागम-प्रमोदितमनाः सत्कारेणात्मानुरूपेण सप्रश्रयमर्चयांबभूव। एवं काले गच्छति शनैः शनैरेतेषां परदत्तसंपत्संभोगविमोहितानामहं-यूनां चेतस्याहोपुरुषिका सर्पिणी शिर इव दर्पमुदनैषीत्। कृतघ्नानां विवेकरहितानामनन्ततृष्णानां स्वभावः परद्रोहोन्मुखः कथमिवा-न्यथा कर्तुं शक्यते? इत्थंकारं वातेरितकपीटयोनौ शुष्केन्धनेनेव दौरात्म्यसंधुक्षितलोभेऽतृप्त्या प्रतिक्षणं स्फीतिं याति सति, वयं पुत्रकममुं यथाशीघ्रं कृतान्तसद्म नीत्वा सम्यगात्मसात्कृतराष्ट्रकोष-बलादिसमग्रराज्याङ्गाः परमसमृद्धराज्यसंपत्तिसंभोगसुखानि निर्वेक्ष्याम इत्येकान्ते परस्परं संमन्त्र्य राजद्रुहस्त्रयो भ्रातरो विन्ध्या-धिष्ठितदेवीपूजाव्याजेन राजानं निषूदनाय स्वगृहमानैषुः किन्तु क्षणान्तरे स्वं जिघांसूनां तेषां महापातकचेष्टितं दिष्ट्या विदित्वापि वैरनिर्यातनविमुखः सन् स नृपपुंगवो राजन्वद् राज्यं परित्यज्य केवलमात्मद्वितीयो विन्ध्याचलकान्तारं जगाम। पुत्रकेण परि-त्यक्तं तैश्च राज्यद्रोहिभिरात्मसात्कृतमपि तद्राज्यमचिरेण बलीय-सामभित्राणां हस्ते न्यपाति। दुरात्मनां नृशंसाना चिरस्थायि कल्याणं कुतः संभवेत्? अथाप्राप्यमनुष्यसंचारे शार्दूलसिंहा-दिघोरहिंसारुरुक्षवेडितनिनादिते विन्ध्यकान्तारे भ्रमन्नक्षय्यधृतिमान् पुत्रकस्तत्र केशाकेशि बाहूबाहवि युध्यमानावसुरौ यदृच्छया निशाम्य पप्रच्छ कौ युवां किंव्यापाराविति। आवां सोदरौ दानवावेकभाजनयष्टिपादुकात्मकं पैतृकस्वापतेयं लक्षीकृत्य तज्जि-

केयप्रसादितवर्षोपाध्यायवेश्म समासाद्य विद्यापरिशीलनदीक्षापवित्रीकृतात्मानः सन्तो रात्रिंदिवमेकाग्रेण मनसाध्ययनतत्परा अभूम ततः पश्चात् कियत्कालव्यत्ययेऽहं गुरुपादेभ्यः सकृच्छ्रुतमात्रेण शिक्षितसाङ्गवेदाद्यागमसंदोहो विद्यानिधिः समवर्तिषीत्येवं व्याहृत्य मुहूर्तं विरतो गणाग्रेसरपुष्पदन्तावतारः कात्यायनः कथाश्रवणनिरते काणभूतिनाम्नि यक्षचरे सावधानं शृण्वति पुनर्वक्तुमुपचक्रमे। एकदा पाटलिपुत्रीयमितिवृत्तं पृष्टो मया पूज्यो गुरुदेवः कथापयति स्म यत् पुरा दारुणावग्रहपरिशोषिते समये दुर्भिक्षं दुस्सहं समजायत तस्यां चानावृष्टौ दोर्घीभूतायां केचन त्रयो द्विजभ्रातरो नृशंस्यविकृतचित्तावृत्तयस्तिस्रः स्वस्वभार्याः पतिदेवता जीर्णोपानह इव लघु परित्यज्य देशान्तरं किल प्रययुः। कदर्याणां मनःसु कथं नाम बन्धुजनं प्रति सौहार्दं संजायेत ? ततस्तासां साध्वीनां मध्य एकाऽन्तर्वत्नी समया पुत्ररत्नं पुत्रकाभिधं सुषुवे। अथ कालेन तिसृणामस्मिञ्शिशौ सुदृढबद्धसमानस्नेहानां सतीनां भक्तिवात्सल्यतुष्टेन पिनाकिना वरदानेनानुगृहीतस्य प्रतिदिनं सुप्तप्रबुद्धस्य शिरसि सुवर्णसहस्रं निरन्तरमुदपादि तेन च काञ्चनसहस्रेणाहर्दिवि प्रादुर्भूतेनातिमात्रस्फीतकोशोऽसौ पुत्रको राज्यं लब्ध्वा रञ्जितपौरजानपदो यथान्यायं दण्डनीतिं नियुज्य सर्वाः प्रजाः प्रशास्ति स्म। एकस्मिन् समये भूरिदक्षिणं शंभूपासनविधौ तेन नृपेण विधीय-

भिरभिज्ञातानागन्तुकान् पितरं पितृव्यौ च तांस्त्रींस्तत्समागम-प्रमोदितमनाः सत्कारेणात्मानुरूपेण सप्रश्रयमर्चयांबभूव। एवं काले गच्छति शनैः शनैरेतेषां परदत्तसंपत्संभोगविमोहितानामहं-यूनां चेतस्याहोपुरुषिका सर्पिणी शिर इव दर्पमुदनैषीत्। कृतघ्नानां विवेकरहितानामनन्ततृष्णानां स्वभावः परद्रोहोन्मुखः कथमिवा-न्यथा कर्तुं शक्यते? इत्थंकारं वातेरितकूपीटयोनौ शुष्केन्धनेनेव दौरात्म्यसंधुक्षितलोभेऽतृप्त्या प्रतिक्षणं स्फीतिं याति सति, वयं पुत्रकममुं यथाशीघ्रं कृतान्तसद्म नीत्वा सम्यगात्मसात्कृतराष्ट्रकोष-बलादिसमग्रराज्याङ्गाः परमसमृद्धराज्यसंपत्तिसंभोगसुखानि निर्वेक्ष्याम इत्येकान्ते परस्परं संमन्त्र्य राजद्रुहस्त्रयो भ्रातरो विन्ध्या-धिष्ठितदेवीपूजाव्याजेन राजानं निषूदनाय स्वगृहमानैषुः किन्तु क्षणान्तरे स्वं जिघांसूनां तेषां महापातकचेष्टितं दिष्ट्या विदित्वापि वैरनिर्यातनविमुखः सन् स नृपपुंगवो राजन्वद् राज्यं परित्यज्य केवलमात्मद्वितीयो विन्ध्याचलकान्तारं जगाम। पुत्रकेण परि-त्यक्तं तैश्च राज्यद्रोहिभिरात्मसात्कृतमपि तद्राज्यमचिरेण वलीय-सामित्राणां हस्ते न्यपाति। दुरात्मनां नृशंसाना चिरस्थायि कल्याणं कुतः संभवेत्? अथाप्राप्यमनुष्यसंचारे शार्दूलसिंहा-दिघोरहिंसारुक्षवेडितनिनादिते विन्ध्यकान्तारे भ्रमन्नक्षय्यधृतिमान् पुत्रकस्तत्र केशाकेशि वाहूवाहवि युध्यमानावसुरौ यदृच्छया निशाम्य पप्रच्छ कौ युवां किंव्यापाराविति। आवां सोदरौ दानवावेकभाजनयष्टिपादुकात्मकं पैतृकस्वापतेयं लक्षीकृत्य तज्जि-

वृक्षया बाहुसंग्रामं कुर्व इत्यसुरयोर्वाक्यं निशम्य विहसन् पुत्रकः प्राह तृणवत्तुच्छजीर्णवस्तुनिमित्तं नियुद्धं कुर्वाणौ लोकपरिहासपात्रतां मा खलु यासिष्टं तत्समनन्तरमेव द्वा ऊचतुर्यदेत उपानहौ पादयोः परिधाय गगनेचरत्वं संपाद्यते यद्यदभिलषितमन्नादिकं चिन्त्यते तत्तच्चिंतितमात्रेण भाजनेऽस्मिन् परिपूर्यते यत् किमपि भुवि सिसृक्षितं तदनया यष्ट्या भूतल उल्लिखितमात्रेण स्वयमुत्पद्यत इति श्रुत्वा, युवयोः समकालमेव धावतोर्यो जवनतरस्तस्यैव स्वाम्ये पैतृकधनं यष्टिपात्रोपानड्मयं सर्वथा तिष्ठत्वित्युपदिदेश पुत्रको मुहूर्तान्तिरे तथास्तु बाढमिति तरसाऽहमहमिकया धावतोस्तयोर्मूढचेतसोः पद्भ्यां पादुके परिधाय सर्वकामदं सर्वस्वं परिगृह्य मंक्षूदडयिष्ट सुखी विशालविशाले विष्णुपथेऽचिरेण च सावंजिकपुरि कृतावतरणः कस्याश्चित् स्थविरायाः वेश्मनि निवसन्नविरतसुवर्णप्रदत्वेन तयातिथिसत्कारेणोपचर्यमाणः पुत्रकस्तत्रत्यस्य महीपतेर्महेन्द्रवर्मणस्तनूजां लावण्यक्षीराब्धिचन्द्रिकां लोकोत्तरवरवर्णिनीं स्मरसर्वस्वभूतामिव मनोऽभिरामां पाटलाम-

भनामिन्दुमुखीं पाटलामतृप्तेन चक्षुश्चषकेण पिबन्नतृप्तेन मनसा भुजान्तराले चकितचकितहरिणाक्षीं सुदृढं ममैपेति जग्राह। तत्कालानुष्ठितगान्धर्वविवाहोत्सवयोस्तरुणदंपत्योः पारस्परिकानुरागे राशीभूतेऽचिरेण सा सरोजिनीव पुष्पिता बभूव। अथ कालक्रमेण पार्थिवेन विदितरहोवृत्तान्तः प्रच्छन्नकामुकः पुत्रको दयितां पाटलामङ्के कृत्वा नभोमार्गेण प्रचचार ततश्च भागीरथीतटं समया पाटलावचनानुरोधादनन्तप्रभावयष्टिलेखाभिर्यथाभिलषितं सौवर्णप्रासादमालासुमाकुलं राष्ट्रकोशचतुरंगबलादिसमन्वितमक्षय्यसमृद्धिसुखितपौरलोकमनेकविद्यालयसुमण्डितं लक्ष्मीसरस्वतीविभ्रमस्थानं नगरं निर्ममे यत् पौरजानपदैः पाटलिपुत्रमित्यभिधीयते यत्र च पाटलया सार्धमक्लेशजहृदगंगमनानाभोगार्थप्राचुर्यानुभवेषु सततसुखमयं कालं क्षणमिव यापयन् क्ष्माभृत् पुत्रकोऽनायसेन राज्यधुरमुद्वहन् महीं शशासेति वर्षोपाध्यायमुखारविन्दादपूर्वं पाटलिपुत्रीयमुपाख्यानं श्रुत्वा तदानीं, भोः काणभूते, वयमतीव विस्मितमानसाः सुतरामन्वमोदिष्महीत्युक्त्वा कात्यायनो मुहूर्तं विरराम।

---

(२) उपकोशाकथा

उपरम्य मुहूर्तकं स्मृतिप्रत्यवमर्शेन मनसि व्यतीतात्मीय-जीवनयात्रासंस्मरणसंततितन्तुं सखेदमिव वयन् यानि श्वोवसीयांसि दिवसान्यनिर्वचनीयेषु परमसुखसंतानेषु प्रफुल्लपुष्पमञ्जरीवामलोचनास्मेराननविलसितालोकशोभिनि मधुरमधुसमय इव मधुरसलोलुपमधुव्रत—श्रेणिशिञ्जितनीशिञ्जितटङ्कारसुभगकार्मुकारोपितपौष्पबाणशरव्यभविष्णुकामातुरमार्गणाकोविदमधु-सुहृत्प्रिये यौवने क्षणभंगुरस्वप्नवद् व्यतिवाहितानि तेष्वपुनर्भवेषु स्पृहयालुरिव वररुचिः कारणभूतये कथासंश्रवणैकाग्रमनसेऽनन्तरीयं यौवनवृत्तान्तमुपवर्णयितुमुपचक्रमे, ततोऽहं कालक्रमेण सर्वविद्गुरुसकाशादासादितानवद्यविद्यासाकल्यभावितात्मा मौग्ध्यसारल्यमात्रमण्डितं बाल्यं निष्किल्बिषमतिवाह्य सुकुमारतरुणमनोमदयित्नुं सर्वदमपुष्पधन्वसार्वभौमवशंवदमभिनवपल्लवितं यौवनमारूढो मदीयवह्निश्चरजीवितसंकाशां गुरुभिर्विधिवत् प्रतिपादितां वीतकलङ्कपौर्णमासगुधांशुवदनमतताकृष्टमदीयानिमेषदृष्टिं नीलकौशेयमृदुपेशलचिकुरकलापप्रहेलनिर्जितबर्हिबर्हभारां सुरतप्रदीपायमानारुणाधराधरीकृतपक्वबिम्बां तारुण्यविभ्रमायतनभूतनीलसरसीरुहनेत्रनितान्तविमनीकृतेन्दीवरद्युतिमतिशयिनमृणालकाण्ड—रुचिरभुज-

वल्लरीं त्रैलोक्यविजिगीषुपञ्चसायकविजयाभिषेककलशायमानपीवरोन्नतकुचकुम्भशोभिनीं भुजबन्धनोचिततनुमध्यशालिनीं मनोभवक्रीडापर्वतायमानपीननितम्बभारगौरवादिव हंसगामिनीं रम्भोरूमपि तन्वंगीं मनोहरेषु शरीरावयवेषु वामामपि हृदयेऽवामां रूपे सौन्दर्यमयीं मनसि सौजन्यमयीं सुरतकेलिषु जातु धृष्टाचारामप्यन्यत्र न कदाचिदपि धृष्टाचारां किं बहुना मन्मथस्य सर्वस्वभूतामपि मम सर्वस्वभूतामुपकोशासंज्ञामुपवर्षतनूजामुपयम्य तया सह ननु क्षणवत् संक्षिप्यमाणासु परमानन्दथुदायिनीषु तासु तासु त्रियामासु सुरतमहामहं निरन्तरं निर्विशन् परमार्थतः सुखायमानः कालमनल्पमत्यवीवहम् । तत एकदा जडबुद्धिमात्मानं सुतरामनुशुच्य तपसा तीव्रेण पार्वतीवल्लभात् कृशानुरेतसोष्टाध्यायीसमाख्यं सर्वविद्यामुखं नूतनव्याकरणमासाद्य प्रतिनिवृत्तं वर्षोपाध्यायस्यान्तेवासिनं सब्रह्मचारिणं पाणिनिनामानं वासराष्टतयावधिके वैयाकरणविवादे परिपन्थिनं तं यावत् पराजैषं तावद्विरूपाक्षः संजातक्रोधो भीषणेन हुंकारेणास्मान् सर्वाञ्जडीकुर्वन्नस्मदीयं पारंपरीयमैन्द्रव्याकरणं मंक्ष्वपाहार्षीत् । इत्थंभूते किं करोमि हस्ताद्धस्तं पारंपर्येणागते तस्मिंश्चिरंतनेऽमूल्ये व्याकरणरत्ने शंभुनापहृते गत्यन्तराभावात्तपश्चर्याराधनोपासनैस्तं कथमपि प्रसादयितुमना हिरण्यगुप्ताभिधस्योपकण्ठनिवासिनो व्यापारिणो हस्ते निजगृहस्थित्यर्थं द्रव्यं निक्षिप्य दयितायै तथाकृतं तन्निवेद्य च प्रयाणमार्गे पदमक्षौप्सम् । अथ प्रणयिनि मयि दूरीभूते प्रोषित-

भर्तृकानुरूपं पातिव्रत्यमतन्द्रितेन व्रताचरणेन परिपालयन्ती मद्वियोगसंतापाद्युद्भुक्षणिदन्दह्यमानपांडुरक्षामांगी तथा क्षीणप्रतिपच्चन्द्रकलावल्लोकलोचनद्विरेफार्कर्षिणी शीघ्रयियासुभ्यां पीनस्तनकुम्भाभ्यां पुरस्तात् समाकृष्यमाणापि पृथुलश्रोणिभारादिव मन्दमन्दं सिस्नासुर्भागीरथीं प्रति व्रजन्ती मे भार्या विभवोत्सिक्तेन पार्थिवस्य प्राड्विवाकेन पुरोधसा सचिवेन च पृथक्पृथक्स्थितेन सस्पृहमुद्वीक्षिता ततो गंगाजलविप्लवात् संध्याकाले प्रत्यागच्छन्ती, काममोहितानां तेषां तत्र मार्ग उत्तिष्ठतां, प्राथमिकेन युवसचिवेन बलात्करेण भुजे गृहीत्वा प्रथमं मां भजस्वेति सनिर्बन्धमुक्ता सा प्रज्ञावती यथैतत् ते तथैव मेऽभीप्सितं किन्तु प्रवासस्थभर्तृकाहं कुलिनी घंटापथेऽविरलजनसंचारे कथमेवं समाचरेयं जातूचित् कोऽपि मां पश्येत् ततोऽनिष्टमावयोर्नूनमुत्पद्येत तस्मादितस्तृतीयेऽहनि दोषारम्भे गृहे मामुपतिष्ठस्वेत्यभिधाय यावत् किञ्चित् प्रचरति पुरोधसा पथि प्रतिरुद्धा तृतीये दिवसे निशाया द्वितीये प्रहरे गेहं ममागच्छेति संकेतकं दत्त्वा तस्मात् कथंचिन्मुक्ता कतिपयपदानि गच्छति तावत् प्राड्विवाकेनापि मदनाकुलेन हस्ते गृहीता सा तृतीये वासरे निशीथिन्यां तृतीये प्रहरे संगमो मे त्वया भवितेति तद्दत्तसंकेतककल्पनया तमतिसंधाय भीतभीतेक्षणा स्वनिवेशनं प्राविशत्। तत्रान्तरे वणिग्विरण्यगुप्तोऽप्यागत्य तदीयभर्तृनिक्षिप्तधनप्रत्यर्पणमामिषमिव व्यपदिश्य संगमं तामभ्यर्थयांचक्रे। इतस्तृतीयतिथौ विभावर्याश्चरमप्रहरे ध्रुवं

त्वद्वशंवदा भविष्यामि का गतिरिति युक्त्या तमपि विप्रलभ्य व्यस्राक्षीत् तदनन्तरं चेत्थंकारं दीर्घरतेभ्यः सारमेयेभ्य इव चतुर्भ्यः काममोहितेभ्यो रतिलम्पटेभ्यः कापुरुषेभ्यः कृच्छ्राद् विमोचितस्यात्मनः सङ्कटवृत्तान्तं परिजनविदितं कृत्वा किमपि चिन्तापरा बभूव मन्दभागिनी मेऽमन्दप्रतिभाशालिनी प्रेयसी । अथाविर्भूतेऽह्नि तार्तीयीके प्रदोषसमये प्रदीपान् सर्वान् निर्वाप्य तेषां चतुर्णां कामुकानामागमनायोत्कण्ठमानायामिव सद्मनि मम प्रियतमायां स्थितायां तदधरामृतरसपानलोलुपो युवसचिवो दरचकितेक्षण इव सोत्कण्ठमस्मद्वेश्म प्रविष्टोऽस्नातं त्वां न स्प्रक्ष्यामि मलिने त्वयि कुतो मे सुरतरसो गच्छाभ्यन्तरं स्नाहीति तयोक्तं वचनमुररीकृत्य गाढान्धतामिस्रमुषितालोके गर्भगृहे कृतप्रवेशो मूढोऽयं परिचारिकाभिर्मलीमसतैलकज्जलमयेनोद्वर्तनेनांगेष्वा — मस्तकचरणपर्यन्तं सर्वतः सुचिरमवलिप्य मसीवर्णयातुधानीकृतस्ततो द्वितीयप्रहरे संजाते मन्मथदर्पवशगे द्वितीये कामिनि पुरोधसि यथावत् सोत्सुकमायातेऽसौ मे प्रोषितो भर्ता समायातोऽत्र मञ्जूषायामात्मानं निगूहेत्युपकोशया समम्भ्रमं निगद्य तत्राञ्जसा निवेशितोऽभूत् । विधाय द्रुततरं दारुमञ्जूषामर्गलितां सा बुद्धिमतीनां वरेण्या मानिनी द्वैतीयीकमनंगकेलिलम्पटं पुमांसं सावहेलमिवावादीन्मलिने त्वद्वर्ष्मणि का मे रतिरिति । यथाप्रथमवत्तमपि तथावच्चेटिका विवसनीकृत्य निरन्तरजायमानां जिहृसिषामुद्रामां कथं कथमप्यन्तर्निगृह्य मसृणकालमसीतैलमर्दनावलिप्तसर्वांगातिशोभनं परातिसंधाननिपुणमनोभवविडम्बिते तार्तीयीकेऽपि पुंध्वजधारिणि प्राङ्-

विवाके सतृष्णां प्राप्ते सति ध्रुवमस्मत्प्रभुः प्रवासात् प्रत्यावृत्तो भवेदिति सहसा व्याहृत्य भीतभीतं तत्र महामञ्जूषायां प्रचिक्षिपुः। कथं नाम कच्चरदेहो भूत्वा मां सततस्नानविशुद्धां स्प्रष्टुमर्हसि स्नानं कुर्विति तयोक्त्वा पारिपार्श्विकाभिस्ताभिरयमपि नग्नीकृत्य कृष्णातैलकज्जलैरतिघोरदर्शनकौणपसोदरतां प्रापितस्तस्मिन्नेव क्षणे पश्चिमयामे संवृत्ते वणिजि दण्डायमानमेहनधारिणि हिरण्यगुप्ते साकांक्षं प्रादुर्भूते गृहाधिपागमनव्याजेन तत्रैव महति कोशे गोलकवज्झटिति भयाकुलाकुलः प्राक्षेप्यत। एवंकारमेकत्रैकसार्थं सुदृढदत्तलोहार्गलायां बृहन्मञ्जूषायां निक्षिप्तेषु जीवितसंशयगतेष्विवातिभयंकरभीतिग्रस्तेष्वेतेषु तूष्णीं शृण्वत्सु नराधमेषु हे मन्मनोमोहिनि सुभ्रु मां प्रकामं रमयेति वदन्तं हिरण्यगुप्तं प्राह मनस्विनी मद्भर्त्रा निक्षिप्तं गृहव्ययार्थं धनं मे देहीति श्रुत्वा निक्षेपरूपं युष्मदीयं हिरण्यं मयि वर्ततेऽयि चारुहासिनि पूर्वं भजस्व मां पश्चात्तद्धिरण्यं ते प्रत्यर्पयिष्यामीत्यालपति तस्मिन्ना मदेकभार्या पुनरत्युच्चैर्भो गृहदेवताः शृणुत यूयमस्य हिरण्यगुप्तस्य हस्ते मे धनं वरीवर्तीत्याकुश्य सानुनयं स्नानच्छलेन तमपि विवस्त्रं मषीतैलावमर्दनैः परिचारिकाभिरतिभीषणाकृतिं दानवसदृशं कारयित्वा, प्रभाता शर्वरी द्रुतमपसरेति संतर्जनपूर्वमपहस्तयन्ती विससर्ज। सुरतलोभविडम्बितपूर्वोऽपि केवलमिदानीं दुर्गतिभाविताऽऽत्मा यूनपट्टिनष्टपुरुषध्वज इव वर्षधरोऽतिदुर्मनायमाणोऽध्वनि नकोलाह्वैः कौलेयकैर्निर्दयं खाद्यमानः कोदिशीकोऽदिगम्बरो

ऽपि दिगम्बरः सोऽसौ हिरण्यगुप्तोऽवाङ्मुखीभूय कोऽपि मामुद्वीक्षेतेति यथाशीघ्रं परिदोद्रुयमाणोऽचिरेण दृग्गोचराद् व्यनशत् । अपरेद्युः प्रातःकाले पारिपार्श्विकाभिरनुगम्यमाना सा पतिव्रता समस्तललनाललामभूता मे जायारत्नमुपकोशा महीभुजो नन्दस्य सार्वजनिकसभास्थानमासाद्य, देव भर्त्रा मे श्रुतधरेण न्यासीकृतं हिरण्यमात्मसात् कृत्वा चरणनिधरण्यगुप्तो न प्रतियच्छति याचितोऽप्यत्रायुष्मान् देव एव प्रमाणमिति राज्ञे तस्मै व्यजिज्ञपत् । तत्समनन्तरमेव सदसन्निर्णयार्थं भूपेनाकारिते तस्मिन् सार्थवाहे नाहं जाने किंचिदप्यस्या धनमधिकृत्येति तस्या अपमानजवैरनिर्यातनार्थमिव सत्यमपह्नुत्य मृषाभाषिणि मे प्रेयसी बभाषे सन्ति मे निवेशने साक्षिण्यो महामञ्जूषास्था देवता या याथातथ्यं यथावृत्तमवश्यमेवात्र विवरिष्यन्तीति । ततो नरेन्द्राज्ञया कृच्छ्रमुल्लङ्घ्य कर्मकरैर्बहुभिरानीय बृहत्यां तस्यां मञ्जूषायां तत्र सभागृहमध्ये स्थापितायां सर्वेषु सभासत्सु कौतुकात् सावधानं पश्यत्सु हे गृहदेवताः सूनृतं वदत यूयमन्यथा मञ्जूषामेनां भस्मसात् करोमि ध्रुवमिति तयाक्रुश्य विरतेऽतीव भीषिता मञ्जूषादेवताः सकम्पं प्रतिभाषिरे भर्त्रा ते हिरण्यगुप्ते न्यासीकृतं हिरण्यमस्ति वयं त्रयः साक्षिणोऽत्र कश्चिदपि न संदेहलव इति । सर्वलोकविस्मापनस्याश्चर्यस्यादृष्टाश्रुतपूर्वस्य साक्षात्कारेण नितान्तविस्मितमनसः पारिषदाः प्रतिभयदर्शनान् कालयातुधानसोदरांस्तान् नग्नानतिदुष्प्रेक्ष्यमलीमसतैलकज्जलोद्वर्तनालघुलिप्तावयवान्

मंजूषामुद्घाट्य बहिराचकृषुः । तस्मिन्नेव क्षणेऽत्युल्बणे सामाजिकानां हाहाधिग्धिक्शब्दोपेते कोलाहले सोपहासनिन्दे निनादिते तया विज्ञप्तोदन्तेन राज्ञा सुनिर्णीतदण्डेम तांस्त्रीन् हिरण्यगुप्तसहितान् भृशं निगृह्य पतिदेवता सोपकोशा प्रशंसापात्रीभूता धर्मभगिनीत्वेनानल्पहिरण्यान्वितेन सत्कारेण महता सभाजयाञ्चक्रे । ततोऽहमपि गौरीवल्लभप्रसादाद् व्याकरणस्मृतिं पुनरुपलभ्य प्रमुदितचेता दयितासमागमाय गुरुचर्यायै च सत्वरं द्रुततरगतिः स्वीयं गृहं प्रत्यायासिषम् ।

(४) योगनन्दमीनपरिहासकथा

वस्तुतोऽचेतनमपि सचेतनमिवासह्यपीडविरहसंतापधूमकेतुधूमोद्गारधूसरितक्षीणालोकं मत्समागमोत्कलिकासहस्रमरीमृद्यमानसुकुमारान्तःकरणमिव बहिरपि विच्छायं सहजस्नेहभाजनं गृहमासाद्य पीयूषवर्षणकुमुदबान्धवार्धविम्बपरिष्कृतमौलिभ्राजिष्णुप्रणतवत्सलत्र्यम्बकविश्राणितव्याकरणशास्त्रपुनरनुस्मरणप्रसादसुधारसपानदूरीकृतदूराध्वमार्गजपरिक्लेशः परस्परसङ्गमप्रहृष्टमनसा बन्धुसुहृज्जनेन निर्भरसौहृदयार्द्रार्द्रहृदयोद्गारितबाष्पक्लिन्ननयनेन सानन्दं दूरप्रसारितबाहुना समालेलिंग्यमानोऽतिवत्सलैकवत्सवदनसंस्पर्शप्रमोदकोटिमारूढयाजस्रोदश्रुवा मात्रा सवात्सल्यं भुजान्तराले कृत्वा शिरसि जेघ्रीयमाणो दुर्भरवियोगक्लेशक्षामक्षामांग्या कुसुमायुधसुहृद्वसन्तागमेन प्रफुल्लमंजुलपुष्पाननया वल्लर्येव विरहानलसंतातप्यमानकोमलहृदयपीडां कथंचित्कथंचिद् भर्तृपुनःसमागमाशाबन्धेन केवलेन सोढ्वा दुर्निवारोत्कलिकासहस्रेषु नक्तंदिवं वर्षागमोत्कया मयूरांगनयेव प्रतिपालितमदीयसमावर्तनया नूनं संजीवनपीयूषसारनिस्यन्दकल्पेन चरितार्थस्य मम प्रत्यागमनेन सोच्छ्वासं पुष्पिततामरसाननश्रिया पुलकितवपुषा सबाष्पनेत्रया दयितया गाढस्नेहबहुमानपुरस्सरं गृहीतचरणोऽहं

प्रश्रयणपूर्वं विहितगुरुजनपादोपसंग्रहाभिवादन एकपत्न्या उपकोशायाः सर्वलोकदुर्लभमत्यद्भुतं मद्विरहसमये संवृत्तमितिवृत्तविशेषमश्रौषं ततश्चाहं मामकीनामेयप्रेमबहुमानपरमभूमिभूतया तया साकमन्योन्यवियोगसमयराशीभूतदुर्विगाहस्नेहामृतरससुस्वादु सहवाससौख्यमनिर्वचनीयं यथातृप्ति सुचिरं निरविक्षम् । ततः कदाचित् सम्यग्निर्व्यूढाविप्लुतब्रह्मचर्याभ्यामवाप्तानवद्यज्ञानविज्ञानकलापसंतुष्टान्तरात्मभ्यां निजनिजगेहं प्रति समाविवर्तिषुभ्यां सब्रह्मचारिभ्यां मया सहिताभ्यां व्याडीन्द्रदत्ताभ्यां तच्चरणाभिवन्दनपुरस्सरं, गुरुपादानां परमपूज्यमहिमशालिनां चरणमूले सुचिरं सुखोषिता वयमतिमूल्यविद्यानुशिष्टिप्रसादं प्राप्य खलु दुष्टरज्ञानविज्ञानाब्धिपारंगतमात्मानं मन्यमाना भवदनुग्रहस्यानृणतां गन्तुं समीहामहेऽतोऽत्रभवान् गुरुदक्षिणारूपं पारितोषिकमुद्दिश्य ब्रवीत्विति विज्ञप्त आचार्यो वर्षो युष्मभ्यं प्राप्स्यमानो जाम्बूनदमुद्राकोटिलाभ एव मे दक्षिणा भवत्विति सुव्यक्तमाजिज्ञपत् । ऊरीकृत्य गुरोराज्ञां सर्वथा गुरुजनवचसोऽनतिक्रमणीयत्वात् तौ मामवादिष्टामेहि सखे विश्वंभराभर्तुर्नन्दस्य सकाशं गुरुदक्षिणानिमित्तं शातकुम्भकोटिमभ्यर्थयितुं यामोऽन्यथा कुतोऽपि सुवर्णमियन्मात्रं प्रचुरमुपलब्धुं न संभाव्यते यतो भार्या ते पूर्वं तेन धर्मस्वसृत्वेनांगीकृता ततोऽसौ क्ष्माभृत् तावकीनः श्यालः काञ्चनस्य नवनवतिकोटिनामीश्वरश्च यः स्वीयभगिनीस्नेहात् त्वद्गुणगौरवाच्च याचिष्यमाणं जाम्बूनदकोटिमसंशयमस्मद्धस्ते वितरीष्यति

गुरुपारितोषिकं प्रति कालविप्रकर्षो न कर्तव्योऽस्माभिरितीत्थंकारं संमन्त्र्याथ निश्चितमनसो वयं तस्य भूभर्तुः कटकं प्रतिष्ठानपुरमयासिष्म। असारे खलु संसारे न किमपि चिरस्थायि वा शाश्वतिकं वा वोभवीति, हृदि धृताशापि कदाचिद् विषादेन परिणमति सुखमपि दुःखेन, बलीयो दैवं कथं पुरुषकारेण सर्वदा निवार्यते। तत्रैव प्राप्तमात्रेष्वस्मासु दुर्धर्षनियतिबलात् कृतान्तपाशाकृष्टोऽसौ वसुधाधिपः कीर्तिशेषमगमदिति विषादवार्तामकाण्डवज्राघातप्रतीकाशामनुश्रुत्य विषाददुःखाभ्यां यथा पौरजानपदानां तथैवास्माकं मनःसु युगपन्निषीदत्सु प्रेतदेहप्रवेशनाद्भुतशक्तिमानिन्द्रदत्तः सविमर्शमवोचत् पार्थिवस्य व्यपेतासोर्नन्दस्य केवलमेकवाससंजीवनायैव परित्यक्तस्वीयवपुरहमिदानीं प्रतिश्रुतगुरुदक्षिणार्जनोपायाभावात्तदीयकलेवरं प्रविशाम्यतो व्याडिदिनमेकं रहसि सुरक्षितं मे विग्रहमनन्यमना भूत्वा सावधानमवतु भिक्षार्थी श्रुतधरस्तु मामुपतिष्ठतामस्मा अहं गुरवे प्रतिश्रुतं सुवर्णं विश्राणयिष्यामीति व्यक्तं व्याहृत्य मातरिश्वेव मंक्षु योगप्रभावमास्थाय भूमिपालस्य निष्प्राणं निष्प्रभं कायं न्यविक्षत्। अथ सहसा सुप्तप्रबुद्ध इव सह प्राणैरुत्तिष्ठति तस्मिन् मेदिनीनीथे पुनः सनाथमिव राष्ट्रं प्रहृष्टाबालनिखिलपौरजानपदस्वेच्छविधीयमानतौर्यत्रिकप्रयोगप्रमुखतदवसरयोग्यसामग्रीसमुपेतानन्दमयमहोत्सवतत्परं समजनि। तस्मिन्नवसरे गूढस्थाने क्वचिदैन्द्रदत्तं निश्चलं शरीरं रक्षितुं मित्रं व्याडिं स्थाप्य ततो राजकुलमुपेत्य मयाभ्यर्थितो

दक्षिणार्थं हिरण्यं स कूटराज इन्द्रदत्तो नन्दकलेवरस्थः समीपवर्तिनं शकटालसमाख्यं प्रधानमन्त्रिणमस्मै धनार्थिने वररुचये चामीकरमुद्राकोटिं संप्रति समर्प्यतामिति समादिक्षत् । आयुष्मतो देवस्याज्ञप्तिं मूर्ध्नि धृत्वाधुना मया जातरूपकोटिः प्रदीयते विप्रवरायेति प्रोच्य कुशाग्रबुद्धिमान् सुधीः शकटालो, व्यपेतप्राणस्य पुनरुज्जीवनं युगपत् तर्कातीतसुवर्णकोटियाचकस्य राजकुलागमनं च निर्वर्ण्य मनसि सशङ्कं व्यचीचरत् कोऽपि योगसिद्धिमान् प्रभूतकनकापहरणार्थं कूटनीतिमुपयुज्य राज्ञो वर्ष्मणि सद्यःकृतस्थितिर्नूनं स्यात् तथापीदृगवस्थोऽपि नन्दस्य विग्रहोऽस्माभी रक्षणीयो युवराजेऽधुनापि बाल्यस्थेऽव्यवहारज्ञे राज्येऽपि नानाविधामित्राक्रमणसंशयवर्तिनि सतीति तदनन्तरं चासौ राजनीतिकुशलो राष्ट्रधुरंधरो विदग्धसांधिविग्रहिकाग्रणीः प्रणिधिभिर्बहुभिः प्रेतकलेवरान् सर्वत्र सूक्ष्मदृष्टिभिरन्विष्य हवींषीव प्रजवलितेषु हुतभुक्स्वशेषतः प्रक्षिप्य भस्मसादचीकरत् । गतासुसंहननगवेषणातत्पराणां गृध्रनेत्रवद्दूरदर्शिदृष्टिभाजामपसर्पाणां दृग्गोचरे दौर्भाग्यान्निपतितं ततः शीघ्रं कथावशेषीकृतं नृपविग्रहजुष इन्द्रदत्तस्य कलेवरं प्रति का कथा प्रेतशवानां संख्यातीतानां करालो दाहो जनमेजयस्य महासर्पयज्ञ इव ध्रुवमदृश्यत तस्य नीरन्ध्रधूमोद्गमेन सर्वतः संछन्नमन्तरिक्षं वर्षाकालीनगजरूपवारिवाहसंदोहावृतमिव दुर्दिनायते स्म । अहो अहह अब्रह्मण्यमब्रह्मण्यमव्यपेतप्राणस्य समाधिस्थस्य ब्राह्मणस्य कलेवरं तत्र

गवेषयित्वा निवारयन्तमपि मां कण्ठेग्राहमपसार्य कुणपोऽयं निर्जीव इत्याक्रुश्य राजपुरुषा झटिति प्रजाज्वल्यमाने जातवेदसि न्यस्या-दाक्षुरिति प्रमुक्तकण्ठं रोरुद्यमानो राजकुलमागत्य व्याडिः कपट-नन्दाय सविषादं व्यजिज्ञपत्। तदकाण्डकुलिशनिभं कर्णे कृत्वा शतधा सहस्रधा विदीर्यमाणहृदय इव तत्क्षणं दारुमय इव निश्चल उत्क्रान्तासुरिव शवो मोहाज्जडीभूतगात्रोऽह्वाय भूतले निपतितो नन्दविग्रहान्तर्गत इन्द्रदत्तः कथंचिदावाभ्यां समुच्छ्वासित उत्थाय सुदीर्घमुच्छ्वस्य, दग्धोऽस्मि निष्करुणेन शकटालेन अहहा दग्ध-भाग्यविप्लुष्टोऽहं दग्धोस्मि कष्टमहो कमिह शरणमशरणो यामि कमाश्रयमाश्रयेऽनाश्रयः कथं वा प्रशस्तब्राह्मणगोत्रोद्भवोऽपि सन् शूद्रस्य नन्दस्य संहननेऽत्रात्मानं धारयामीति प्रकृतिमापन्नो मुक्त-कण्ठमाचक्रन्दद् गाढनिर्वेदसागरनिमग्नः। समाश्वसिहि सखे समा-श्वसिहि किमन्यदित्थंभूते करणीयं भवेदिह लोके मानुषजन्म सुदुर्लभं ततोऽपि दुर्लभतरं राज्यमिति मनसा कृत्वा सत्यनन्दस्य शरीरमास्थाय सौभाग्यवशाद् दिष्ट्योपनतस्य चतुरङ्गबलादि-विविधोपस्करसमन्वितस्य परमसमृद्धिमतो राज्यस्य धुरमुद्वहन् त्वमनुत्तमं संपत्संभोगमनुभवेत्यादिना तत्कालोचितमधुरसान्त्व-नान्वितेन वाक्येन शनैः शनैः शोकाब्धिनिमग्नं तं समुद्धृत्य ततस्त-त्प्रार्थनया मतिसचिवपदं स्वीकृत्य व्याडिरहं च तेन योगनन्देन सार्धं सत्यनन्दस्य राज्यधुरं महतीमुद्वहन्तौ सुखमासिष्वहि। अथ प्रचरति काले यथार्हप्रजानुग्रहनिग्रहविवेकदृश्वभिर्यथासमयसंधि-

विग्रहविधानकुशलैः सर्वास्ववस्थासु यथायोग्यं प्रयुज्यमानराजनीति-
मर्मविद्भिरस्माभिः संहतैर्यथाशक्ति गरीयसो राज्यभारस्य समूढ-
त्वात् सुदृढीभूतराज्यमूलोऽपि कपटनन्दः सत्यनन्दशरीरान्तर्गत
इन्द्रदत्तो विद्रोहशंकाग्रस्तमना मन्त्रिणं शकटालं प्रति निजदेहदाह-
जनितवैरनिर्यातनोपायान् विविधाननिशं निदध्यौ ततश्चावसरे
प्राप्तकाले शकटालोऽसौ त्वयि दृढवद्धवैरस्त्वद्विध्वंसोन्मुखो जातु
त्वामामूलं निपात्य नन्दस्य तनूजं वालं सिंहासनमारोपयिष्यति
निःसंशयं यतः सततोत्थानशीलो भूत्वा कदाचिदपि राज्यकण्टके-
ऽस्मिन् विश्वासगन्धमपि मा स्म कार्षीः कर्हिचिदपि किंचिदपि
स्वरन्ध्रमस्मै मा दीदृशः काले कण्टकोद्धरणमेव चिन्तयेति
मन्मुखादुदीरितं मन्त्रमोमिति स्वीकृत्य प्रज्ञाचक्षुषं धृतराष्ट्रमिव
पुत्रशतोपेतं तं शकटालं लोहशृंखलावद्धचरणमनुत्क्रान्तासुविप्रो-
ज्झेन प्लुष्ट इति ब्रह्महत्यामुद्धोपयन् भयानकनरककुण्डनिभेऽन्धकूपे
प्राक्षैप्सीत् । ततः शकटालः प्रतिदिनं केवलं वारिसहितानां
सक्तूनां वर्धमानकमेकमेकपुरुषाशनेऽप्यपर्याप्तं योगनन्देन तत्रान्ध-
कूपे निधीयमानं सनिर्वेदं दर्शं दर्शं स्वयमभुक्त्वा चापत्यशतमवो-
चदसंशयमस्मान् सर्वान् बुभुक्षया परिमृद्य काले यमसदनं प्रापयि-
तुकामेन दुर्बुद्धिना नरापसदेन योगनन्देनैवं केवलः सजलसक्तुश-
रावः प्रतिवासरं वारमेकं दीयते भोः पुत्रका येनैकोऽपि जीवन-
वृत्तिं कल्पयितुं किल न शक्नुयात् किं पुनर्वयं सर्वे तस्माद्युष्मासु
यो यो योगनन्दं प्रति वैरनिर्यातनं कदापि कर्तुं समर्थः स एकल

एव प्रतिदिवसमनेन सवारिणा भक्ष्येण कृच्छ्रवृत्तिमपि कल्पयत्विति। अत्यन्तपितृभक्तास्ते शत्रुप्रतिक्रियातृपिताः प्रत्यूचुर्न कोऽप्यस्मासु रिपुं प्रतिकर्तुं शक्त उत्साहसंपन्नोऽस्ति पितस्त्वमेव द्विषंतपोऽस्मच्छत्रुप्रतीकारे प्रभविष्णुर्भुंक्ष्व सक्तून् वारिणा सहेति। यथात्मजाः सर्वेऽसहनोयक्षुत्पिपासार्दिता अनशनतनूकृततनुस्काः प्राणोत्क्रमणयातनाभिः परिमरीमृद्यमाना निपेतुस्तथा सततमात्मनः संपदं लिप्सुना वेतसीं वृत्तिमाश्रित्य प्रभूणां मनोजिघ्रेण भवितव्यं परं न जातुचिदपि तेषु चापल्यदोलायमानहृदयेषु प्रभविष्णुषु विश्वासः कर्तव्य इति सशोकं विचारयाम्बभूव। एवंकारं कालेन प्रत्यग्रीकृतवैरनिर्यातननिश्चयस्य प्रदीप्तक्रोधाग्निपरिदन्दह्यमानसर्वांगस्य युगपदपत्यरत्नशतविनाशतीव्रव्यथाविदेदीर्यमाणहृन्मर्मणो निर्दयं दैवहतकमाचोक्रुश्यमानस्य पितुः पश्यतस्तत्र तदीयाः सुताः सर्वे पञ्चतां जग्मुः। अत्रान्तरेऽनुत्तमां राष्ट्रसंपदमात्मीकृत्यार्कितोत्पन्नाभिनवलक्ष्मीमदमत्तो विषयासक्तमना योगनन्दो विस्मृतनिजसहजधर्मः सन् राज्योत्कर्षहेतुकं प्रजायोगक्षेमसाधनं राष्ट्रधुरोद्वहनं सर्वथोपेक्ष्य मृगयामन्मथक्रीडादिषु निन्द्येषु व्यसनेषु रतिं दुर्वारां बबन्ध। ततो व्याडिरपि सम्यक्समर्पितगुरुदक्षिणः संसारे क्लेशावहे वैराग्यं गच्छन् राजानमुपेत्य सोऽहमद्यप्रभृति यत्रसायंगृहोऽतिवर्णाश्रमी भूत्वा कैवल्यसाधनाय यत्रकुत्रापि तपस्तप्तुं साधयामि हे राजन् त्वां वररुचिसखमापृच्छे राज्यधुरंधरस्य तेऽस्तु शिवं शाश्वतिकमिति। श्रुत्वा तन्मित्रविश्लेषदुःखितो योग-

स्माभिरदर्शि तं चावलोक्य किमेतदिति कौतूहलाविष्टमनसा शकटालेन पृष्टोऽहं तमकुतःसंभवं हस्तं सपदि निजांगुलीद्वयप्रदर्शनेन तिरोधाप्य पञ्च दूरे तावदासतां द्वावप्येकमत्यस्थौ वलीयसापि न भेद्यौ भवत इत्यवादिषम्। तस्मिन् क्षणे मे रहस्यविज्ञानेन विस्मितेन नृपेण भूयोऽपि पृष्टः प्रत्यवोचं यदसौ करः पंचांगुलीः संदर्शयन् संगतैः पंचभिः किं दुष्करमिति रहोऽसूचत्, मयापि स्वकीयांगुलीद्वयप्रदर्शनेन संहताभ्यां द्वाभ्यामपीह जगति किमसाध्यमिति गूढं व्यंजितत्वादसौ तिरोभूतः। दुर्धर्षं मे प्रज्ञाप्रभावं दृष्ट्वा शकटाले मनसि निषीदति सर्वेऽन्ये योगनन्दपुरस्सरा अतिविस्मितमानसा भृशं समतुषन्। सत्यनन्दविग्रहावसथनिवासिनि विषयासक्तिविस्मृतब्रह्मण्यवृत्तौ ब्रह्मबन्धाविन्द्रदत्तेऽमर्षेर्ष्याविशीकृतचेतसि केवलमाखेटमधुपानानङ्गक्रीडादिषु विषयसंभोगेषु सततं कालं मिथ्या यापयति समीरणा अपि तदीयासूयाकोपभयोद्वेजिता इवेर्ष्याकुटिलीकृतमनसः क्रोधालोस्तस्यान्तःपुरे किल न वबुः। अथैकदासौ कोपनोऽसूयकः प्रांशुप्रासादपृष्टगतो नक्षत्रयोगप्रश्ने देव्या सह संभाषणं कुर्वाणं द्विजन्मानं कार्तान्तिकमवलोक्यैव दुर्वाररोषेद्धमनाः सरीसृपकुटिलभ्रूकुटीविकृतवदन ईर्ष्यालुः प्रदीप्तामर्षेर्ष्याग्रस्तविवेकः सन् योगनन्दस्तस्य मौहूर्तिकस्य विशसनं निर्विचारमादिदेश। विकटाक्षान्तिरोषविषविमूढचेतसा ब्राह्मणब्रुवेण भूभुजा समादिष्टैः प्राड्विवाकपुरस्सरैरुग्ररूपैर्राजभृत्यैर्वध्यभुवं नेनीयमाने तस्मिन् वराके विक्रयार्थमापणे स्थापितो मत्स्य

उत्क्रान्तप्राणोऽपि सहसाट्टहासं चकार येन विस्मयातिशयं गतास्ते दण्डवासिकादयः प्रतिनिवृत्य राज्ञे मत्स्याट्टहसितमत्यद्भुतं सत्वरं न्यवीविदन्। क्षणान्तरे शङ्काविष्टेन नृपेण मीनहासकारणं पृष्टेष्वपि तदभिप्रायाज्ञानात् केवलमाश्चर्यविस्मापितमनःसु शकटालप्रमुखेषु राजवल्लभेषु मूकीभूतेषु मुहूर्तं विचारयन्, राजन् विप्रस्य विषूदनक्रौर्यं तावदधुना निषिध्यतां यावच्छ्वः प्रभाते युष्माकं पुरतो मीनाट्टहासहेतुर्मया व्यक्तीकरिष्यत इत्युक्त्वा संशितात्मा भक्तिनम्रोऽहं बहिर्गत्वा वरदां भागीरथीं तदप्राक्षम्। पृष्टा सा भीष्मसूर्मामभ्यभाषिष्ट रात्रावद्य निकटवर्तिन उत्कटतालभूरुहस्य पृष्टगस्त्वं तद्रहस्यमाकर्णयिष्यसीति। अर्धरात्रे तत्र विकटतालवृक्षपृष्ठच्छन्नशरीरोऽहं करालाकृतिं स्वैररात्रिचरीं प्रतिभयविदारितास्यां कृतान्तस्वसारमिवोर्ध्वकेशीं प्रज्वलितभीषणाक्षीं शूकरदंष्ट्रादन्तुरां तद्वद्घोररूपानेकराक्षसपुत्रानुगतां राक्षसीमद्राक्षं क्षणान्तरे चाश्रौषं हे मातर्बुभुक्षिताः स्मः किंचिदशनं देहि भोजनं देहि रे रे पुत्रकाः कालं कंचिद्युष्माभिः प्रतीक्ष्यतां योऽद्य राजादेशाज्जिघांसितोऽपि मन्त्रिणो वररुचेर्वचसा दिवसमेकं परिरक्षितस्तस्यैव ब्राह्मणस्य प्रातर्हनिष्यमाणस्य षण्मासतृप्तिदायीनि रुचिराणि मांसशकलानि वो दास्यामि मा स्म शोचिष्ट मातः कस्मात् सोऽद्य न हतोऽयि बालकास्तिमिपरिहासहेतोर्हे अम्ब केन कारणेन तिमिना हसितं वत्साः शृणुताकालेर्ष्याकोपविमोहितचेतोवृत्तिर्ब्रह्मबन्धुरसौ देवानांप्रियो राजा सहस्रचारचक्षु-

रपि भूत्वा परपुरुषदूषितं स्वीयमवरोधजनमविदित्वा निष्किल्विषं ज्योतिषिकं जिघाँसति, पश्यत, स्वान्तःपुरे सदा सौविदल्लैर्वर्षवरैर्बहुभिः सुगोपितेऽपि योषिद्रूपिणो राजललनानां वृषस्यन्तीनां वल्लभास्तरुणा गूढं संचरन्त्येवमवरोधस्थस्त्रीरूपधारिपुरुषसमवायवर्जं कथमिव मूर्खेनानपराधो द्विजो निर्दयं विशस्यत इति तस्य राज्ञो मूढचेष्टितमुद्दिश्य निर्जीवेनापि मत्स्येन सहाहाकारं तारं हसितमिति तस्या रजनीचर्या राक्षसबालकानां च मध्ये संवृत्तं संभाषणम् । श्रूत्वातिप्रहृष्टेन मया प्रभाते योगनन्दस्यान्तिकमुपेत्य भो राजन् दैवज्ञमनपराधिनं प्रति निष्कारणं क्रोधं मा भाक्षीस्त्वदङ्गनाः सर्वाः परपुरुषविप्लुताः सुरक्षिते शुद्धन्ते स्त्रीवेषधारिणोऽनिशं देवीभो रममाणा युवानः सुखमासत इति विबोधितमत्स्यहासयाथातथ्यो योगनन्दः किमपि लज्जित इव ध्यात्वा तान् सर्वानजातश्मश्रून् योषिद्रूपान् सवेणावरोधजनेन साः तीक्ष्णेन दण्डपातेन दण्डयाम्बभूव ।

(५) वररुचिशापमुक्तिकथा

ततः कदाचित् कार्याकार्यविवेकिनि सततोत्पथप्रतिपन्ने पापात्मनि महीक्षिति सार्वजनिकसभामण्डपगते तदनुमत्या कृतप्रवेशश्चित्रविद्यापारदृश्वा निसर्गसुभगप्रतिभावर्णनातिनिपुणहस्तकौशल्यशाली कश्चिच्चित्रकारकुञ्जरो वल्लभाद्वितीयस्य तस्य प्रतिमां निर्मले दर्पणतले प्रतिबिम्बितां छायामिव तत्त्वतः सादृश्यगुणान्वितां चित्रपटे निर्ममे। अथैकदाद्भुतचित्रार्पितां वाग्व्यापारविनाकृतामपि सजीवामिव भ्रान्तिकरीं जायासखस्य क्ष्माभृतः प्रतिमापटे नवीनावरोधवासगृहभित्तिन्यस्ते परिपूर्णलक्षणसाम्यगुणसमुपेतां तस्याकृतिं निर्दोषामवलोक्य रूपसौन्दर्यादिसमस्तगुणसंवादिनीमपीषन्यूनां महिष्याः प्रतिच्छायां वीतकलङ्कां पौर्णमासीमिन्दुकलामिव निरीक्ष्यमाणां दर्शं दर्शं सूक्ष्मदेहावयवलक्षणान्तरोहापोहानुमानतोऽसंपूर्णलक्षणं मामन्यमानोऽहं नैसर्गिकक्षेमुषीपारवश्यात्तस्या गोप्यस्थाने मयादृष्टपूर्वमपि तिलकरूपं लाञ्छनं न्यवीविशं ततश्च शशलाञ्छनेन परिपूर्णप्रकृतिशोभं कुमुदबान्धवबिम्बमिव तेनैव तिलकचिह्नेन निष्पादितसंपूर्णलावण्यलक्षणानुगतं देव्याः प्रतिबिम्बं विस्तरशः संपरीक्ष्य योगनन्द ईर्ष्यामर्षोपहतचित्तिजः केनेदमनन्यविदितं

लक्षणमस्या गुह्यप्रदेशे स्फुटं निवेशितमित्यतिवेलं चुक्रोध तत्संनिकर्षवर्तिना षण्डसौविदल्लेन देव तिलकलक्ष्मेदमायुष्मतो देवस्य महामन्त्रिणा वररुचिना स्वयमलेखीति विज्ञप्ते यदिदं तस्याः सहजं गुह्यदेशोपकण्ठवर्ति तिलकलक्षणं मदन्यो न कोऽपि जानीते न केनापि साक्षात्कृतपूर्वं तद् वररुचिः कथमिव वेत्ति कथंकारमेतत्तस्य ज्ञानगोचरे निपतितं नूनमनेन मदीयावरोधस्त्रीजन उपांशु संदूषितः स्यादेतस्मात् प्रच्छन्नान्तःपुरसंचारिणा परकलत्राभिगमनशीलेन निकृष्टपारदारिकेण योषिद्रूपिण आत्मानुरूपास्ते परदारिणोऽपि सुविदितपूर्वा असंशयं दुर्दमनेर्ष्यावशान्मे निग्रहार्थं प्रकटीकृता भवेयुरिति मिथ्या परामृश्य सर्पिषा प्रज्वलितज्वालाजिह्वो हुतभुगिव सासूयेनोद्दामेन प्रकोपेण परमतो जाज्वल्यमानोऽसौ मेदिनीभर्ता योगनन्दो झगिति मन्त्रिणं शकटालं समाहूय देवीतल्पगो दुरात्मा कात्यायनोऽविलम्बितमेव विशस्यतामिति सभ्रूभङ्गजर्जरिताननं तीव्रकुलिशाघातनिर्घोषवदुच्चैस्तरामाचुक्रोश। इति करालाशनिसंपातसंनिभं दुर्ललितं निर्विचारं दारुणवाक्प्रतोदं साकम्पं निशम्य शकटालो यथायुष्मान् देव आज्ञापयसि तथाज्ञाविधेयेन भृत्येनानेन द्रुतं करिष्यत इति निगद्य निर्ययौ कथं नाम ममोपकारी सुहृद्वरः श्रुतधरो निष्करुणेन कृतघ्नेन मया हनिष्यते योऽसह्यपीडापत्स्थं पापात्मना नरापसदेन कपटनन्देनापमानितं मां निर्वेदनैराश्यान्धतामिस्रावगुण्ठितालोकाद् रौद्रनरककुण्डसंकाशात् तस्मादन्धकूपात् समुददीधरद्, यद्यपि वररुचिवधे मे

सामर्थ्यमभविष्यत्तथापि तं मदीयपरमाश्रयभूतं मामकीनायुष्प्रदं नाहनिष्यं किं पुनरतिमानुषप्रतिभाशक्तिमन्तं सद्योऽपकारिणं विध्वंसयितुं समर्थं हन्तुं शक्नुयां परन्त्वल्पबुद्धिना मया निस्त्रिंशस्य नृपाधमस्य वचोऽङ्गीकृतमत्र किं कुर्यामथवा कृतं विचिकित्सयेत्येवं च सुतरां परामृश्य द्रुततरगतिर्गृहस्थितं मामुपसृत्य मन्निषूदनोदकं राज्ञोऽमर्षहेतुं निवेद्य स्पष्टवागुच्चारणपुरस्सरं व्याहार्षीन्निर्मर्यादेर्ष्यारोषविषानलान्धीभूतबुद्धिना भूपालाधमेन सर्वलोकपरिजुगुप्सिताचारेण योगनन्देन निजप्रमदाप्रतिमागुह्यप्रदेशे लक्ष्मकारिणस्तव निवर्हणे निष्कृपमादिष्टेऽपि कथमिवोपकारिणस्तेऽपचारीवापकुर्वीय कथं वा परित्रातारं त्वां वै सर्वान्तकस्यान्तकस्य हस्ते निस्त्रपो नरकीट इव परित्यजेयं लोकपरीवादाय किंप्रभुविडम्बनाय च महापातकिनं कमपि त्वत्स्थाने पुरा निषूदयाम्यतो निश्चितेन त्वया मदीयावसथे विहितवसतिना कंचन कालं निभृतमेव स्थीयतां किं न पश्यसि, कुमन्त्रकुवृत्तिकलङ्कितमनोदर्पणः कुशीलो नृपहतको निर्विचारः पतंग इव वह्निमुखे दुर्नयवागुरायां स्वयं निपतन् निःसंशयं विनाशमेष्यति, यथावकाशपाङ्गुण्यप्रयोगकुशलसुशिक्षितमन्त्रिविवर्जिता राज्यलक्ष्मीः कर्णधारणकोविदकर्णधारविहीना नौरिवाकूपारे समुद्रे कथं न विप्लवेत त्वया सुनीतिज्ञेन विनाकृतोऽयं योगनन्दोऽपि तादृगवस्थां दुर्गतिं नूनं गमिष्यति नन्वनुश्रूयतेऽविचारकारिणं आदित्यवर्मनाम्नो भूभर्तुरुदाहरणमपीति तदनन्तरं च स्ववासगृहे सुरक्षितं सुखोषितं

मां विधाय कृतागसं मलिम्लुचं निहत्य चायुष्मन् देवाज्ञाया अनुल्लङ्घनीयत्वाद् राज्यनौकाकर्णधारो वररुचिः सांप्रतं न्यसूद्यतेति कुनृपाय मृषा न्यवीविदत् । अथ क्षणान्तरे राष्ट्रधुरंधरः श्रुतधरो महौजा उदारधीर्नरेश्वरापवादेन यज्ञपशुमारं मारित इति समन्ततो वितेस्तीर्यमाणे ग्रैष्मिकदावाग्नाविव लोकप्रवादे सर्वतोऽञ्जसा कर्णकर्णि शोश्रूयमाणे निरन्तरपरहितनिरतोऽस्मन्निष्कारणबन्धुः किमर्थं निहतस्तेन सजीवेनाद्यपूर्वं सनाथा वयं खल्वभूमाद्यप्रभृति तु राष्ट्रधुर्यग्रेसरेण महामात्यपुंगवेन विनाकृता अनाथीभूताः परं योऽकारणप्रकोपविमूढचेता राज्यनौनाविकोत्तमं वररुचिं विनाशपारावारे सहेलं न्यममज्जत् सोऽपि नचिरात्तत्रैव ध्रुवं निमंक्षति, हा शांतं पापं शान्तं पापं तथाभूतस्य करुणानिधेर्बुद्धिमतां वरस्य पुण्यश्लोकस्य महामन्त्रिणः क्रूरनिस्तर्हणमयशस्करं किमिति तत्कर्तुर्नरकवासाय न कल्पत इति तत्रत्याः सर्वे पौरजानपदा अतर्कितशतकोटिनिर्घातोन्मूलिता भूरुहा इव भुवि निपत्य भृशमभिशुशुचुः । तस्यामेव निशीथिन्यां तद्वेश्मनि रहः कृतस्थितिरहं मम कृतेन राजातिसंधानोपायं तस्करमारणेन प्रयुज्य मां परित्रातवन्तं तं शकटालं प्रीतिपूर्वकमवादिषं हे सखे कृतज्ञोऽस्मि तवोपकारेण ननु पूर्वोपकारिणो मे त्वमपि बुद्धि-पूर्वं युक्तित उपाकार्षीर्यतो दुरात्मनः कामवशंवदस्य राज्ञो दुश्शासनं शासनं सुष्ठु न्यक्कृत्य मम विशसनं न्यवीवरो येनाद्यप्रभृति मे विश्रम्भपात्रं जगतीह सुदुर्लभं मित्रं संभूतोऽसि,

विश्वासभाजनीभूते त्वयि किमित्यात्मनो रहस्यं न प्रकटीकरोमि देहि कर्णं ब्रुवाणस्य मे वाक्येऽति बलिष्ठं मेऽपरं मित्रं सर्वलोकचमत्कारक्षमं यदीयेन सर्वजीवान्तककल्पेन सर्वंकषेण वीर्येण कोऽपि मदीयान् प्राणवायून् निर्वापयितुं न खलु शक्नोतीति श्रुत्वा मद्वचो दरविस्मितमनसि शकटाले कोऽसौ ते सुहृत् कुत्रत्यः किंनामा किंव्यापारः कथंवीर्यः कीदृग्रूप इति मामनुयुञ्जाने स्मृतमात्रप्रादुर्भूतं दरतिमिरघोरं महाकालकायं प्रदीप्तविद्युन्नेत्रभीषणमूर्ध्वकेशवितताऽस्यकुहरं रौद्राकृतिं क्रव्यादं कौणपं तस्मै चकितचकिताय प्रादीदृशम् । तद्दर्शनादतीवोद्विग्नवित्रस्तः शकटालो मदिच्छानुसारेण तस्मिन् कुणपभोजने रक्षसि झटिति तिरोहितेऽतिविस्मयकौतूहलाविष्टमना मामप्राक्षीत् कथं सोऽसौ महाकाल इव महारौद्रो राक्षसस्तव मित्रेण परिणत इत्येवं तेनानुयुक्तोऽहं प्रत्यभाषिषि यदि मनसि ते विविदिषा श्रूयतां यदा सपुत्रशतस्त्वं नरकयातनामिवातिदुस्सहां व्यथामनुभवन् निरयकुण्डतुल्येंऽन्धकूपे संदानितोभूस्तदा प्रतिरात्रं पुराध्यक्षो नगरपरिरक्षणार्थं परिबंभ्रम्यमाण एकैकशः केनापि कारणेन विलयं ययौ प्रवृत्तिमीदृशीमद्भुतामुपलभ्य योगनन्द एकदा मां पुराध्यक्षपदेऽध्यतिष्ठपत् ततोऽर्धरात्रेऽहमकुतोभयो निशितचन्द्रहासद्वितीयो नीरन्ध्रतमोमुषितालोकायां पुरीतस्ततः परिचञ्चूर्यमाणो नरामिषजिघृक्षयाटाट्यमानं महाघोराकारं रक्षोऽवालोकिषि तस्मिन्नेव क्षणे सोऽपि पिशितप्रियो राक्षसो मां निरीक्ष्य सहसा गलेग्राहं गृहीत्वा प्रति-

व्यतीतौ तथापि कथमिव भ्रूणसंभवोऽस्यामिति । श्रुत्वा तस्य संदेहवचस्ते प्रतिवभाषिरे पुंसां प्रवेशस्य सर्वथा निषिद्धत्वादत्र न कोऽपि प्रवेष्टुं शक्नोति महामात्यं शिववर्माणं वर्जयित्वेति । मन्येऽमुना परकलत्राभिगामिना विदूषितशीला स्वैरिणी संगता स्यादिति शिववर्माणमाशङ्कमानो राजादित्यवर्मा प्रकाशवधेऽपवादः संजायेतात एव तस्योपांशुवध एवानिष्टलोकपरीवादपरिहाराय प्राप्तरूप इति विमृश्य किमपि कार्यं व्यपदिश्य निजसख्युर्भोगवर्मसंज्ञस्यानुजीविसामन्तस्याभ्यर्णं तं प्रेष्य तदनुपदमेव तस्य निगूढनिषूदनसंदेशहरं दूतं तत्र रहसि विससर्ज । अथ संप्राप्य भोगवर्मणः सन्निकर्षं किमपि संदिग्धचेता मतिमतां वरः शिववर्मा ध्यात्वा प्रच्छन्नसंदेशहरानीतलेखनिर्दिष्टमात्मनो निर्ग्रन्थनं बुद्ध्वा च सामन्तं निर्भयमुवाद हे राजन् क्षिप्रं जहि मां सततभर्तृकल्याणैषिणमन्यथा स्वहस्तेनात्मानं हन्मि यत्र जनपदेऽन्येन बलात्कारेण पञ्चतां प्रापितो भवेयं चेत् तत्र प्रजानां सर्वासां क्षुत्पिपासाजननी दारुणानावृष्टिः संपद्येतेति । श्रावं श्रावं तद्वाक्यं मुहुरुदीरितं भोगवर्मा मन्त्रिभिः संमन्त्र्य तं महामतिं पुनर्निजनगरीमजीगमत् तत्रान्तरे चान्तःपुरे नारीवेषधारिणं स्वैरिण्याः प्रच्छन्नोपपतिं विदित्वा तया पांसुलया गर्भिण्या साकं तं पापं जारं यथावन्निगृह्य सदाचारभूषणस्य राज्यभारधुरीणानां पुरोगस्य शिववर्मण उपांशुदण्डाय विसर्जनेन मूर्खेन क्षुद्रबुद्धिना मया प्रवाहेमूत्रितमेवेत्यनुतापसंतप्तान्तःकरण आदित्यवर्मा विप्रतीसारेण

दु:खितो बभूवेति तस्येतिवृत्तकथनावसाने शकटालो मामवादीदादित्यवर्मवद् योगनन्दोऽपि ध्रुवमचिरेण तव विशुद्धिमवगमिष्यति तावन्निश्चितेन वीतमन्युज्वरेण त्वया समयं कंचिन्ममावसथे प्रच्छन्नरूपेण यथासुखमुष्यतामन्यच्च मनसि मे कौतुकं विद्यते कथ्यतां पूर्वमस्माभिर्मध्येगङ्गमंगुलीपञ्चकं पिशुनयन्तं यः करः साक्षात्कृतः स कस्येति । इति श्रुत्वाहं तस्मै कौतूहलाश्चर्यस्फीतमनसे वत्सवत्सलां मातरमिव मयि भक्तिप्रणते स्निह्यन्तीं दिव्ययोषिद्वपुष्मतीं पीयूषधाराप्रतीकाशदृष्टिपातप्रसादं वर्षन्तीं मदीयनिदिध्यासनात् साक्षादाविर्भूतां भागीरथीमदीदृशम् । अथ कालक्रमेण योगनन्दस्य तनूद्भवो हरिगुप्तो मृगयाविहारी मृगव्यवशाद् गहने कान्तारे मनोजवतुरङ्गमारूढः कृष्णसारादिभिर्विविधवन्यचतुष्पाद्भिराचरीकृष्यमाणः सुदूरं प्रययौ ततश्च दैवदुर्विपाकाद्विनष्टमार्गो यथागतं निर्यातुकाम इतस्ततो निर्गमनमार्गं गवेषयन् दुर्गमे गहने परिबभ्राम । एवंकारं समीरणवेगेन वाजिना पर्युह्यमाणस्य राजपुत्रस्य सुमहति कालेऽतिक्रान्ते प्रदोषः समवर्तिष्ट । गत्यन्तराभावात् तत्रैव वने त्रियामपरिमितामपि यामशतायमानां त्रियामां कथंचित् क्षपयितुं हिंसारुजिहीर्षया प्रांशुतमालवृक्षमारुह्य निभृतमासीने क्रूरमृगेश्वरभीषितो भल्लूकस्तमेव भूरुहं द्रुतं समारुह्य वित्रस्तं राजसूनुं व्याजहार मा भैषीः सखे घातकेन रौद्रकण्ठीरवेणाभिद्रुतोऽहं त्वमिवास्मिञ्शाखिनि गृहीतशरणोऽस्म्यभयं ते ददामि पश्य तरुमूलेऽधस्तादायातोऽयं पिशिताशन ऊर्ध्वकेसर-

सटकृतभीषणशिरोवेष्टन आकर्णविदारितविकटास्यदर्शितनिशात-
दंष्ट्रः केसरी निशितकुठारैरिवातितीक्ष्णैर्नखरैरिमं महीरुहं ताडयन्
प्रदीप्तज्वालानिभैश्चण्डलोचनरश्मिभिरन्वतमसमून्मूलयन्निव कठो-
रभिदुरनिर्घातनिर्घोषेणैव कण्ठरवेण नैशशान्तिं संक्षोभयन्नास्ते
त्रियामायाः पूर्वार्धं स्वपिहि मयातन्द्रितेन पायमानस्ततः क्रमेणा-
परार्धं निद्रामि प्रबुद्धेन त्वया परिपाल्यमान इति। तथा कुर्व इति
प्रतिश्रुत्य मिथःसमयाद्राजपुत्रे निद्रां भजमाने भो भोः सखेऽच्छ-
भल्ल मन्ये निद्रितोऽयं मनुजो मदर्थेऽयः प्रक्षिप्यतामेनं रुचिरमां-
समांसलमुदरपूरं भुक्त्वा तृप्तोऽन्यतो गमिष्यामीति बुभुक्षितेन
मृगरिपुणा सिंहेनाभ्यर्थितेऽरेऽरे कण्ठीरव त्वं समस्तवनेचरावी-
श्वरोऽपि भूत्वा सत्त्वसंपन्नोऽपि निःसत्त्व इव वीर्यवानपि निर्वीय
इव कथं नाम प्रसुप्तं कूटनीत्या जिघांससि रे रे कण्ठीरव तव
श्रवणकटुः कण्ठीरवो मेघनाद इव श्रूयमाणोऽपि सत्त्वोत्साह-
विहीन ऋजुहृदयानां मृगाणां विभीषिकैव भवति नाहं परस्पर-
संविदा मित्रीभूतं सुखसुप्तमिमं परित्यजामि शृणु सुहृद्भेदिनो-
ऽहंयोः कल्मषं जन्मशततपश्चर्ययापि न परिमृज्यते खलु हे
पञ्चास्य नखरायुध न खलु न खलु पशुराजभूतेन त्वयारण्येरुदितं
कार्यमिति व्यक्तं व्याहृत्य सत्त्वसंपन्नः सरलहृदयो भल्लूको हरि-
गुप्ते सुप्तोत्थिते यथासमयं क्रमान्निद्रौ। भो मानव त्वं मित्रं
मेऽसि मत्सकाशादभयं संप्रति प्राप्नुहि विश्वस्तो भूत्वैनमृक्षमामिषं
मे देहीति पञ्चनखेनोक्ते तत्प्रसादनायात्मदेहरिरक्षिषया दुरात्मा

हरिगुप्तो विश्रब्धं सुखशयितं वीताशङ्कं तमृक्षमधो न्यपीपतत् । इत्थंकारमेकपदे मित्रद्रोहिणा तेन नराधमेन प्रक्षिप्तोऽपि सोऽच्छभल्लः सर्वेणात्मनो वीर्यबलेन रधिरोद्गारिभिर्नखरैर्वृक्षस्कन्धमवष्टभ्य मृत्युमुखोत्तीर्णो निर्लज्जाहङ्कारसंदूषितं राजपुत्रापसदं सरोषमभिशशाप दुरात्मन् मनुजराक्षस त्वमुन्मत्तो भव यदा कोऽपीमं मित्रद्रोहवृत्तान्तमुन्मदिष्णोस्ते पुरतः प्रकटयिष्यति तदा त्वं प्रकृतिस्थो भविष्यसीति शापावधिमपि प्रददौ । अथ सूर्योदये राजधानीमासाद्य हरिगुप्त उन्मादविकलो निष्प्रभः संजज्ञे तं च तथाभूतं हृदयशूलकल्पमात्मजं सनिर्वेदं दर्शं दर्शं पुत्रापदापन्नः किंकर्तव्यताविनष्टधीः किमपि सखेदं स्मारं स्मारं योगनन्द इति निजगाद यदि प्रकृष्टप्रज्ञाविभूतिसंपन्नो वररुचिरिदानीमजीविष्यद् युवराजस्योन्मादनिदानं सम्यग् ज्ञात्वा प्राप्तकालां प्रतिक्रियां निःसंशयमकरिष्यद्धन्त धिङ् मां नृशंसं महामतेः श्रुतधरस्य हन्तारं सर्वथा धिगस्तु मेऽधन्यस्य । अहो कृच्छ्रात् सन्निहितश्चिराभिलषितोऽयं कात्यायनप्रकाशनोचितोऽवसर इति मनसि कृत्वा शकटालो मे सुहृद्वरेण्यः प्रदत्ताभयं नरेश्वरमुवाच राजन् कृतं शोकेन प्रसीद ध्रियतेऽसौ प्राज्ञानामग्रणीर्महामन्त्री वररुचिरिति तत्क्षणं च प्रहृष्टमनसि योगनन्दे सहर्षं द्रुततरमयं मे पुत्रकस्तत्समीपं नीयतामित्युक्तवति तूर्णमेव हरिगुप्तं स्वगृहमानैषीत् । तं नयनविपये पतन्तमुद्वीक्ष्यैव युगपज्ज्ञातहरिगुप्तभल्लूककेसरिवृत्तान्तोऽहं तत्कथनेन भृशमुन्मत्तं तं चित्तभ्रमाद्विमुच्य

सद्योजातत्रपाविनम्राननमुद्दामपश्चात्तापाविष्टविह्वलचेतसं राजानं चिराद् द्रष्टुं शकटालहरिगुप्तकृतानुयात्रोऽयासिषम् । हे मे मनोहर्षयित्नो चिराद् दृष्टोऽसि ते स्वागतं किं कुशली भवान्, कथमृक्षशापं ज्ञातवानसीति तेन पृष्टे यथैव मया भट्टिन्या गृहप्रदेशे वर्तमानं तिलकलक्षणं ज्ञातं तथैव पितुः सदृशस्य मित्रद्रोहिणो भल्लूकाभिशापोऽपि स्वीयबुद्धितो विदित इति व्याहार्षम् । आकर्ण्य मद्वाक्यं सर्वजनगर्हितेन निजदौरात्म्येन सुतरां व्रीडित इवाधोमुखीभूय मदीयं शीलनैर्मल्यमभिज्ञाय हृदयंतुदेन विप्रतीसारेण दुर्मनायमान इव क्षणमवलम्बिततूष्णींभावो दीर्घं निःश्वस्य सपुत्रो महीक्षिदिति समुदैरिरद् यद् यन्मनोविकाररूपं हृदि मे निरन्तरं समुद्रतरङ्गवत् संजायते तत्तत् कथं ते निवेदयामि कथं वा लघुचेतसां त्वत्कर्तृकेण निर्ममेणोपकारेणातिवेलमनुगृहीतानां नः कृतज्ञतां प्रदर्शयामि दुर्निवारविवक्षाप्रेरितोऽपि वाग्व्यापारो मे कण्ठे केनापि मानसिकभावेन प्रतिरुध्यमानो निषीदतीव तस्माद् ब्रूहि किं ते प्रियं करवाणि समीहितं ते सर्वं समुपजोषमुपहरामि सखे । सत्कारेण किं समीहितार्थोपहारेणापि किं प्रयोजनं शैशवात्प्रभृति यथा व्याडिस्तथा त्वं मे बहुमतः सुहृदसि केवलं मित्रहितायैव मया प्रयतितं हे इन्द्रदत्त कच्चिदहमिवानुस्मरसि नः प्रथमसमागमं मद्गेहे कच्चित् पुनः स्मरसि पाटलिपुत्रे सब्रह्मचारिणामस्माकं सहवाससमयस्य, त्वं मे मित्रं बोधवीपि सोऽहमेवास्मि यं बहुभ्यो हायनेभ्यः प्राक् त्वं व्याडिद्वितीयः श्रुत-

धरान्वेषी बाल्येऽद्राक्षीः किं स त्वमसि यो मां बालकमादाय गुरु-सकाशं प्राप्तवान्, नेति चिन्तयामि संप्रत्यनुस्मर यन्निर्विकारेण मनसा त्वां राजानमपचारिणं ज्ञात्वापि सौहार्दान्न्यसेविषि कच्चित्त्वमपि मां सुहृद्दृष्ट्योपाचारीः, नैवमिति तर्कयामि किं बहुना साँप्रतं राज्यकार्येषु व्यपेतानुरागः संवृत्तोऽस्मि विध्वंसिता शाश्वतीः समा आवयोर्मैत्री सर्वं चावयोर्मध्ये कथाशेषीभूतमधुना साधयामि यथागतं स्वगृहं प्रति, राज्यविभवसंभोगसुखानि तेऽनारतं भूयासुरिति प्रस्तुत्य नृपेण योगनन्देन मुहुर्मुहू रुचिरसामशतैर्निवारितोऽप्यनादृत्य पाटलिपुत्रप्रयाणमार्गेऽस्थाम् । अथ कालेन पाटलिपुत्रं समासाद्य सुदीर्घकालाभिकांक्षितेन निर्व्याजप्रेमबहुमानपात्रीभूतेन स्वजनेन शून्यीकृतस्य जीवितप्रदेन वारिणा विवर्जितस्य मरुस्थलस्येव सुकुमारहृदयपुष्पशोषिणो जराजीर्णं पुराणायतनस्येव जर्जरिताकारस्य स्निग्धगृहस्यातिशयमनः प्रमाथिनीं वार्तामश्रौषम् । बन्धुजनविनाशशोकेन निर्मर्यादबाष्प-प्रवाहदुर्दिनायमानवदनो निःशब्दं रोरुद्यमानः श्वशुर उपवर्षो मां भुजान्तराले कृत्वा सदीर्घनिःश्वासमब्रवीन्नृपाधमेन योगनन्देन वररुचिर्निष्कारणं निषूदित इति किंवदन्तीषु दिक्षु सर्वासु विश्वतो वितेस्तीर्यमाणासु प्राणेभ्योऽपि गरीयसः पुत्ररत्नस्य निधनेन तत्क्षणस्फुटितहृदया ते जननी कथाशेषा संवृत्ता ते दयिता प्राणसमा भार्यापि स्वयं विरचितचिताधिरोहणं कृत्वा प्रदीप्यमाने हव्यवाहने हव्यमिवात्मानमजुहोदिति । तस्मिन्नेव क्षणे दुर्दमेन

शोकवेगेन मूर्च्छां गतोऽहं निशातदम्भोलिनिपातितोऽनोकह इव तीव्रकुलिशदारुणावृत्तान्तश्रवणेन भूतले सहसा पतितवान् हे काणभूते न जाने कालं कियन्तं मोहसागरे विनष्टचेतनो न्यमांक्षमिति यदाहं सुप्तप्रबुद्ध इव गाढमूर्च्छाकूपाराच्छनैः शनैश्चैतन्यं लब्ध्वा पुनरुदस्थां तदा भ्रातृभ्यां वर्षोपवर्षाभ्यां प्रयत्नतः समाशास्यमानमात्मानमद्राक्षं ततश्च जीवलोकेऽनित्ये सर्वं निमेषभंगुरं, यदि किमपि नित्यं शाश्वतिकं संसारे भवेत् तदनित्यत्वमेव ननु भवतीति विद्वानपि किमिति मूर्च्छसि कस्माच्छोचसीत्यादिभिः परमार्थगर्भितैः सान्त्वनावचोभिस्ताभ्यां तत्त्वार्थबोधं ग्राहितः कथं कथंचित् प्रकृतिं प्रत्यपद्ये । ततश्चाहं प्रियसुहृद्बान्धवविश्लेषव्यथाचोक्षुद्यमानकोमलान्तरंगसुमनसामनन्ततृष्णापरितापपरिशोशुष्यमानातृप्तेन्द्रियग्रामाणां दुर्विषहमोहकलिलशृंखलादृढबाध्यमानदुर्बलचरणानां शाश्वतानित्यताजालविमोमुह्यमानविवेकबुद्धीनां ममत्वमायाविसततातिसंदेधीयमानाकुटिलमनसां कृते द्वैतभावातीतपरमसंमोदसुधारसनिस्यन्दिनि शश्वत्परिवरीवृत्यमानसंसारचक्रच्छित्वरे निरालोकान्धतामिस्रनीकाशाविद्याहंमत्यपहप्रभास्वरज्ञानदीपदायिनि निःश्रेयससाधनमार्गेऽच्छिन्नसर्वकर्मबन्धनच्छिदि संन्यासे धृतप्रत्याशः सकलदुश्छेद्यनिबन्धनमपहाय वीतरागद्वेषोऽतिवर्णाश्रमी भूत्वा विन्ध्याद्रिकृतवसतिं शंभुवल्लभां द्रष्टुं छायाद्वितीयः प्रव्रजितः कैवल्यगमनतोरणं चिराभीप्सितशिवसायुज्यप्राप्तिप्रकारं तपो मनसा समाहितेत तप्तुं विन्ध्य-

पर्वतस्थतपोवनं समाशिश्रियं ततश्च कालक्रमेण कदाचित्तत्र यदृच्छयागताद् योगनन्दपुरोधसो वार्तासंश्रवणकौतूहलाकृष्टो राजकुलोदन्तं विचित्रमश्रौषम् । शृणु मुने राजकुलविषादवृत्तान्तं यथावृत्तमिति कथामुखं प्रस्तुत्य स वक्तुमुपचक्रमेऽयि महानुभाव त्वयि राज्याधिकारं परित्यज्य निर्गते सुचिराल्लब्धरन्ध्रः शकटालो वैरशुद्धि चिकीर्षू राज्ञो योगनन्दस्य प्रतिघातनोपायं प्राप्तरूपमनारतमेव विचारयामास । अथैकदा कुशाग्रबुद्धिरसौ मार्गे गच्छन् निष्ठुरसूचि कुशं सरोषमुन्मूलयन्तं सभ्रूभङ्गभीषणाननं चाणक्यनामानं ब्राह्मणं निर्वर्ण्य सकौतुकमनुययुजे द्विजवर किं करोषीति, वैरशुद्धि करोमि तीक्ष्णदर्भसूचिविद्धचरणोऽहं दर्भहतकमिमं समुन्मूलयामीति तेनोक्ते दुर्वाससमिव क्रोधालुं परशुराममिव प्रमन्युं तं चाणक्यं योगनन्दनिर्वापनसाधनं मत्वा श्राद्धकर्मणि राजकुले निमन्त्रयांचक्रे ततश्च श्राद्धकर्मणि भूरिदक्षिणेऽनुष्ठीयमाने सततमुत्तमासनग्रहणयोग्यमाग्रभोजिकमपि राज्ञाधस्तनासने निवेशितं तं कोपनं सखेदमिव न्यगादीद् भो विप्राग्रेसर, अहो बत नृपेण ध्रुवमवहेलितोऽसीति । तद्गिरमाकर्ण्य सावहेलमधरपीठदानेन भूपतिना नितरां तिरस्कृतमात्मानं विबुध्य शुष्कया समिधा कृपीटयोनिरिव दुष्प्रधृष्येण मन्युना प्रज्वल्यमानश्चाणक्यो महाकोपः सपदि विमुक्तशिखः सन् सप्तभिरहोभिर्निःसंदेहमयमग्रजन्मापमानी नृपकीटो मया यमसदनं प्रापयिष्यते ततश्च प्रशान्तेन मयेयं शिखा भूयो भन्त्स्यत इति सुघोरं

शपथमकार्षीत् तत्समनन्तरं च निर्गत्य तस्य मृत्यूदकीं रहस्यकृत्यां व्यधात्। अमोघफलेन प्रबलेन तत्कृत्यासामर्थ्येन भृशमुपहतो योगनन्दो झंझावातेन भग्नस्तरुरिव दौर्भाग्यसन्ब्रह्मचारिणा पुत्रेण सह सप्तमेऽहनि परलोकयात्रामनिष्टामकरोत्। कथावशेषीकृते योगनन्दे बृहस्पतिसमानबुद्धिना शकटालसहितेन चाणक्येन विधिवदभिषिच्य सत्यनन्दस्य तनुजश्चन्द्रगुप्तो नाम महायशाः साम्राज्याधिशासने न्यवेशि ततश्चेत्थं निष्पादितनृपवैरप्रतीकारः शकटालोऽपि सफलीभूतमनोरथमशेषतश्चरितार्थमात्मानं मन्वानस्त्वमिव संसारेऽसारे विरक्तधीस्तपसे क्वापि तपोवनं जगामेति। एवं दुरतिक्रमभववीचिमालिवीचिमालासंक्षोभितनिर्बलमर्त्यधर्मामर्त्यधर्मशंसिनीं कृपणां राजकुलप्रवृत्तिं पुरोहितमुखादनुश्रुत्य परिखिन्नचेता नित्यानित्याविर्भावतिरोभावभवाभवादिद्वन्द्वलहरीहरीं देवदेवदेवीं देवीं कात्यायनीमाराद्धुमित आगत्य जन्मान्तरशापमुक्तिहेतुकेन शरणार्थिसार्थशरण्याया भक्तवत्सलायास्तस्या निर्भरप्रसादामृतनिर्झरेण चिरन्तनशापमोक्षद्वारं त्वां ददृशिवाञ्जातिस्मरो भूत्वाहं शंभुनास्मत्प्रभुना प्रथमं समुदीरितां बृहत्कथामात्मन ऐहलौकिकेन जन्मवृत्तान्तेन साकं ते कथितवान्, भोः काणभूते भद्रं ते भूयात् क्षीणशापबन्धनः परिक्लेशमूलकमचिरस्थायिनं निष्करुणेन संसारचक्रेण वस्तुत आजन्ममरणपर्यन्तं संपेपीड्यमानं दग्धमर्त्यविग्रहमिमं समुज्झ्य परमानन्दथुमयमस्मत्प्रभुपिनाकिसालोक्यमधुनैव प्राप्नोमि हे शापसन्ब्रह्मचारिन् त्वमपि

मे जन्मान्तरसुहृदा माल्यवन्नामान्तरेण सर्वविपश्चित्पुरोगेण गुणाढ्येन संगत्य मुक्तकुवेराभिशापो धनदानुचरपदवीं पुनर्लप्स्यस इति काणभूतिमभिभाष्याचिरभाविशिवपार्वतीपुनर्दर्शनप्रत्याशा-प्रमुदितान्तरात्मा महर्षिभिस्तत्त्वज्ञानमोक्षनिःश्रेयससंवादं विधाय परमार्थज्ञानप्रवाहक्षालितरजःसंचयः संवत्सरेभ्यो वहुभ्यो वहुभ्यः पिनाकिवल्लभायाः शापजालाद्विमुक्तः पुष्पदन्तो गणकुञ्जरो गम्भीरजलदसंदोहाद्विनिर्गतोऽमृतदीधितिरिव शिवलोके विर-राजेति।

शपथमकार्षीत् तत्समनन्तरं च निर्गत्य तस्य मृत्यूदर्कां रहस्यकृत्यां व्यधात्। अमोघफलेन प्रबलेन तत्कृत्यासामर्थ्येन भृशमुपहतो योगनन्दो झंझावातेन भग्नस्तरुरिव दौर्भाग्यसब्रह्मचारिणा पुत्रेण सह सप्तमेऽहनि परलोकयात्रामनिष्टामकरोत्। कथावशेषीकृते योगनन्दे बृहस्पतिसमानबुद्धिना शकटालसहितेन चाणक्येन विधिवदभिषिच्य सत्यनन्दस्य तनुजश्चन्द्रगुप्तो नाम महायशाः साम्राज्याधिशासने न्यवेशि ततश्चेत्थं निष्पादितनृपवैरप्रतीकारः शकटालोऽपि सफलीभूतमनोरथमशेषतश्चरितार्थमात्मानं मन्वानस्त्वमिव संसारेऽसारे विरक्तधीस्तपसे क्वापि तपोवनं जगामेति। एवं दुरतिक्रमभववीचिमालिवीचिमालासंक्षोभितनिर्बलमर्त्यधर्मामर्त्यधर्मशंसिनीं कृपणां राजकुलप्रवृत्तिं पुरोहितमुखादनुश्रुत्य परिखिन्नचेता नित्यानित्याविर्भावतिरोभावभवाभवादिद्वन्द्वलहरीहरीं देवदेवदेवीं देवीं कात्यायनीमाराद्धुमित आगत्य जन्मान्तरशापमुक्तिहेतुकेन शरणार्थिसार्थशरण्याया भक्तवत्सलायास्तस्या निर्भरप्रसादामृतनिर्झरेण चिरन्तनशापमोक्षद्वारं त्वां ददृशिवाञ्जातिस्मरो भूत्वाहं शंभुनास्मत्प्रभुना प्रथमं समुदीरितां बृहत्कथामात्मन ऐहलौकिकेन जन्मवृत्तान्तेन साकं ते कथितवान्, भोः काणभूते भद्रं ते भूयात् क्षीणशापबन्धनः परिक्लेशमूलकमचिरस्थायिनं निष्करुणेन संसारचक्रेण वस्तुत आजन्ममरणपर्यन्तं संपेपीड्यमानं दग्धमर्त्यविग्रहमिमं समुज्झ्य परमानन्दथुमयमस्मत्प्रभुपिनाकिसालोक्यमधुनैव प्राप्नोमि हे शापसब्रह्मचारिन् त्वमपि

मे जन्मान्तरसुहृदा माल्यवन्नामान्तरेण सर्वविपश्चित्पुरोगेण गुणाढ्येन संगत्य मुक्तकुवेराभिशापो धनदानुचरपदवीं पुनर्लप्स्यस इति काणभूतिमभिभाष्याचिरभाविशिवपार्वतीपुनर्दर्शनप्रत्याशा-प्रमुदितान्तरात्मा महर्षिभिस्तत्त्वज्ञानमोक्षनिःश्रेयससंवादं विधाय परमार्थज्ञानप्रवाहक्षालितरजःसंचयः संवत्सरेभ्यो वहुभ्यो वहुभ्यः पिनाकिवल्लभायाः शापजालाद्विमुक्तः पुष्पदन्तो गणकुञ्जरो गम्भीरजलदसंदोहाद्विनिर्गतोऽमृतदीधितिरिव शिवलोके विर-राजेति ।

(६) गुणाढ्यकथा

सुधासारवर्षिकुमुदबान्धवार्धविम्वप्रसाधितमौलिकृशानुरेतः-समुदीरितरहस्यकथातस्करस्य पुष्पदन्ताभिधस्य सहचरस्य मर्त्य-लोकनिपतनाभिशापनिर्वापणाभ्यर्थनादोषाद् वराकेण तेन साधं जन्ममरणविवर्जितशाश्वतपरमानन्दथुमयात् सदाशिवशिवलोकादन-न्याकर्णितकथाचौर्यजामर्षरोहिताश्वप्रज्वलितरोहिताननया शांभ-ववह्निश्चरजीवितभूतया महीभृद्राजतुपाराद्रिदुहित्रा चण्डिकया सततपरिवरीवृत्यमानदुःखावहसंसारचक्रतिर्दयपेपिष्यमाणाशेषजीव-लोके जीवलोकेऽनारतजातनष्टडिण्डीरसरूपे सरोषमवपातितः पाशुपतपारिपदाग्रणीर्माल्यवान् मनुष्ययोनिगृहीतजनुर्गुणिनामग्रेस-रो गुणाढ्य इति यथार्थनाम मर्त्यविग्रहेण सुचिरनिषेवितशात-वाहनाह्वयमहीभर्तृसाचिव्योऽपि ततः संजातैहलौकिकजीवनयात्रा-वैराग्यः परिखिन्नमना विन्ध्यभूध्रविहितावसथभवानीदर्शनार्थं दक्षिणापथात् प्रव्रजितस्तस्याः पीयूषनिर्झरप्रतीकाशेन वचसा तत्रैव धराधरकान्तरे त्र्यम्बकसखस्य राजराजस्य शापेन विकृता-कृतिभीषणपिशाचभावं संप्रापितं काणभूतिनामानं निजाभिशाप-निर्मुक्तिहेतुं गुह्यकचरं दृग्गोचरे कृत्वा सहसा सुप्तप्रबुद्ध इव विरजीभूते मुकुरतल इव प्रसन्ने मनसि प्रतिविम्बितस्वजन्मान्त-

रचरितो जातिस्मरो भूत्वा दुर्निवारसंप्रमोदप्रफुल्लवदनोऽमरतटिनीपरिष्कृतभालपट्टरोचिष्णुविरूपाक्षसालोक्यशीघ्रप्रतियियासाजरी गृह्यमाणसर्वात्मा दत्त्वा परिचयमात्मनस्तं कारणभूतिं सौहार्दादियभ्भाषिष्ट भोः कारणभूते धनदानुचर वररुचिसंज्ञात् पुष्पदन्तान्मदीयपूर्वजन्मसुहृदोऽनुश्रुतां कैलासपर्वते यथासुखं विहरता प्रभुनास्मदीयेन खण्डपरशुना . दयितजायामनोविनोदायोपांशूदीरितपूर्वां बृहतीं दिव्यकथामविलम्बेन ब्रूहि यया शापाकूपारं नावा जलनिधिमिव पुरा समुत्तराव इति, तच्च निशम्य समासन्नकुवेरशापपर्यवसानसंवेदपुलकितवपुषा कृताञ्जलिना तेन कथयामि ते त्रैलोक्यविस्मापनीं दिव्यमानुषसंबद्धां महाकथां किन्तु भवन्मुखारविन्दसंदर्शनमात्रेणैव मनसि मे संजाजायते कौतूहलमुद्दामं यदि न गोप्यं महानुभाव जन्मवृतान्तसंकथनेन भवत्पादमूले प्रणतमिमं दासमनुगृह्णात्वत्रभवानिति सविनयं प्रार्थितोऽपुनःप्राप्यभूतकालानुस्मरणपारावारे दीर्घनिःश्वासपुरस्सरमात्मानं निमज्जयन्निव तत्क्षणं ध्यात्वात्मीयमाजन्मचरित्रमुपवर्णयितुमुपचक्रमे । इतो दक्षिणाहि सुदूरेऽनेकयोजनशतविप्रकृष्टे कस्मिंश्चिज्जनपदे दाक्षिणात्ये संबभूव सोमशर्मसमाख्यो दुष्प्रापविद्यासागरपारंगतविपश्चिद्वृन्दपुरोगः कोऽपि तत्रत्यद्विजकुलावतंसो यस्य नन्दनौ वत्सगुल्मनामानौ तथा नन्दिनी श्रुतार्था नाम संजज्ञिरे यस्य चाहं दुहितरि समुत्पन्नो दौहित्रोऽस्मि । अथ कालक्रमेण वस्तुतोऽनिष्टमपि मनसाप्यधृष्यं कालधर्मं प्रबलनियतिनियोगादुपगते भार्यासखे मम

मातामहे भ्रातरौ वत्सगुल्मौ भगिनीस्नेहरसार्द्रीभूतान्तरङ्गौ यथाभागशः स्वसारं परिपोषयन्तावासिषातां ततश्च गच्छत्यनिशं काले तरुणमनोमदयित्नुपुष्पधन्वसखागमेन संफुल्लसुमनोमञ्जरी वल्लरीवाक्लिष्टमुग्धचेतोहर्षयित्नुतारुण्यप्रादुर्भावेन प्रफुल्लस्निग्धवदनसरोरुहा पेशलकनककलशोपमकुचयुगलशोभिनी प्रत्यग्रयौवनारम्भारूढा पाणिपीडनयोग्यवयःस्थेयमवरजा भ्रात्रोस्तयोरनारतचिन्तास्पदं संववृते ततश्च कदाचिदनूढाप्यकस्मात् संपन्नगर्भोत्पत्तिः सा भ्रूणारोहणपरिधूसरालसाङ्गी श्रुतार्था पूर्वजयोर्मनसी निर्भरं संपीडयांबभूव । तस्या आकस्मिकगर्भाधानहेतोरेकत्र भृशदुःखितयोरपरत्र तत्र निवेशने पुरुषान्तराभावात् परस्परशंकाग्रस्तचेतसोः सोदरयोर्मनोजिघ्रा सा भगिनी दुर्भरव्रीडातिशयारुणितमुखी सगद्गदं ता अभिवभाषेऽयि सोदरौ पारस्परिकविचिकित्सामत्र मा स्म काष्टं मे पितृसमौ युवां, सूनृतं कथयाम्यस्ति दंदशूकाधीश्वरस्य वासुकेर्भ्रात्रीयः कीर्तिसेननामा युवा यः कस्मिंश्चन वासरे गोदावर्यां स्नान्तीं नवयौवनोद्यानपुष्पितमञ्जरीमक्लिष्टपरिपूर्णकान्तिं मां यदृच्छयोद्वीक्ष्य कुसुमायुधकुसुमबाणशरव्यतां सहसा गतो दुर्दमनमन्मथातुरो भूत्वा गान्धर्वविवाहविधिना पाणिं ममेच्छन्त्याः सानन्दमग्रहीत् ततश्चेयं तस्माद् द्विजनागकुमारान्मयि गर्भसंभूतिरिति । आकर्ण्य स्वसुरश्रद्धेयं तद्वचोऽन्योन्यस्य मुखं संदिग्धेन मनसा साकूतं दर्शं दर्शमित्यूचतुस्तौ, यथावृत्तं याथातथ्यं वद तण्डुरीणोऽपि कः प्रतारणार्थंगर्भमीदृशं ते वाक्यं प्रत्येति कथं नाम

मनुष्ययोनौ सरीसृपभ्रूणसंभवः संभाव्यते । अथ सा गत्यन्तराभावात् तयोरश्रद्दधानयोः सहजयोः संदेहमपनेतुं निश्चितमनाः प्रध्यातमात्राविर्भूतं फणियुवानं कीर्तिसेनं दर्शयति स्म । अदृश्यरूपः समीरण इव स्वदयितास्मरणमात्रादकाण्डोपगतः स प्रोज्ज्वलनरवपुष्मान् पन्नगराजकुमारः सपदि भोः श्यालौ सोऽहं समस्तभुजङ्गमाधिराजस्य वासुकेर्भ्रात्रेयो यवयोः प्रथमदर्शनेन सूतरां प्रीणितोऽस्मि युवां मे बहुमतौ श्यालौ विद्याधरचक्रवर्तिनः शापाद्भुवि निपातितौ विद्याधरौ स्थो युष्मत्स्वसेयमपि तच्छापवशान्मर्त्यलोकेऽत्र परिच्युता लोकसम्मतेन गान्धर्वपाणिपीडनसंस्कारेण मया व्यूढा प्रियभार्या वरीवर्ति, युवाभ्यामस्यां विचिकित्सापुरस्सरोऽन्यथाभावो न कर्हिचिदपि कर्तव्योऽचिरेणास्यां गौरीशापभ्रष्टो गणावतारो जगति गुणाढ्य इतिनाम्ना विख्यातयशा गुणवतां सर्वेषामग्रगामी शातवाहनराज्यधुरंधरः स्वसृसहितयोर्युवयोः शापप्रशमनद्वारं भागिनेय उत्पत्स्यतेऽधुना भद्रं वोऽस्तु सामकीनात्मजजन्मना युष्माकं विद्याधरधराचक्रवर्तिशापनिर्मुक्तिर्निःसंशयं भविष्यतीति तदनन्तरं चरणमूले प्रणिपतितां गढानुरक्तां प्राणेश्वरीमुल्बणप्रेमरसार्द्रितेन वक्षसा परिरभ्य वत्सगुल्मौ सप्रश्रयणमभिवाद्य चातर्कितमेव कुत्राप्यन्तर्दधे । तस्मिन् कीर्तिसेन तिरोहिते ततः कतिपयैर्दिवसैर्जननी मे मामजीजनत् । मज्जनुरवधिकशापश्रृङ्खलानिगडितमर्त्यविग्रहौ मातुलौ मज्जन्मसमकालमेव स्वीयां विद्याधरपदवीं पुनः प्रापतुः । ततः संवत्सरेष्वन

नेकेषु व्यतीतेषु बाल्यस्थे मयि प्रक्षीणाभिशापपाशापि कृतान्तपाश-संदानितचरणा कालिन्दीसोदरेण निष्करुणेनाहूयमाना वत्सव-त्सला प्रसूर्जीवलोकमिममात्मनः सर्वस्वभूतं मां च सविषादमा-मन्त्र्य सुदूरप्रसारिणा मृत्युहस्तेनापि पुनरप्राप्यं शश्वज्जरामरण-व्याधिविवर्जितसदानन्दमयं नमुचिसूदनस्य सुनासीरस्य नन्दनोपवन-नीकाशं विद्याधरलोकमयासीत् । बालकोऽपि धृतिमानहं सुकुमार-हृदयकुसुमवेधिनं मदेकाश्रयभूतमातृनिधनजमभिशोकं परमार्थतो दुरतिक्रममपि धैर्येण धैर्येण समुल्लङ्घ्य दक्षिणाहि दवीयांसं जनपदं जग्मिवान् तत्र कालेन साधारणबुद्धिमता दुरधिगममखिलविद्या-कलापं सर्वात्मना करतलामलकवदुपलभ्य सकलविद्यारत्नाकरः श्रुतिस्मृतिपारदृश्वा समभूवं ततश्चैकदा शिष्यैः कृतानुयात्रो वैश्रवणसमानद्युतिराजशातवाहनदिदृक्षया राजधानीमगमम् । अथ कालक्रमेणासाद्य शातवाहनाधिष्ठितं पुटभेदनं घण्टापथेऽन्तेवासिभिः समेतस्ततः परिचञ्चूर्यमाणो भूरिवरदाभ्यां पद्मालयासरस्वती-भ्यां युगपत् सविलासं विजेह्रीयमाणाया हृदयंगमविभ्रमभुवः नगर्याः कामपि मनोरमां लक्ष्मीं दर्शं दर्शं शृंगाटकेषु क्वचित् सरीसृपवत्कुटिललोकयात्रानिपुणानुसरणकोविदानां विदग्ध नाग-रिकाणाम्, अहमस्मि श्रुतिपेयगान्धर्वमर्मविद् विचित्ररागपरिवा-हितौर्यत्रिकप्रेयोगकृतमुखो भरतावतारः शैलूषः शिलापुत्तलिकानां मनांस्यपि घ्राणेन्द्रियतर्पणचन्दनसौगन्ध्यवाहिना मलयसमीरणेने-वातिहृद्यरागतरंगप्रवाहिणा सुदूरमपहर्तुं समर्थो, मा मैवं वाचाल

गर्ज शून्यमस्तको वैद्येयोऽपि कस्तत्त्वार्थहीनं वाग्मिनस्ते प्रलपितं श्रद्दधाति शृणु परातिसंधानकलानिष्णातः कौटिल्यसमानप्रभावोऽहं देवानांप्रियान् धनाढ्यान् रनिलम्पटान् प्रतिरात्रं कुलयोषिद्रूपधारिणीभी रूपाजीवाभिर्निपुणेन संयोज्य प्रचुरं धनमुभयतोऽपहरामि न केवलं मुग्धकामिनां जिह्महृदयानां सवेश्यानां शम्भलीनामपि सकलं स्वापतेयमपहृत्य तांस्ताश्च सहेलं नग्नीकर्तुमपि शक्नुयां यदीच्छेयमित्थंकारं प्राज्यं द्रविणमुपार्ज्य नाम्ना दीननाथोऽहं गतिहीनाननाथान् पितेव परिपोषयामि, हे दीनवत्सल, अलं विस्तरेण शृणुत यूयं वासरेभ्यः कपिपयेभ्यः प्राक् कंचन पैतृकविभवमदान्धं महाधनं सततमधुपानसुरतनिरतमकिञ्चित्करत्वादिहलोके सर्वथा निष्प्रयोजनं दौरात्म्यमयत्वात् सर्वजननिन्दितं पैत्रधनव्ययशीलं युवानमनर्थकेषु मदिरानिषेवणमैथुनसंभोगादिषु व्यसनेषु स्नानार्थजलमिव हिरण्यं कथंस्विदेवं निर्विचारं व्ययसीत्थमनिशमतिवेलपितृद्रव्यव्ययनिर्बन्धस्त्वया क्रियेत चेत्तत् पित्र्यद्युम्नं प्रभूतमप्यचिराद् ध्रुवं रिच्येत यतो दुरोदरहृन्मर्मज्ञस्य द्यूतेऽपराजितपूर्वस्य सदा पराजिष्णोर्मे सफलेन साहाय्येन रिक्थं बहुशो बहुशो बहुलीकुरुष्वेत्यादिभिर्मधुरमनिस्यन्दिभिर्वचोभिर्विप्रलोभ्य द्यूतसमाजे मया पूर्वमेव कृतमिथःसमयेन परप्रतारणाप्रवीणेनाक्षधूर्तेन ग्लहं कारयित्वा पणितं तदीयसर्वस्वमात्मसात्कृतवानहं ततो नग्नीकृतप्राय उपसंव्यानशेषो मूर्खोऽयं त्रपातिशयेन नगरेऽत्र स्थातुमसमर्थः कांदिशोक इव देशान्तरं द्रुतं निर्जगाम, अरे कित्र

कृतं कैतवेनायशस्करेण सर्वदा सर्वशश्चार्जवमेवाश्रित्य व्यवहर्तव्यं किं न श्रुतं युष्माभिर्यन्मादृशेनाकिञ्चनेनापि ऋजुक्रतुना सद्व्यवहारद्वारा लक्ष्मीरनुत्तमा प्राप्यत इति, पुराहमासं निर्धनो दारिद्र्यबुभुक्षापरिमृदितः कदाचिदुत्क्रान्तप्राणं मूषकं गृहीत्वा परिभ्रमन् गृहपोषितमार्जारार्थं तदर्थिने चणकाञ्जलियुगलपरिमितेन मूल्येन तं विक्रीय भृष्टांस्ताञ्चणकाञ्शीतलवारिकुम्भेन सह समादाय गोपुराद्बहिर्नातपे छायाद्रुममूले कृतोपवेशः परिश्रमसंजातक्षुत्पिपासेभ्यः काष्ठकेभ्यः श्रमातपनुदं शीताम्बु चणकांश्च समर्पितवान् सजलचणकदानेन प्रीतैस्तैरेकैकशो दत्तानि काष्ठानि लब्ध्वा विपणौ व्यक्रैषं ततश्चाहमल्पेनैवावक्रयेण क्रीतचणकराशिरपरेद्युरपि तत्र गत्वा तेभ्यो वनेचरेभ्यः शीतलवारिसहिताञ्चणकानुपहृत्य संप्राप्तभूरिकाष्ठभारस्तत आपणे काष्ठसंचयं विक्रीय फलेन लाभवान् प्रमुदितमनाश्चणकद्रोणं स्तोकमूल्यदानेनाक्रीणामेवंकारं काष्ठचणकवाणिज्यं प्रत्यहं कृत्वा कतिदिवसान्तरे तेभ्यः काष्ठभारिकेभ्यस्तत्कालोचितवस्तुसमर्पणेन समस्तान् दारुराशीनक्रैषं तदनन्तरं दैवादकाण्डोपनतातिवृष्टिवारासंपातैर्नीरन्ध्रैः पुरि काष्ठक्षये संपन्ने सति बहुभ्य इन्धनार्थिभ्योऽहमहमिकया दुर्लभाः समिवश्चिक्रीषुभ्योऽतिमूल्येन तानि काष्ठानि सर्वाण्यनायासेन विक्रीतवान् ततश्चाहं पण्यवीथीं कृत्वर्जुव्यवहारतत्परोऽपि वाणिज्यनिपुणः कालक्रमेण महासार्थः समस्तवणिगग्रणीरभूवमित्यादीन् विचित्रलोकव्यवहारपिशुनान् वार्तालापानाकर्ण्य क्वचि-

द्विद्वद्गोष्ठीषु प्रवृत्तैर्दुर्बोधवेदप्रमुखविविधशास्त्रार्थविचिततत्परा-णां विपश्चितां वादविवादैः क्वचिन्मन्दिरेषु श्रोत्रियैर्यथाविधि जेगीयमानैः श्रवणसुभगैश्छन्दोभिश्च मोमुद्यमानो राजकुलं प्रविश्य द्वितीयं गुह्यकेश्वरमिवाक्षय्यचामीकररत्ननिधिं राजानं शातवाहनं दृष्ट्वा तेन सभाजितो मन्त्रिपदमपि प्रापमिति । निजाजन्मचरित्र-वर्णनावसरेऽवितथमिति वादिनं माल्यवन्तं गुणाढ्यसंज्ञया लोके प्रसिद्धयशसं काणभूतिः पप्रच्छ कस्माद्धेतोः स महीमघवा शात-वाहन इत्यभिधीयते तस्य नाम्नि विचित्रे कौतुकं ममेति । तज्जि-ज्ञासाविष्टमनसं तं कुबेरानुचरचरं पिशाचं महामहिमप्रभास्वर-स्वरूपो गुणाढ्यः प्रत्युवाद श्रूयतां पुरा बभूव दीपकर्णाह्वयोऽप्रमेय-पराक्रमानुभावात्मसात्कृतचतुर्णवसीमवलयितभूमण्डलो यथा-वकाशसामदानभेददण्डोपायचतुष्टयोपयोगकुशलो दुर्ग्रहसूक्ष्मषाड्-गुण्यादिराजनयनिर्णयप्रयोगविचक्षणदूरदर्शी सदाचारशीलगुण-संपन्नत्वादात्मनो दोषज्ञोऽपि न परेषां दोषज्ञो दुर्धर्षबुद्धिबलवैभव-करदीकृताखिलसामन्त-नृपमौलिचंचच्चूडामणिकर्बुरद्युतिद्युतितचर-णयुग्मो दरिद्रविद्वत्समाजे वदान्योऽपि शात्रवेऽवदान्यः सूक्ष्ममति-रपि स्थूलमतिरनिष्टेऽमित्रे क्रूरो मित्रेऽक्रूरो दीर्घदृष्टिरप्यदीर्घसूत्री महीभृदधिराजस्तस्य च शास्त्रनिर्णीतविधिवत्कृताभिषेका प्राण-समा वल्लभा शक्तिमती नाम बभूवाकलङ्कितेन्दुमुखी निःशेषलल-नाललामभूता मनोभिरामवरवर्णिनी यस्या मनसिजजायावतार-संकाशायाश्चारुणा विभ्रमापाङ्गदृष्टिविक्षेपेणैव सकलजगद्विजि-

गीषुः पुष्पधन्वा रतिपतिः सहसा प्रबुध्य सदर्पमिव सकुसुमबाणं सभ्रमरज्यं चापं हस्ते दधार। अथ कदाचित् समुद्रवेलामुद्रितोर्वी-मण्डलस्य साकल्येनात्मीकृतत्वाद् वीतज्वरो राज्यस्यातिप्राज्यस्य सुदृढबद्धमूलत्वाच्च निश्चिन्तो राजकीयनियोगानुष्ठानप्रवीणेषु राष्ट्रधुरंधरेषु मन्त्रिषु समर्पितराज्यभारः सार्वभौमो दीपकर्णः सहस्रशः सहस्रशः सर्वत्र समुन्मीलितमञ्जुपुष्पगुच्छस्मेराननमहीरुहे मधुरमधुपानशौण्डमधुपप्रिये युवमिथुनमनःसमुल्लासजनयितरि सुमनसां परिमलसुरभौ सुरभौ प्रेयस्या, परिपक्वबिम्बौष्ठपरि-चुम्बनचञ्चुनौष्ठचषकेण मधुराधरं पायं पायं तस्याः सुवर्णकुम्भो-पमे पीनोन्नतस्तनाभोगे मनोमोहिनि गिरिनितम्बप्रतीकाशे च पीवरनितम्बफलके स्वच्छन्दतश्चिक्रीड। ततस्तत्र क्रीडोपवनेऽति-शयनिधुवनशिथिलाङ्गी विस्रस्तदुकूला भर्तुः पार्श्वे सुखशयिता देवी कृतान्तकिंकरेणेव तीव्रविषधरेण चक्षुःश्रवसा दष्टा तत्क्षण-मेव तीक्ष्णगरलवेगाद् विलिल्ये। अकाण्डे पञ्चतां प्राप्तायां तस्यां तद्वियोगानलदग्धप्रायक्षीणपरिधूसरवपुरनपत्योऽपि दूरीकृतकल-त्रान्तरपरिग्रहः पुन्नाम्नो नरकाद् यस्मात् त्रायते पितरं सुतस्तस्मात् पुत्र इति विद्वानपि नरेश्वर उररीकृतब्रह्मचर्यव्रतः स्वप्ने समग्र-भक्तजनशङ्करं शङ्करं साक्षाच्चकार। वत्स द्रक्ष्यसि गहने कान्तारे यथासुखं परिबम्भ्रम्यमाणं विकटकंठीरवारूढं सप्तवर्षदेशीयं कुमारं यस्ते जन्मनि पूर्वस्मिन्नपि पुत्रोऽभूत् स भूयस्ते सुतो भविष्यतीति वरदेनार्धेन्दुमौलिनोक्ते तं स्तुतिशतैः सादरं प्रणम्य प्रहृष्टचेता

दीपकर्णस्तामटवीं प्राप्य विकचकमलसरोवरस्य रोधसि विहरन्तं सिंहवाहनं महातेजसं कुमारकं पश्यन्नतिभृशं पुलकितवर्ष्मा मनसि सद्योजातपितृस्नेहरसप्रथमास्वादप्रमुदितसर्वात्मा निर्मर्यादपुत्र-सिस्वंक्षयैकेनैव सटङ्कारातत्तमौर्वीगुणाद् धनुषो मुक्तेन विशिखे-नामोघफलेन करालाकृतिं केसरिणं जिहिंस। तत्क्षणात् स मृगेन्द्रः सविस्मयं राज्ञः पश्यतः स्वविग्रहमपहाय धृततेजोमयपुरुषाकृति-रञ्जलिं बद्ध्वा तमित्यभिदधे भो मनुजेन्द्र संजीवनौषधीतुल्यत्वत्प्र-सादनिर्मुक्तशापबन्धनः शातो नाम त्र्यम्बकसखस्यालकेश्वरस्य पारिपार्श्विको यक्षोऽस्मि, पुरा कस्यांचित् काननतरङ्गिण्यां स्नानं विदधतीं निजरूपलावण्यनिर्जिताप्सरसं मुनिकन्यकां ददृशिवान् सपदि मनोमथनपुष्पायुधशरव्यतामगमं सापि तेजस्विनं मामुद्वीक्ष्य मदनविधुरा समजनिष्ट तत्समनन्तरं च यथावद्विहितगान्धर्व-पाणिपीडनौ सुखिनौ दम्पती यथातृप्ति सर्वंकषमन्मथसाम्राज्य-सुखमनिर्वचनीयभावां निरविक्षाव तच्च ज्ञात्वा प्रकुपितमुनय आवामभ्यशाप्सुर्बन्धुजनानिष्टकारिणौ युवां सिंहावस्थां मंक्षूप-पद्येथां किन्तु स्वैरिण्यास्तवौरसोत्पत्तिपर्यन्तं शापः स्थास्यति, गुह्यकापसदस्य ते शापस्तु दीपकर्णभूपालशरव्यधावधिको भवत्वि-त्यभिशापपर्यवसानमपि सकृपमकार्षुस्ततः पंचास्यजंपती भूत्वा दुर्गमविपिनानि व्यचारिष्व काले च मेऽन्तर्वत्नी भार्या पुत्रकमुरु-विक्रममिमं जनयित्वा व्यपादि, तस्यां शापविनिर्मुक्तायां स्वपदवीं गतायां स्तनंधयमेनं धात्रीभूतानां केसरिणीनां दुग्धेनाहं समवी-

वृधम्, राजन् गृहाण मयार्पितं वीर्यवन्तमात्मजमिमं यो जन्मान्तरे त्वत्तनूद्भवो बभूव, संप्रति सपुत्रकं त्वामापृच्छे गच्छाम्यलकापुरीं त्वदीयेषुघातेन दिष्ट्या खंडितासह्यपीडशापबन्धनः। अभिशपनावसानजनितसंमोदातिशयसंजातपुलकोद्गमे तस्मिन् धनदानुचरवरे सहर्षं तिरोहिते वसुंधरानाथो दीपकर्णस्तं कुमारमुरसि कृत्वा युगपत्संवृत्तमहोत्सवसमाकुलमात्मीयं निवेशनमतिमात्रप्रीणितमानसः प्रत्याजगाम ततश्च शातनाम्ना सिंहभूतेन गुह्यकेनोढत्वाच्छातवाहन इत्यस्य नाम चक्रवान् कालक्रमेण तं रत्नसिंहासनेऽतिष्ठिपत्। एवं प्रोच्य विरते तस्मिन् गुणाढ्ये महामते भूयोऽपि कर्णशष्कुलीसुखदेन शातवाहनचरितकथनेन मामनुगृह्णातु भवानिति कथान्तरेऽतिहृद्यकथासंश्रवणकौतूहल्याविष्टविवशचेतोवृत्तिः काणभूतिस्तं प्रार्थयाञ्चक्रे। यदि शुश्रूषा कर्णं देहीति प्रस्तुत्य माल्यवान् पुनर्वक्तुं प्रचक्रमे ततो वयोवृद्धे वानप्रस्थभूते पितर्यरण्यं प्रविष्टे सार्वभौमः शातवाहन मधुसमये वसन्ते विलासोद्यानदीर्घिकायां वैश्रवण इव चैत्ररथवाप्यां मनोज्ञकटाक्षविभ्रमप्रबोधितमनोभूभिः कामातुरकामुकहस्तसंवाहनसमुचितस्पृहणीयकुचकुम्भयुगलापहसितकनककलशाभिः सुरतकेलिनिरतकामिजनारोहणार्थनिर्मितक्रीडापर्वतनितम्बसरूप-पृथुपेशलजघनभारालसहंसगामिनीभिर्लम्बोरुरम्भोरूतिरस्कृतरम्भाहृश्रेयोभिरन्तःपुरकामिनीभिः सममुद्दामजलकेलिं विदधत् ताश्च वारिक्लिन्नगाढासक्तदुकूलदरव्यक्तशरीरावयवरेखानितान्तरम्या विलासिनीः करपुट-

पूरितैरम्बुभिरजस्रमभिषिञ्चंस्ताभिः स्पृष्टास्पृष्टिपूर्वकमभिषिच्यमानो यथातुष्टि रेमे । ततस्तत्रैकतमा कामिनी निरन्तरैः करवारिभिः प्रसह्य तेन सेषिच्यमाना विदुषी स्मितपूर्वं बभाषेऽयि राजन् मोदकैर्मां परिताडयेति । आकर्ण्य तद्वचः सूक्ष्मश्लिष्टशब्दार्थानभिज्ञः शातवाहनो झटिति बहूनि मोदकान्यानीय शिरीषकुसुमकोमलांगयष्टिं तां तैर्मोदकैस्ताडयितुमारेभे । तादृशीं तस्य मूढचेष्टां सखेदमिव प्रत्यक्षीकृत्य सा जिहसिषामतिवेलां कृच्छ्रान्निगृह्य चैवं भूयस्तं व्याजहार देव कोऽवकाशोऽत्र मध्येदीर्घिकं तोयान्तरे मोदकानां, मयोक्तं मामुदकैर्मां परिताडयेति कथमिव त्वं मूर्ख इव माशब्दोदकशब्दयोः सुबोधं सन्धिप्रयोगमपि नावगच्छसि । इत्युक्ते तया शब्दशास्त्रविदि परिजने सर्वाभिर्देवीभिः साकं हसितैः किलकिलायति स भूपालोऽन्तर्व्रीडाभिभूतः दूरीकृतसलिलक्रीडो वैलक्ष्यलज्जारुणितं वदनमधरीकृत्य राजभवने प्रतिनिवृत्य स्वाविद्याजनितनिर्वेदज्वलनपरितातप्यमानः परित्यक्ताहारो वाचंयमतामाश्रित्यार्हदिवि केवलं द्राघीयःसु दुर्वारसंतापजेषु निःश्वासेषु द्राघीयांसं कालमतिवाहयन् सविषादमासिष्ट । प्रभो किमर्थं भृशमात्मानमनुशोचसि कस्मादक्लिष्टमात्मनः सुरक्षणीयं शरीरमित्थंकारं परिशोषयसि, जनुषा सर्वप्रजापूज्येन त्वं महापराक्रमसंपन्नस्तपनतेजाः सार्वभौमोऽसि, नैराश्यमीषत्स्खलितेन ज्ञानेन मा स्म गमः, सहस्रदीधितिप्रभावेनेव दुष्प्रसहेन सहजसाम्राज्यभावेन सुतरां सुतरां प्रदेदीप्यमानो महीभर्ता त्वं पाकशासन इव

ज्ञाविधेयैर्बृहस्पतिसमानबुद्धिभिर्मौलमंत्रि-प्रभृतिभिर्विबुधैरनिशमु-
पचर्यसे तथापि यदीच्छसि त्वयि प्रकृष्टं पाण्डित्यं संपादयितुं वयं
सर्वात्मना यतिष्यामह इति शर्ववर्मप्रमुखाः सर्वे वयं मन्त्रिणस्तं
विपण्णमसमान्त्वाम । भृशं परामृश्याहं सूनृतवादी शातवाहनम-
वादिषमायुष्मन् पञ्चभिर्हायनैः कृत्स्नविद्यासागरपारंगतं मनीषिणं
त्वं करिष्यामीति । ततो युष्मादृशाः पण्डितंमन्या दूरे तावत्तिष्ठन्तु
केवलं षण्मासाभ्यन्तरे राजन् त्वां विद्याविशिष्टं नूनं विधास्या-
मीति मुख्यामात्यः शर्ववर्मा सगर्वं व्याहार्षीत् । तच्छ्रुत्वाहं
साक्षेपमभाषिषि कथंकारं षड्भिर्मासैः पाडित्यमधिगम्यते, त्वया
पराजीयेय चेत् संस्कृतप्राकृतापभ्रंशात्मिकां भाषात्रयीं सर्वथा
परित्यज्य वाचंयमो भवेयम् । प्रत्यवोचच्छर्ववर्मा मन्त्रिवरो यद्यदि
षण्मासेनास्मत्प्रभुं बहुश्रुतं कर्तुं न शक्नुयां तर्हि द्वादशवर्षाणि
त्वदुपानहौ शिरसि वक्ष्यामीति साटोपं प्रतिश्रुत्य तपश्चर्ययाराधि-
तस्य षाण्मातुरस्य कार्तिकेयस्य वरात् स्वयं विरचितेन कातन्त्र-
व्याकरणेन प्रतिज्ञातैर्मासैस्तं चक्रवर्तिनं विद्याकृतमुखं पण्डितं
व्यदधात् । उत्तरत्र तेनाथ वैयाकरणकुञ्जरेण शर्ववर्मणा सहेलं
पराभूतोऽहं पराजयकीलकीलितहृदयः सार्वभौमेण शातवाहनेन
सनिर्बन्धं निवारितोऽपि दुःखातिशयेन सशिष्य उदीच्यं दिग्भागमया-
सिषं ततश्च समासाद्य विन्ध्याद्रिं तपसा दुश्चरेण प्रीणितायाः
कात्यायन्या वचसा त्वां मदीयशिवसालोक्यगमनसरणिं दृष्ट्वा
जातिस्मरो भूत्वा परित्यक्तवाणीत्रयोऽपि मौग्ध्यहं देवीप्रसादेन

तद्भिन्नां पैशाचीभाषामवम्ब्य त्वया सुमनसा पृष्टश्चरित्रमात्मीय-
मा जन्मनोऽद्यपूर्वं यथावृत्तमित्थं कथितवानस्मि। इत्येवं गुणाढ्य-
मुखाच्छ्रुत्वा संतुष्टिमदभ्रामनुभवन् हर्षविकसितस्मेराननः काण-
भूतिस्तमुवाद धन्योऽस्मि त्वदनुग्रहास्पदीभूतो, हे महाभाग ह्यस्तन्यां
विभावर्यां त्वद्दिदृक्षाप्रेरितमनसा मयानुयुक्तस्य दिव्यदृष्टेरनागत-
दर्शिनः सुहृदो भूतिवर्माभिधस्य राक्षसस्य वदनात् त्वच्छापमुक्ति-
निदानं गुणाढ्यः श्व आगमिष्यतीति वचनं निशम्याद्योल्वणोत्क-
लिकासस्रोष्वयन्त्रितेषु सोत्कण्ठं प्रतीक्षितत्वदागमनस्त्वामद्राक्षमि-
दानीं वररुचितोनुश्रुतां महाकथां कथयामि यया सुदारुणाभिशाप-
शृङ्खलाद् विमुच्यावहे, परन्तु चेतसि मे परिशिष्टैकैव विविदिषा
विद्यते तामुदारधीरत्रभवान् तर्पयतु, केन कारणेन त्वं माल्यवान्
स च वररुचिः पुष्पदन्तसंज्ञया कस्माद्धेतोर्विश्रुतिमवाप्तवानिति।
श्रूयतामिति व्याहृत्य माल्यवत्पुष्पदन्तजन्मान्तरवृत्तान्तकथानकं
प्रस्तोतुं गुणाढ्यः प्रारेभेऽस्ति भागीरथीकूले तत्रत्येन भूमिपालेन
ब्राह्मणसात्कृतो बहुसुवर्णको नामाग्रहारस्तत्र कोऽप्यग्रजन्मा
गोविन्ददत्ताह्वः पुरा सुदर्शनैरपि भ्रष्टचारित्रैर्विद्याविहीनैः पञ्च-
भिर्मूर्खपुत्रैः सह निवसति स्म, कदाचिदथ वैश्वानरनामा तदीयः
सखा तांस्तनूजान् दुर्विनीतान् वैवेयान् प्रत्यक्षीकृत्य कथं नाम
त्वं विशृङ्खलान् दुश्शीलांस्तनयान् न शिक्षयसीति सर्षिषा
प्रज्वलितो वैश्वानर इवामर्षेण प्रदीप्तस्तेषां पितरं गोविन्ददत्त-
मतिभृशमनिन्दीत्, सोऽपि निन्दितस्तं सखायं कुपितं कथंचित्

प्रसन्नचेतसं कृत्वा ततो मौनव्रतमाश्रित्य निजौरसांस्तान् निकृष्ट-जातीन् दिवार्कीर्तीनिव सर्वतः परिहरन् दिवारात्रं गम्भीरे शोक-सागरे न्यमांक्षीत् तं च तथाभूतं पुत्रमौर्ख्यदुर्विनयसंतप्तमानसं जनकमवलोक्यातीव दुर्मनायमानौ ज्येष्ठकनीयांसौ तनयौ प्राज्य-भक्तिशंसिना तपश्चरणेन त्रैलोक्याधीश्वरं त्र्यम्बकं पार्वतीवल्लभं प्रसादयितुं सभ्रातृत्रयं जनयितारमामन्त्र्य गृहात् प्रायासिष्टां ततश्च क्वापि तपोवनायतने ज्यष्ठो भ्राता प्रमथाधिपधूर्जटिपर्यु-पासनैकाग्रमना अनारतमेव लोकंपृणसौरभवाहिनीभिर्बहुविधरुचि-रसुमनोगुच्छगुम्फिताभिः प्रत्यग्रप्रसूनमालाभिर्वृषध्वजं पूजयन् प्रसन्नेन तेन विश्राणितमाल्यवन्नाम्ना समभूत्, कारणभूते तं विद्धि मां, कनीयांस्तु कृशानुरेतसो, वत्स त्वमैहलौकिकान् हृद्यतरान् विषयसंभोगान् यथेच्छं भुक्त्वा भविष्यत्कालेऽस्मत्प्रसादाद् गणपद-मवाप्स्यसीति सौभाग्यदायिनं वरमुपलभ्य निशातबुद्धिः कालक्रमेण श्रुतिनिधेर्वेदकुम्भनाम्नो विश्रुताचार्यात् कात्स्न्र्येनाधीतशास्त्रसमुदायो विपश्चित्पुरोगः समवर्तिष्ट। अथैकदा स मेऽवरजो वसुवर्मसंज्ञितो नृपस्य प्रफुल्लयौवनस्थां सुतनूं श्रीनाम्नीमात्मजां यदृच्छया दृष्ट्वै-कपदे स्मरवागुरायां निपपात। सापि सुभ्रूरपरं कंदर्पमिव दरी-दृश्यमानं सुभगं सुलक्षणं महातेजसं तं समुद्वीक्ष्य कंदर्पदर्पनिगृहीत-सर्वाङ्गी दरापत्रपिष्णुः पौनःपुन्येन पुष्पं दन्तैः खण्डयन्ती तत्रैव तस्थौ। मदनातुरान्तरंगोऽप्यसौ तदभिप्रायमज्ञात्वा तत्क्षणमेव गुरुसकाशं गत्वा च तस्मै तन्निवेदयांबभूव, त्वं विदांकुरु तस्या

अभिप्रायं यस्मात्तया दन्तैः पुष्पं खण्डितं तस्मान्नूनं पुष्पदन्ताभिधमुपवनं सूचितं तत्र संकेतो विहित इति गुरुमुखात्तद्रहस्यसंज्ञार्थं शिक्षित्वा द्रुततरं तत्र ययौ तां च प्राप्य पुष्पितनवयौवनवल्लरीमतिशयमधुरमधुरसनिस्यन्दिनीं चकितचकितहरिणशावाक्षीं सद्यःसमुत्पन्नदुर्भरमदनमदजनितवेपथुतरंगितमनोज्ञकुचतटीमुरसि कृत्वा मन्मथवेगव्याकुलो यथेप्सितं परिचुचुम्व । ततो निर्मर्यादपरिचुंबनविभ्रमान्ते सा स्मेरस्मरफेणतरंगिणी तं परमानन्दसिंधुं युवानं सकौतूहलमनुयुयुजे नाथ कथं सूक्ष्माकूतगर्भितां मम संज्ञामवेदीरिति । अयि सुन्दरि त्वदभिप्रायाज्ञानखिन्नमनसे मह्यं सर्वज्ञः सुधीर्वेदकुम्भोपाध्यायस्तत्संज्ञार्थं न्यवीविददिति सरलहृदयेन कामुकेन याथातथ्ये कथिते शृंगरहितं बलीवर्दमिव मनीषाप्रतिभानविहीनं तं मत्वा, प्रज्ञाविवर्जितो मौग्ध्यविभूषणो देवानांप्रियोऽसि कथमिव त्वयि मूढे मेऽनुरागो, मुञ्च मां विदुषीमिति सनिन्दं निगद्य रहःसंकेतप्रकाशनभयाद् द्रुततरगतिः सा राजदारिका क्षिप्रमियाय । एवं तया मानिन्या निष्प्रयोजनः पटच्चरच्छेद इव निष्फलो नपुंसक इव परित्यक्तोऽसौ मे सोदरोऽपत्रपातिरस्कारनितान्तविमनीकृतो युगपद्दृष्टनष्टप्रेयसी--विश्लेषतनूनपाद्दग्धप्रायभस्मपरिधूसरसर्वांगः प्राणेश्वरि दयिते कथं मामनुरक्तं विहाय गतासि क्वासि देहि मे वचनमिति क्षणमुन्मदिष्णुरिव प्रमुक्तकण्ठं विलपन् निरन्तरबाष्पप्रवाहपरिपूर्णाक्षः क्षणमन्धीभूत इव दिङ्मोहप्रस्खलितपादक्षेपः पांसुले भूतले झगिति पतित्वा मुमूर्च्छ । अथावलोक्य तं कृपणं

मूर्च्छालं जीवितसंशयवर्तिनं व्योमविहारी जायासखोऽर्धेन्दुमौलिः करुणार्द्रया हिमवद्दुहित्रा स्वयं याचितः सन् कामरूपं पञ्चचूडसमाह्वयं गणवृषभमाज्ञापयाञ्चकार पश्यासौ तपस्वी काममोहितः प्राणसंकटे वरीवर्ति गच्छ प्रकृतिस्थमेनं विधाय तत्तत् कुरु यद्यदिच्छति सोऽयं वराक इति। भगवन् यथाज्ञापयसीति शिरसि धृततदादेशस्तरस्वी पंचचूडस्तत्क्षणान्महीतलमवतीर्य तं मेऽवरजं स्वस्थं कृत्वा युक्त्या तं वधूवेषधारिणं विधाय कामरूपी सपदि स्वयं प्रवयसा ब्राह्मणेन परिणतस्तं वरांगनारूपं समादाय राजभवनं प्रति प्रचचाल ततश्च वसुवर्माणं भूभुजमासाद्य तनूद्भवो मे जनपदान्तरं प्रयातस्तं गवेषयित्वा पुनरागमिष्यामि मत्प्रतिनिवर्तनसमयपर्यन्तमियं मे स्नुषा त्वद्धस्ते निक्षिप्यते तदिमां मदर्थे सुरक्षितां कुरुष्वेति राजानं प्रोच्य लब्धतदनुमतिर्निर्जगाम। अथ नृपेण सुगुप्ते कन्यकान्तःपुरे निवेशितोऽसौ योषिद्रूपो मे सहजोऽल्पेनैव कालेन तस्या राजपुत्र्या विश्वासपात्रीभूतोऽनन्तहृदयंगमक्षणदायां क्षणदायां सुदुर्ललितमनोजन्मसंक्षोभितवेपमानहृदयां तां सुदृढं दोर्भ्यां परिरभ्य सस्मितं व्याजहार मज्जीवितसंजीवनौषधे मीनकेतनसागराकर्षणचन्द्रिके सोऽहमस्मि मूर्खोऽयमिति त्वया जीर्णोपानद्वत्परित्तपूर्वस्तथापि कुशाग्रप्रज्ञावती विदुषीदानीं कन्यान्तःपुरप्रासादसुखसंचारिणं वधूरूपिणं मां कथं न ज्ञातवत्यसीत्युक्त्वा वेलक्ष्यस्मिताधिकचारुवदनां वेलातीतमकरध्वजकल्लोलतरंगितरुचिरवक्षोरुहां परिचुम्ब्य तदीयाधरमकरन्दपानरोमांचित-

वपुर्गोन्धर्वेण वैवाहिकविधिनोपयेमे तदनन्तरं चातृप्तिकरं मुहुर्मुहुरावर्तितसंवेशनसंभोगं समुपजोषमास्वाद्य प्रातस्तरामुपांश्वलक्षितस्तस्मादन्तःपुराद् दुद्राव। अथ प्रभाते जराजीर्णपलितविप्राकृतिः कामरूपः पञ्चचूडस्तमपनीतवधूवेषं प्रच्छन्नकामुकमादाय राजकुलं गत्वा नरेश्वरं प्रोषितो मे नन्दनोऽद्य समायातस्तदस्य वधूं मे प्रतियच्छेत्यभिबभाषे। तन्निशम्य क्षिप्रं कन्यकान्तःपुरादस्य द्विजातिवरस्य स्नुषा समानीयतामिति विश्वंभराधिपेन समादिष्टस्तत्पार्श्ववर्ती परिजनो निर्गत्य मुहूर्तान्तरे प्रविश्य च समम्भ्रमं विज्ञापयाञ्चक्रे देव तिरोहिता सा न कुत्रापि दृश्यत इति। अकस्मात् पलायितां तां परिज्ञाय भृशं क्षुभितमनाः स भूभर्ता मन्त्रिभिः सम्मन्त्र्य पुरा नृपपुंगवः सकलसत्त्वबन्धुर्दयालुः शिबिरपि मायाधृतगृध्रवपुषा दिवस्पतिना पुरुहूतेन परीक्षितो बभूव, नूनमयमपि कश्चिद् दिवौका मां परीचिक्षिषुरायातः स्यादित्यभिधाय शापभयभीतोऽतिकृच्छ्रेण तं जराजर्जरिताग्रजन्मरूपं गणं प्रसाद्य स्नुषास्थाने स्वकीयामौरसीमुपजहार। तां प्राणसमामुपलभ्य दयितादन्तखण्डितपुष्पसंज्ञया पुष्पदन्त इति कृतसंज्ञोऽसौ मे कनीयान् भ्राता

थैकदा प्रेयसीमनोविनोदाय विजने स्मरहरेण हरेण कथितां सर्व-
जनमनोविस्मापनीं वृहतीं कथामुद्दामशुश्रूषाविष्टचेताः सोत्कण्ठं
तस्करवदुपश्रुत्य शैलराजतनयया सरोषं शप्तः पुष्पदन्तस्तच्छाप-
निर्वापणाभ्यर्थनाप्रणतेन मया साकं भुवि जीवलोके निपातितस्त-
तश्च तां मनोहरीं महाकथां ते कथयित्वा क्षीणपापः पुनरिदानीं
गणपदं प्राप्तवान् तस्माद् भोः काणभूते पुष्पदन्तादनुश्रुतां तामेव
वृहत्कथां मे यथाशीघ्रं कथय येन तपस्विनोरावयोः शापप्रणाशो
भविष्यति । हे महामहिमशालिन् वहुश्रुतविद्वच्छार्दूल भवत्प्रसाद-
पात्रतां खलु गतोऽहं भवदीयजन्मत्रयोपवर्णनेनातिमात्रमनुगृहीतो-
ऽस्मि हे अप्रमेयमहानुभाव शृणोतु भवानहमपि विनिर्मुक्तशाप-
शृङ्खलः कौवेरीमलकापुरीं यियासुरस्मत्परिवृढसखस्य पिनाकिनो
वदनसरोरुहात् कैलासाद्रौ गिरिजायै समुदीरितां विद्याधरधरा-
भुजां सप्तचक्रवर्तिनां वैचित्र्याश्चर्यमयीमतिप्राज्यां कथामधुना
कथयामीति काणभूतेर्वचनं निशम्य कविशिरोमणिर्गुणाढ्योऽवहि-
तेन मनसा तेन निगदितां सप्तलक्षश्लोकात्मिकां पैशाचीवाङ्मयीं
तां वृहत्कथामात्मनो रुधिरेण लिलेख तांश्च गुणाढ्येन सुधिया
विरचितामनेकशतग्रन्थपरिमाणां महाकथां संपरीक्ष्य प्रहर्षातिशय-
संजातरोमाञ्चः काणभूतिर्दुस्सहक्लेशावहं प्रतिभयपिशाचकलेवरं
पटच्चरमिव समुत्सृज्य सुचिराभिलषितं स्वपूर्वस्थानं पुनर-
वलम्बितप्रभास्वरराजराजानुचरवर्ष्मा प्रीतिविकसितास्यः सहर्षं
प्रययौ । तत एतन्महाकथासमर्पणयोग्यभाजनं नृपोऽयमिति मनसि

विधाय शातवाहनाय तां प्रजिघाय । तां लब्ध्वापि कथैषा निकृष्ट-कौणपभाषापरिगुम्फिता मनुष्यैरस्मादृशैः परिहर्तव्या प्रणेताप्यस्याः शर्ववर्मणा मुख्यमन्त्रिणा पराजितत्वाद् दुःखायमानः परित्यक्तप्रकृष्टमनुष्यवाणीत्रयो मौनमाश्रित उन्मदिष्णुरिति साक्षेपं जल्पित्वा दर्पाध्मातः स महीपालस्तां यथागतं विससर्ज । इत्थंकारं वस्तुसारानभिज्ञेन तेनातिभृशं न्यक्कृतो विषण्णमनाः कविवरेण्यः शिष्यसमक्षमेव विस्मृताशनेषु कृष्णसारविहंगमपुरस्सरेषु समग्रजंगमेषूत्कर्णेषु शृण्वत्सु तां मनोरमां लोमहर्षणीं बृहत्कथामहर्निशं प्रतिवासरमविच्छिन्नं मधुरया गिरा वाचयन् प्रज्वलितज्वाले हुतभुजि पत्रं पत्रमजस्रं प्रचिक्षेप । अत्रान्तरे दिवारात्रं परिशुष्कनीरसमांसशकलभोजनार्दितः स शातवाहनो मृगयुशाकुनिकादीनां वैतंसिकानां वचसा मृगपक्षिणां परिशोषणहेतुं विदाञ्चकार तत्क्षणाच्च दुर्निवारेण कौतूहल्येनाचरीकृष्यमाणो महदद्भुतं तत् साक्षात्कर्तुं गुणाढ्यसमोपमियाय केवलं श्लोकलक्षावशिष्टां महतीं कथां निरीक्ष्य गुणाढ्यादुपलब्धसमस्तोदन्तस्तत् सर्वलोकसुदुष्प्रापं विचित्रकथारत्नं गृहीत्वा प्रतिनिववृते । तदनन्तरं नीरजोज्ञानविज्ञानक्षीराब्धिप्रक्षालितरजोवृत्तिर्दिव्यदृष्टिर्गुणाढ्योऽपीमं मर्त्यलोकमापृच्छ्य पुनरवाप्तमाल्यवद्गतिः शिवं शिवलोकमुत्पपात ।



सौहृदयप्रीणितात् तस्मात्तापसादुपलभे ततश्च कोशाम्बीमागत्य भूरिदक्षिणे पुत्रमखे शास्त्रनिर्णीतविधिवन्मुनिपुंगवेन तेनानुष्ठितेऽन्वयः पुत्रकामो दशरथसमानप्रभावः स वसुधाधिनाथः कालेन पितृभक्तं दाशरथिमिव कुमुदबान्धववंशोन्नतिहेतुकं दयितदयितायां विष्णुमत्यां प्रसूतमात्मनन्दनं सहस्रानीकसंज्ञकं विकचद्युतिं सर्वराजलक्षणसंपन्नपरिपूर्णकान्तिमद्वपुषं सर्वलोकदुष्प्रापं प्राप। ततो गच्छत्यनिशं काले क्रमानुसारेण चन्द्रान्ववायावतंसभूतं तनूजरत्नं यौवराज्येऽभिषिच्य निशितचन्द्रहासप्रासशक्तिप्रमख-

संहारे चरमं वीरसदृशं दिष्टान्तमवाप्तः संग्रामाजिरनिहततेजस्वि-
सांयुगीनप्रियाभिरप्सरोभिरहमहमिकया स्वयंवरभर्तृत्वे वव्रे ।
इत्थंकारं स्वर्वधूवृतामर्त्यात्मनः सर्वलोकैकधनुर्धरस्य महावीरस्य
तस्य भूभुक्कुञ्जरस्य निखिलदिविषद्वृन्दसप्रश्रयगणविहितसंस्क्रिया-
पूतमाखण्डलसमादिष्टेन प्राजित्रा मातलिना भुवमानीतं कलेवरं
प्राप्य जगदेकवीरपितृनिधनविदेदीर्यमाणहृन्मर्मा युवराजोऽजस्र-
प्रवहद्वाष्पौघोच्छूनलोचनः सहस्रानीको नृपोचितां श्राद्धक्रियां
चकृवांस्तत्समनन्तरमेव भुवि कीर्तिशेषं गतवन्तं भर्तारमनुगतायां
विष्णुमत्यां संक्रान्तराजलक्ष्मीको भूभारचिन्तनप्रवीणैर्विस्तृतराज्य-

सौहृदयप्रीणितात् तस्मात्तापसादुपलभे ततश्च कोशाम्बीमागत्य भूरिदक्षिणे पुत्रमखे शास्त्रनिर्णीतविधिवन्मुनिपुंगनेन तेनानुष्ठितेऽनन्वयः पुत्रकामो दशरथसमानप्रभावः स वसुधाधिनाथः कालेन पितृभक्तं दाशरथिमिव कुमुदवान्धववंशोन्नतिहेतुकं दयितदयितायां विष्णुमत्यां प्रसूतमात्मनन्दनं सहस्रानीकसंज्ञकं विकचद्युतिं सर्वराजलक्षणसंपन्नपरिपूर्णकान्तिमद्वपुषं सर्वलोकदुष्प्रापं प्राप। ततो गच्छत्यनिशं काले क्रमानुसारेण चन्द्रान्ववायावतंसभूतं तनूजरत्नं यौवराज्येऽभिषिच्य निशितचन्द्रहासप्रासशक्तिप्रमुखभयानकदिव्यास्त्रप्रहारातिघोरे मेघनादोपमसिंहनादक्ष्वेडिततुमुले दिविषद्दानवानां महासांपरायिके दिवि शस्त्रैः शस्त्रैरन्योन्यं प्रहृत्य ततः सर्वेष्वायुधेषु शतधा सहस्रधा विदीर्णेषु दण्डादण्डि बाहूबाहवि केशाकेशी नखानखि च प्रवर्तमाने दिवौकसामाधिपत्यं जिघृक्षुभिः प्रबल्योत्सिक्तयमदंष्ट्रपुरोगैरसुरसैन्यैः क्रदयैर्भृशं कदर्थितेन सहस्राक्षेण शतमन्युना मम साहाय्यं कुर्वित्यार्तस्वरेणाभियाचितशीघ्रोपकार आर्तबन्धुरुत्साहशक्तिसम्पन्नः शतानीकः शक्रसारथिना मातलिना मातरिश्वजवव्योमस्यन्दनमारुह्य मंक्षु दिवमेत्य सानुचरस्य ससहयुध्वनो वृद्धश्रवसोऽतिविस्मयविस्फारितसहस्रनेत्रस्य साधुवादपूर्वकं सविस्मयं प्रेक्षमाणस्य महासंयुगाजिरे सहेलमापाततो बाहुबलदर्पितांस्तान् यमदंष्ट्रप्रमुखान् सुरद्विषो बहून् निहत्य यमसदनं नीत्वातिमानुषपराक्रमविस्मापितसुरासुरोऽपि निशितधारायुधसंपातव्रणितवर्ष्मा सुमहदभ्यामर्दोप-

संहारे चरमं वीरसदृशं दिष्टान्तमवाप्तः संग्रामाजिरनिहततेजस्विसांयुगीनप्रियाभिरप्सरोभिरहमहमिकया स्वयंवरभर्तृत्वे वव्रे। इत्थंकारं स्वर्वधूवृतामर्त्यात्मनः सर्वलोकैकधनुर्धरस्य महावीरस्य तस्य भूभुक्कुञ्जरस्य निखिलदिविषद्वृन्दसप्रश्रयणविहितसंस्क्रियापूतमाखण्डलसमादिष्टेन प्राजित्रा मातलिना भुवमानीतं कलेवरं प्राप्य जगदेकवीरपितृनिधनविदेदीर्यमाणहृन्मर्मा युवराजोऽजस्रप्रवहद्वाष्पौघोच्छूनलोचनः सहस्रानीको नृपोचितां श्राद्धक्रियां चकृवांस्तत्समनन्तरमेव भुवि कीर्तिशेषं गतवन्तं भर्तारमनुगतायां विष्णुमत्यां संक्रान्तराजलक्ष्मीको भूभारचिन्तनप्रवीणैर्विस्तृतराज्यधुरंधरैर्युगन्धरपुरस्सरैर्मन्त्रिभिः सानुनयं मातापित्रोर्विनाशशोकमपनीय प्रबोधितः पितृपैतामहं रत्नसिंहासनमारुरोह। तस्मिञ्जनकसमानाजय्यपुरुषकारे रूपसौदर्य्यनिर्जितकंदर्पाहिंश्रेयसि प्रत्यग्रयौवनारूढे सहस्रानीके नानाविधमणिकदम्बकखचितजाम्बूनदमयं स्वच्छेनात्मनो यशसेव तुहिनधवलेनातपत्रेण कौशेयेन वितानीकृतं पैतृकं भद्रासनमधिरुह्य पृथिवीं शासति ससामन्तानां निःशेषमहीभुजां दुर्धर्षाणां सदोन्नतशिरसामपि शिरांसि बलिष्ठकुलिशनिर्घाताभिहतानां महीरुहाणामग्राणीव प्रह्वतां जग्मुः। ततः काले यातेऽल्पीयसि परिपन्थिपराजयमहामहे सानन्दं स्वर्लोकेऽमरावत्यां प्रवर्तिते शतानीकसाहाय्यपराभूतासुरबलः कृतज्ञो नमुचिसूदनो देवदूतं मातलिं पुनः प्रेष्य समस्तविश्वसुदुर्लभस्य संकटसुहृद औरसं स्नेहबहुमानपूर्वमुपनिमन्त्रयाञ्चक्रे। सहर्षमुररीकृतनिमन्त्रणस्तन्म-

होत्सवदिदृक्षाविष्टमनाः सहस्रानीकोऽञ्जसा शतक्रतुलोकमागत्य प्रचुरदक्षिणोपहारसभाजनयुजा प्रशंसनीयेनातिथेयेन तेन पाकशासनेन सत्कृतो महामहयोग्योपस्करसामग्रीसमुपेतं यथातृप्ति निर्विशन् मनोहर्षयितुं महोत्सवविधिं नन्दनोपवने वरारोहाभिः कामिनीभिः समं स्वच्छन्दतो विहरतः परःसहस्रान् सदासुखिनोऽनिमेषलोचनांस्त्रिदिवेशाननिमेषलोचनो भूत्वा सस्पृहं दशं दशं किमपि किमपि मानसिकावस्थान्तरमनुबभूव । तत्क्षणात्तदवस्थस्य तस्य यूनो मनसिजभावाकूतं विदित्वा त्रिविष्टपाधिनाथः पुलोमजाजानिस्तं सकृपमभिवभाषेऽयि वत्स शश्वदानन्दथुमये मनोऽनुकूलेऽविज्ञातशोकजवाष्पोद्गमेऽजरामरे त्रिदशालयेऽत्र विशेषतः शत्रुविजयमहोत्सवावसरेऽस्माभिः सस्नेहमाकारितो वरिवस्यासंमानार्हः प्राघूर्णिको भूत्वा किमिति विषण्णवदन इवावलोलोक्यसे मा स्म खलु विपदः फलिष्यत्यात्मानुरूपदारपरिग्रहसमीहा त्वदीया नचिरेण, कर्णं देहि वदते मे, सहस्रानीक त्वदर्थे सृष्टपूर्वा तावकीनरूपाभिजनसदृशी सुरूपा जाया मेदिनीतले संजाता पुराहं चतुर्मुखं हिरण्यगर्भमुपासितुं विधूमाभिधेन वसुनानुगम्यमानः कमलासनभुवनमयासिषं तत्रैव संपूज्य पितामहं यथाज्येष्ठं गृहीतासनेषु सर्वेष्वस्मासु परमेष्ठिदर्शनार्थं मन्दगन्धवाहदरविगलितदुकूलमंजुला स्वर्वधूरलम्बुषा नाम मनोमोहिनी वरवर्णिन्युपासार्षीत् तां नेत्रमुपमप्सरसमवलोक्यैव स विधूमः काममोहितः कुसुमायुधशरव्यतामगात् ततः सापि चक्षुष्यं तं दृष्ट्वा विभ्रमकटाक्षबाणान्

तस्य वपुषि मुहुर्मुहुः प्रक्षिपन्ती मन्मथातुरा समवोभवीत् तत्क्षणं तयोर्दुर्विनीतं तादृशं चेष्टितं प्रत्यक्षीकृत्य संजातामन्दामर्षो ब्रह्मा सपद्यभ्य-शाप्सीज्झटिति मर्त्यलोके दुःखावहे विशृङ्खलमर्यादौ निपततं तत्रैव दुर्ललितौ काममूढचेतसौ युवां दंपती भविष्यथो नात्रेति कमलसंभवेन विरिञ्चिना शप्तोऽसौ वसुः स त्वं कौशाम्बी-पुरि शतानीकस्यामरकीर्तेस्तनूद्भवश्चन्द्रवंशालंकारचूडामणिः संवृत्तः सापि तच्छापादलम्बुषा वसुमतीतलेऽयोध्याधीश्वरस्य राज्ञः कृतवर्मणस्तनूजा मृगावती नाम समजनिष्ट या दुर्वारनियतिनि-योगादेव पुरा जीवितसमा ते भार्या भवतीति । श्रुत्वा दिवस्पते-रमृतसंकाशं वचो युगपदुद्भूतमकरध्वजसंधुक्षितकामाग्निप्रजा-ज्वल्यमानान्तरात्मा तद्गतमना भूत्वा ततः काले दिवौकसां प्रभुणा शचीपतिना यथार्हं सभाजयित्वा विसृष्टः क्ष्माभृत् सहस्रा-नीको मातलिना प्रचोदितेन विमानेन निजनगरीं प्रति प्रतिष्ठमानो मृगावतीध्यानतत्परमनस्कत्वाद् व्योममार्गे तद्रूपसौन्दर्याचरीकृष्य-माणमनसा त्रिदिवललनया तिलोत्तमया हे राजन् किञ्चित् ते निवेदयितुकामास्मि मुहूर्तं प्रतीक्ष्यतामिति सानुरागं प्राक्तोऽप्य-नादृततद्वाक्य इव पृषदश्वरंहसा प्रचचाल । अम्बरादतितरसा क्षितिमवतरन्तं तं युवानमवधीरणाव्रीडिता पृष्ठतोऽनुपतन्ती शशाप गगनेचरी तिलोत्तमा यस्माद्यया मुषितचेतास्त्वयि स्निह्यन्त्याः सुभगाया मम वचनं न शृणोषि नृप तस्मात्तया हृदयशोषणो विरहस्ते चतुर्दशसमाः संत्पसीष्ट, न खलु न खलु मादृश्यो मनस्विन्यः

कस्यचिदप्यनादरं तितिक्षन्ते हीति। इत्थं सरोषं तयाभिशप्तोऽपि बधिर इवानाकर्णिततदीयशापाक्षरो मेघवाहन-वाक्यामृतपुलकित-वपुर्वपुषा कौशाम्बीं मनसायोध्यां सौत्कण्ठमियाय कालेन चाल्पीयसा समासाद्य स्वीयं पुटभेदनं मृगावतीपाणिग्रहणविषयमुद्दिश्य युगन्धरसुप्रतीपपुरोगमैर्मौलैरमात्यैः सह संमन्त्र्य कालविप्रकर्षा-सहिष्णुरदृष्ट -- कान्तामुखेन्दुदिदृक्षापरिपूर्णहृत्सागरोऽवनिपतिः सहस्रानीकस्तामभियाचितुं राजदूतं तत्पितू राज्ञः कृतवर्मणोऽन्तिकं क्षिप्रं प्रजिघाय। ततोऽयोध्यापुरीमाजग्मुषो दूताद् वत्सेशस्य संदेशं सहर्षं शुश्रुवान् कृतवर्मा तं स्वदुहितृकरग्रहणयोग्यं वरं मत्वा महिषीं कलावतीमुपांशूवाद देवि वैवाहिकवयःस्था मृगावती परम-प्रेमपात्रमस्मद्दुहिता सततमस्माकं चिन्तामवहति दिष्ट्याद्य कौशाम्बीनाथसहस्रानीकसकाशात् तदर्थं संदेशहर इह समायातो यदि त्वमनुमन्यसे चन्द्रमसः कुलभूषणाय पितृसदृशातुलविक्रम-विभूतिसंपन्नाय तस्मै वत्साया हस्तं विश्राणयितुं कामय इति निशम्य च भर्तृनिगदितं देव कपिध्वजान्वयस्थितिकरोऽसौ सहस्रा-नीको वत्सोद्वाहनोचितोऽपरापेक्षया वरीयान् वरो भवेदिति मन्येऽद्य स्वप्नेऽप्यशरीरिणी वाक् समुदभूत् ते कन्यारत्नं वत्साधीश्वरस्य प्राणेश्वरी भविष्यतीति तदायुष्मन् कालक्षेपं परिहृत्य तस्मै नन्दिनी निश्चितमेव समर्प्यतामिति तया कलावत्या सानुरोधं प्रत्युक्ते स महाराजः संपूर्णकान्तिमेन्दवीं देवीमिवाभिनवलावण्य-मयीं तां दुहितरं रजनीकरकुलावतंसाय महातेजसे तस्मै यथाविधि

विश्राणयाम्बभूव । अथ प्राप्य तामभिनवयौवनविलासोद्यान-पुष्पमञ्जरीं रतिसर्वस्वभूतामप्रमेयानुरागतरङ्गिणीं कृतवर्मणे आत्मजामसौ मन्मथ इव द्वितीयो वेलातीतानन्दसिन्धुः सुधा-निधिवंश्यः संप्रमोदकोटिं समारुरोह ततश्च कालक्रमेण पुष्प-धन्वना संगता रतिरिव तेन संगता साप्यापन्नसत्त्वा भूत्वा सुधासिक्ता पौर्णमासी मृगलांछनकलेव गर्भगौरवालसगतिर्धावल्येन सुतरां विरेजे । अत्रान्तरे कुलक्रमागतानां महीक्षितो मन्त्रिवरेण्या-नां स्वस्वकुलधुरंधरा औरसा सुचिरादुत्पेदिरे, प्रधानमतिसचिवस्य युगन्धरस्य नन्दनो यौगन्धरायणो नाम बुद्धिमान् समुदपादि वाहिनीपतेः सुप्रतीपस्य तनयोऽतनुबाहुवीर्यशाली रुमण्वान् नाम समजनि तथा च नर्मसचिवस्य ब्राह्मणस्य नर्मावतार इव वसन्त-कनामा तनूजः समजनिष्ट । ततः कियति याते समये निशाकर-गर्भिणी क्षीराब्धियोनिरिव गर्भाधानातिशुभ्रानना सा सहस्रानीक-वल्लभा देव जङ्गमरुधिरभरिते कासारेऽहं सिष्णाषामीति दुर्निवारदोहदतर्पणं सत्त्वशोणितौघपूरितक्रीडासरोवरनिमज्जनं भर्तारं दौर्हृदवशादभ्यर्थयाञ्चक्रे देवि तथा त्वत्कृते दीर्घिकां रक्त-पूर्णां द्रुतमेव कारयिष्यामीत्युक्त्वा च परमधार्मिकेण महीभुजा भृत्यैरविलम्बितं काश्मीरजलाक्षारागपुञ्जान् समानाय्य तैरुणी-कृते सरसि प्रभूतजन्तुलोहितलोहितं तडागमिदमिति मन्वाणा सस्नौ । अहो बत विधिहतके प्रतिकूले नगु नोऽर्थः साध्यतेऽहह दग्धभाग्ये प्रातिकूल्यं गच्छति विपत् किंगु नोत्पद्यतेऽयुक्तोदयपिशु-

नमननुकूलदैवं केन वा पौरुषेण निवार्यते । दोहदच्छद्मनाथ कुंकुमालक्तकरङ्गरञ्जिते तत्र पद्माकरे स्नान्तीं मृगावतीं विलोक्य करालाकारभीषणो विष्णुवाहनकुलोद्भवः क्रव्यादः पर्वतोपमो महापक्षी सहसापत्य किंकर्तव्यताविमूढचेतसामतिविस्मितानां राजभृत्यानां सर्वेषां वाहूच्छ्रित्य रे रे पाप पक्षिकीट परित्यज देवीमिति हाहाकारोच्चारणपूर्वकमाचोक्ष्यमानानां पश्यतामपि तामामिषबुद्धया सुदूरमपजहार ततश्चातर्कितोपनतजीवितसंशयमूर्च्छितामप्युत्क्रान्तप्राणां तां निर्वर्ण्य सूर्याचन्द्रमसोरुदयशैले दैवनियोगादिव परिजहौ । जीवितेश्वरीं गृहीत्वा जगदेकमनोरथभूमिमात्मनः सर्वस्वं तां समीरणरंहसोत्पततस्तस्य खगेश्वरवैनतेयवंश्यस्य महापतत्रिणो दिशं रे रे दग्धविहंगापसद मे सर्वस्वचौर क्व यासि पतंगकीट निर्दय विमुञ्चैनां मेऽसुसमां दयितामिति प्रमुक्तकण्ठमुच्चैस्तमाक्रुश्य जवेन सर्वेणानुधावन् मनोजवतुरङ्गमारूढः प्रेयसीतिरोधानशतधाविदीर्यमाणहृन्मर्मा तां गवेषयितुं निर्ययौ ततोऽनेकतिथं कालं हे तुरंगहतक नाम्ना निरर्थकेन तुरङ्गोऽपि त्वं तुन्दपरिमृजोऽसीति वातेरितेनेव वेगातिशयेन सहेपारवं शफैः पांशुलं भूतलमुत्खायेव वावल्गयमानमतिजवनं निरंतरोद्गतधूलिपरिधूसरं तं हयोत्तमं चर्मतोत्रेणाभीक्ष्णं ताडयन् वहून्याश्वीनानि समतिक्रम्य पत्ररथाधममुपितभार्यान्वेषी क्वाप्यदृष्टमनुष्यसंचारां दुर्गमामटवीमाससाद तथापि सा न कुत्राप्यदृश्यत । अथ दुस्सहक्षुत्पिपासापरिश्रमपरिमृदितगात्रे सामिवितृतसृक्कोद्गीर्णलाला-

जले वाजिनि दीर्घाध्वपरिखेदारुणितदुर्बलेऽक्षिणी विघूर्णयति विषमोपलशकलोच्चावचे क्षितितले निपत्य पंचतां याते हृदयवल्लभाविनाकृतस्तपस्वी तत्परिमार्गणैकाग्रधीः सहस्रानीकोऽसह्यपीडां बुभुक्षामपि विस्मृत्य निर्मर्यादसीधुपानक्षीव इव निर्भरपरिक्रमजनितक्लमथुर्घूर्णिताधीरपादक्षेपः पादचारी कान्तारे गहने सर्वत्र परिचञ्चूर्यमाणः पुरूरवा उर्वशीमिव मृगावतीं गवेषयाञ्चकार तथापि सा क्वापि न ददृशे । हा प्राणसमे क्व नु गतासि देहि मे वचनं भो भोः पक्षिव्यंसक मदीयां हृदिस्थां कुत्रापनीतवानसि रे रे क्रूरपतत्रिदानव निष्कृपोऽपि सकृप एधि यदि तां मे प्रतियच्छसि तर्ह्यात्मनः प्राणानपि ते दास्यामीति क्षणं परिदेवयमानो हे उन्नतशिरसो वनस्पतयः किं जानन्ति भवन्तो वराकी मे पत्नी कस्मिन् प्रदेशे वरीवर्तीति क्षणमुन्मदिष्णुरिव व्यर्थमरण्येरुदितं कुर्वाण इतस्ततः परिबम्भ्रम्यमाणः पांशुमलपटलमलीमसपरिक्षीणविग्रहो भूरुहकंटकच्छिन्नजर्जरितपटच्चरोऽनारतपर्यटनस्फीतचरणपरिस्खलद्गतिरदर्शनं गतां तां परिमार्गयाञ्चक्रे तथापि हन्त सा न कुत्रापि प्रादुर्बभूव । इत्थंकारं बहुतिथं कालं दयितजायान्वेषी क्षुत्पिपासादौर्बल्यपरिमरीमृद्यमानसर्वाङ्गो नैराश्यनिर्वेदविनष्टचेतनो भूत्वापक्रान्तासुरिव मुमूर्च्छ तं च तथाभूतं वराकमवलोक्य दूरदर्शिना सहस्राक्षेण कृपणबन्धुना पुलोमजाजानिना सदयं तत्र प्रहितो मातलिरह्याय तं विमानेन कौशाम्बीस्थं राजभवनमानीय दिव्यप्रभावेन प्रकृतिस्थं कृत्वा प्रोवाच हे राजंश्चतुर्दशसंवत्वरांस्ते

भार्यावियोगो भवत्विति धृतिमुपं तिलोत्तमाशापं तदानीं किं नाश्रौषीस्तथापि मा स्म विषादं गम पुरा नरपतितल्लजस्य पुरूरवसो दयितावियोगोऽपि दीर्घसमाः संवभूव किं पुनस्त्वमसि समग्रलोकपूजितस्य सुधाशुभ्रसुधांशुवंशस्यानुत्तमं भूषणं भूपालमतल्लिका तस्माद् धैर्येण धैर्येणानन्यमना भूत्वा प्राज्यराज्यधुरमेवोद्वहन् कालमतिवाहय ततः शापावधौ परिसमाप्ते सति भूयस्तेऽसुसमासमागमो भवितेति तद्वचश्च श्रुत्वा सोऽपि राजपुंगवो हा प्रियतमे पश्य स्वर्वेश्या तिलोत्तमा निःसंशयमद्य पूर्णमनोरथा संजातेति मुक्तकण्ठं रुरोद । अत्रान्तरे तस्या देहमपहाय तस्मिन् खगराजे तिरोहितेऽपसृतमूर्च्छा शनैः संज्ञां लब्ध्वा गगनचुम्बिनीरन्ध्रवृक्षच्छन्नदुस्संचारादृष्ट-सूर्यकिरण पर्वतनितम्बस्थितमेकाकिनं निष्ठुरपक्षिनखरविच्छिन्नैकवाससं सर्वथा गतिहीनमनाश्रयमशरणं कर्कशहृदयेन कृतान्तेनाप्युपेक्षितमात्मानं सविस्मयं प्रत्यक्षीकृत्य भयविषादवेपमानतनूलता भीतभीतवीक्षणविक्षेपैः सर्वा दिशो विस्तीर्णनीलशतपत्रदलावृता इव कुर्वन्ती वक्षोरुहस्थलपर्यन्तनिरन्तरनिपतन्मुक्ताफलस्थूलबाष्प-बिन्दुविहितकृत्रिममौक्तिकहारयष्टिः सा मृगावती हा सनाथाप्यनाथा संजाताहं हा जीवितेश्वर दौर्भाग्यान्धकूपे पतिता क्षीणपुण्या दुर्भाग्या कदा नु खलु मदीयसर्वस्वस्य ते परिपूर्णकान्तिं वदनेन्दुं पुनर्द्रष्टुं शक्ष्याम्यहहा हतास्मि जीर्णोपानदिव दैवेनापि प्रतिकूलेन परित्यक्तास्मि त्वदाननसरसिजपुनर्दर्शनप्रत्याशयापि पश्चात्कृताहं कमर्थमपेक्ष्य जीवामीति सशोकं

तारं रोरुद्यमाना नैराश्यादात्महत्यां विधित्सुर्विकटकायस्य वन्य-दन्तावलस्य पुरतः स्वं शरीरं प्रचिक्षेप तथापि दयार्द्रचेतसीव तस्मिन् दन्तिनि पराङ्मुखीभूते सा भूय ऊर्ध्वसटाततास्यप्रतिभया-कारस्य कण्ठीरवस्य संमुखमात्मनः शोकार्तं कलेवरं परित्यताज तथाप्यसौ मृगेश्वरस्तां न जघान तदनन्तरं चैवमलब्धस्वच्छन्दमरणो-दानीं भृगुप्रपातोन्मुखी स्वप्नेष्वपि न जातुचिद् विस्मृतस्य प्राण-नाथस्य भर्तुः सोत्सुकमनुस्मरन्ती कण्ठप्रतिरुद्धाश्रुनिर्भरगद्गदं विलालप्यमाना कठोरपाषाणस्खलितचरणन्यासा कथंचित् कथंचिद् भृगुशिखरमारोहन्ती दरधविधिहतकदरधप्राया सा राजमहिषी तस्मिन्नेव मुहूर्ते कुशकन्दमूलान्वेषणार्थं यदृच्छया तत्रोपस्थितेन ततो विदितयथावृत्तोदन्तेन कृपानिधिना केनापि मुनिपुत्रेण समाश्वास्य महर्षेर्जमदग्नेराश्रमं निन्ये। तत्र तपोवनाश्रमे महतां तेजसां राशिं मूर्तिमन्तं समाश्वासमिव स्थिरधृतिदं शरीरिणमानन्दमिव विषाद-नुदं सुप्रसिद्धयशसं परशुरामजनकमयि वत्से मृगावति सहस्रानीकस्य प्रमोदाकरः शश्वच्छशिवंशयशोधरस्ते हृदयानन्दनो नन्दनोऽचिरेण जनिष्यतेऽद्यप्रभृति चतुर्दशसमासु व्यतिवाहितासु त्वद्भर्तृ समागमो निःसंदेहं भविष्यति मा स्म शोचीस्तत् स्वगृहस्थेव निश्चिन्ता तापसैरस्माभिः सार्धमिह वीतशोका यथासुखं निवासं कुरुष्वेति-ब्रुवाणं जमदग्निं प्रणम्य तेन मुनिकुञ्जरेण यथोपदिष्टं तथैव कर्तुं मनश्चक्रे ततश्च दिवसेषु कतिपयेषु क्षपितेषु भर्तृविश्लेषाति-दुःखितापि सौभाग्यवती भागधेयोदयशंसिनं पुत्रं सुभगा कौशल्या

दाशरथं रघुनन्दनमिव समस्तराजलक्षणशोभितं सुपुवे । तस्मिंस्तनयरत्ने जाते तदानीं गगनसंभवा शुभंयुः सरस्वती समुद्बभूव यत् सकलजगद्वन्द्यामितप्रभादेदीप्यमानशाश्वतिकमूर्त्योः सूर्याचन्द्रमसोरुदयमहीध्रेऽवाप्तश्लाघनीयजनुः शशाङ्कवंशोदयहेतुरयं शिशुर्भाविसार्वभौमो नाम्नोदयनो भूयादिति । ततः कालेन जमदग्निना स्वयं निष्पादितराजन्योचिताविकलसंस्कारविधिर्मातुराशाबन्धो बालशशाङ्कस्तन्मनोरथशतैरात्मनश्च प्रशंसनीयसदाचारशीलगुणैः साकं प्रववृधे क्रमाच्च मुनीन्द्रग्राहितश्रुतिधनुर्वेदराजनीतिपुरस्सराशेषशस्त्रशास्त्रविद्यागमकृतमुखो नानाविधदुरधिगमकाव्यार्थपरिशीलने निष्णातो विपश्चिद् बहुप्रकारसांग्रामिकायुधप्रयोगेऽपि कुशलोऽतनुवीर्य आयुधीयश्च भूत्वा पितामहनीकाशस्य करुणावात्सल्यार्द्रार्द्रचेतसो जामदग्न्यजनकस्य वत्सवत्सलाया जनन्याश्च नयनानन्दनः संववृते । अथ कदाचिन्मृगव्यरसाकृष्टो राजपुत्र उदयनः कृष्णसारादिमृगयूथबहुले कानने पर्यटाट्यमानो वनेचरेण निषादेन गृहीतं रज्जुसंदानितरज्ज्वाकारवपुषं दुर्गतं सरीसृपं निशाम्य भोः पुलिन्द प्रचुरेषु श्वापदेषु त्वद्ग्रहणयोग्येष्वत्र वर्तमानेषु तुच्छेनानेन भुजंगेन किं प्रयोजनमतो मुच्यतामयं कृपण इति तमूचिवांस्ततश्च हे क्षत्रियबालक यावदेषः काकोदारोऽकिञ्चनस्य मम केवला जीविका भवति तावत् कथमेनं परित्यजामि निर्धनः सर्पाजीवः सर्पविदहमस्मीति तेन प्रत्युक्ते कृपाविष्टमना वदान्यो निजमातृविश्राणितं सहस्रानीकनृपनाममुद्रितं मणिबन्धभूषणं प्रकोष्ठादवरोप्य तस्मै

दत्त्वा तं दर्वीकरं मोचयामास । गृहीत्वा मणिखचितसुवर्णकटकं सहर्षमन्तर्हिते तस्मिञ्शबरे स चक्षुःश्रवास्तत्क्षणात् सुन्दराकृतिना नागेन परिणतोऽग्रतो बद्धाञ्जलिः साष्टांगपातं दण्डवत् प्रणम्य प्रीतिविकसितवदनः प्राणद सोऽहमस्मि धृतराष्ट्रात्मजः किन्नरो नाम कामरूपो नागो ब्रूहि दासोऽहं किं ते मदीयजीवितसमुद्धर्त्रे प्रिय-मुपहरामि सुदृढं बध्नीयाव शश्वदविनश्वरं सख्यं शुभोदर्कं शुभशकु-नेऽद्यैहि सखेऽस्मदधिष्ठितलोकं रसातलं ते दर्शयामीति कृतज्ञताप्रदर्श-नपुरस्सरं निगद्य तं राजसूनुं पातालमनन्तवैभवसमृद्धं निनीवांस्तस्मै राजोचितसपर्योपहारपूर्वकं नागलोकचन्द्रिकां मनोभवलीलापुष्पां-जलिं मत्तकाशिनीं ललितासंज्ञां ललितरूपां स्वसारमर्पयाम्बभूव । ततः प्रियासहवाससुखितेषु तेषु तेषु वासरेषु हृदयंगमसुरतमहोत्सव-मयेषु व्यतीतेष्वथ भ्रूणोत्पत्तिसमयावधिकशापश्रृङ्खलितायां भार्यायां ललितायां गर्भमाधाय भर्तृप्रमुखं बन्धुसुहृज्जनमामन्त्र्य निजं विद्याधरीपदं पुनरुपगतायां नृपतनय उदयनोऽपि रसातलाधि-पेन समर्पितामम्लानताम्बूलीसुमनोमालाघोषवतीवीणासमन्विता-मुपायनसामग्रीमादायोदयगिरिस्थतपोवनाश्रमपदं प्रतिजगाम तच्चासाद्याभिमन्युः सुभद्राया इव दिव्यदृष्टिना मुनिपुंगवेन सान्ते-वासिना ते पुत्रकोऽद्य वा श्वो वा नूनमागमिष्यतीति सानुकम्पं समाश्वास्यमानायाः पुत्रतिरोधानद्विगुणीकृतभर्तृविरहशोकानल-दन्दह्यमानसुकुमारहृदयकुसुमाया दिवसान्येतानि कुतस्तस्थिवांस्त्व-मिदानीं चिरादागतोऽसीति सनिन्दमिव वदन्त्या मातुरतृप्तायां

दृशि पीयूषधारामभिवर्षन् यथासंवृत्तमात्मन इतिवृत्तं प्रश्रयणपूर्वं निवेद्य समुनिं तां वीतशुचं विदधौ। तत्रान्तरे स आटवीकः सर्पाजीवः स्वजीवनसमयेऽप्राप्तपूर्वमपुनःप्राप्यं महामूल्यं जाम्बूनदरत्नवलयं समादाय दरिद्रमपि सहसा महाधनीभूतमिवात्मानं समर्थयमानः संहृष्टमनाः किमेतत् सत्यमथवा मायामयं किं मया मृगतृष्णिकाम्भसि न स्नातमुताहोस्विन् मया शशशृंगमयं कार्मुकं न धृतं, नैवं, मन्ये, दूरे तावत् तिष्ठतु विचिकित्सा यथा सर्वमिदं तत्त्वतस्तत्र कानने प्रत्यक्षं समुत्पन्नमिति भूयो भूयः प्रत्ययार्थं तन्मणिबन्धभूषणं यथातृप्ति दर्शं दर्शं संप्रमोदविस्फारितस्मेरलोचनो यथाशीघ्रं सुवर्णकारापणे तद्विचिक्रीषुर्महानगरीं कौशाम्बीं प्रति प्रतस्थे ततश्च कियति काले समतीते द्राघीयांसमध्वमार्गमतिक्रम्य कौशाम्बीं प्राप्य क्वचिद् विपणौ सुवर्णवणिजे तददीदृशत्। दृष्ट्वा महाराजसहस्रानीकनामाङ्कितं चामीकरमणिकङ्कणं सपदि शङ्कादोलारूढोऽसौ कनकव्यापारी तं निःस्वमपि बहुमूल्यवलयविक्रयार्थिनं वनेचरं गृहीत्वा राजभवनं गत्वा सर्वास्थानस्थाय वसुंधराधीश्वराय विज्ञापयाञ्चकार। अथ हृदयवल्लभाकोमलभुजलतासंसर्गसुभगं मणिकङ्कणं हस्ते कृत्वा दुर्विषहतद्विप्रलम्भसंतापातिशयतनूकृततनुः प्रखरनिदाघपरितापितो मेघनादानुलासी मयूरो जलादागमोन्मुख इव प्रेयसीसमागमोत्कलिकाकीलितहृदयो विरही सहस्रानीकः किमपि किमपि विचारं विचारमहो किं नु खलु चतुर्दशसमा दुस्स्वप्नपरम्परा इव व्यतिवाहितप्रायाः संवृत्ता

इति सदीर्घनिःश्वासमुदीर्य भोः सुमते वनेचर नाहं निर्धनं त्वां दण्डयिष्यामि वद कुतोऽस्य बलयस्यागम इति सानुरोधं स्वयं तं भीतभीतं पप्रच्छ तच्छ्रुत्वा च दण्डवत् प्रणतिं कृत्वा तेन मातंगेन सर्वजनाभयद महाराज याथातथ्यवादी नाहं तस्कर इति प्रस्तुत्य सविस्तरमुदयाचलकानने दीर्घपृष्ठग्रहणादारभ्य संवृत्ते सुवर्णमणिकङ्कणलाभोदन्ते सादरं विज्ञप्ते वासरशेषं कृच्छ्रादतिवाह्य सम्यक्सज्जीकृतदीर्घप्रयाणसंभार उत्तरेद्युः प्रातस्तरां मन्त्रिपरिजनपरिवारितश्चतुरङ्गवरूथिनीकृतानुयात्रः शुभ्रोपवाह्यारूढः प्रायशः प्रक्षीणतिलोत्तमाशापावधिः स मृगावतीजानिः पुरतो मार्गदर्शकेन तेन राजातिसृष्टपारितोषिकपरितोषितेन शबरेण नेनीयमान उदयशिखरिप्रयाणमार्गे तस्थौ। समतिक्रम्य विप्रकृष्टमध्वानं भूभृदसौ प्रदोषे समायाते कस्मिंश्चिद्वनपद्माकररोधसि समुत्थापितशिविरस्ततः ससैन्यपरिवारः प्रयाणजनितं परिश्रममपनेतुं शय्यागतोऽपि प्राणसमासंगमोत्कण्ठापसारितसुषुप्सः शय्यायामितः ततः परिवर्तमानो विनिद्रश्चतुर्दशवर्षाणि तया विनाकृतत्वादतिभृशोत्कण्ठितचेतोवृत्तिः साभिलाषं तामनुदाध्यायमानो यावदासाञ्चक्रे तावत् सपर्यायै कथोपाख्यानकोविदः संगमको नाम कथिको राजनिवेशं प्रविवेश प्रविष्टं च तमुद्वीक्ष्य स्वागतं ते संगमक कथय बहुहायनविश्लेषितमृगावतीपुनःसमागमसुधारसास्वादतर्षुलाय मे किञ्चन वियोगसंतप्तमनोहर्षयित्नु कथानकमित्युवाद। आयुष्मन् किमर्थं मुधा परिखिद्यसेऽद्यश्वीनं सन्निकृष्टं

देवीसंगमं विद्वानपि, संसारचक्रेवत् संयोगवियोगचक्रमध्यनारतं परिवरीवर्ति संयोगा अपि वियोगोदर्का वियोगा अपि संयोगावहा बोभुवत्यत्र निदर्शनरूपमुपाख्यानमाख्यामि शृणु यदि ते रुचिरिति प्रस्तावं कृत्वा स कथिको वक्तुमुपचक्रमे विश्वंभरानाथ भारतवर्षमध्यमभूमण्डलमण्डणभूतेषु मालवेषु बभूवतुः पुरा कुलिनावनवद्यविद्यासद्गुणसंपन्नावग्रजन्मानौ कालनेम्यभयनामानौ परस्परानुरक्तौ भ्रातरौ तयोश्च पूर्वजः कालनेमिर्वैभवसमृद्धिवाञ्छया होमयज्ञैर्विष्णुवक्षस्थलसुखविहारिणीं लक्ष्मीं सततमाराध । अथ तद्विहिताविच्छन्नाग्निहोत्रसंतोषिता सा श्रीः साक्षात् प्रादुर्भूय तमभिदधे कालनेमे प्रीतास्मि लप्स्यसे विभूतिं च महीभुजमौरस्यं च मम वरात् परन्तु यतस्त्वं मदर्थे तृष्णाकलुषितेन मनसा हवींषि जातवेदस्यहौषीस्ततोऽन्तिमे मलिम्लुच इव त्वं निस्तर्हणं प्राप्स्यसीति । ततः कनीयसि भ्रातरि जनपदान्तरं गते कालेन कालनेमिर्लक्ष्मीप्रसादाद् धनाढ्यो भूत्वा सुतमपि लब्ध्वा च श्रीवरादवाप्तोऽयं मे पुत्रक इति श्रीदत्तसंज्ञां तस्य चकार । क्रमाद्वयसा विद्याभ्यासेन च वरीवृध्यमानोऽसौ प्रत्यग्रतारुण्यविकस्वरचक्षुष्यवर्ष्मा विप्रपुत्रोऽपि सन् वृकोदर इव शस्त्रप्रहरणेषु नियुद्धेषु चाप्रतिद्वन्द्वः श्रीदत्तस्तद्रूपविद्यागुणबाहुबलप्रीतेन गुणज्ञेनापि दोषज्ञेन तत्रत्येन नृपेण वल्लभशक्तिना निजतनूजस्य विक्रमशक्तेर्मित्रतां गमितो राजकुले वसति विदधौ तस्य च बभूवुस्तदीयातुलभुजवीर्यनिर्जिताः प्रकृष्टतच्छीलसौजन्याकृष्टमानसा बाहुशालिप्रभृतयो

बहवः सुहृदो येऽविकारेण मनसा शरण्यमिव तं नित्यशः समाशिश्रियिरे । अथ जातु वारिवाहागमप्रमुदितसकेकारवोत्कंधरशिखण्डिशिखण्डताण्डवमनोहरीषु प्रियसंगमोत्सुकप्रोषितभर्तृकाचित्तप्रमाथिनीषु वर्षासु राजसूनुसखः श्रीदत्तः क्रीडारसासिस्वादिषाहृतचेतोभिर्वयस्यगणैः समं तरंगिणीकूले क्रीडितुं किल निर्जगाम तत्र च पुलिने समवेत्य ये विक्रमशक्तिवशंवदा अनुचरास्ते तं राजकुमारं कृत्रिमराजं विदधुर्ये चान्ये श्रीदत्ताधीना वयस्यास्ते तं स्वीयं कृतकराजं कृत्वा सुखं विहर्तुं प्रारेभिरे । तावन्मात्रेण संजातेर्ष्यामर्षविकृतवदनो दूरीकृततितिक्षोऽसहिष्णुर्विक्रमशक्तिः सभ्रूभंगं युद्धाय श्रीदत्तं तूर्णमाहूय तेन सह दण्डादण्डि बाहूबाहवि च नियोयुध्यमानः प्रबलदोर्दण्डशालिना तेन पंकिले वालुकातले सावहेलं साष्टांग निपातितः सन् प्रज्ञाचक्षुस्तनूसंभव ईर्ष्यालुरमर्षणो दुर्योधनोऽतुलपराक्रमस्य भीमस्येव तस्य श्रीदत्तस्योपांशुवधे ह मनो ववन्ध । विज्ञाय पापस्य तस्य निकृष्टहिंस्राशयं तत्क्षणमेव निजमित्रवृन्दकृतानुगमः श्रीदत्तो रहस्तत्सकाशात् कांदिशीक इवाह्लायापससार दूरवर्तिनं च विदेशं गच्छंस्ततो मध्येगंगं झंझावातसंक्षोभितकल्लोलकम्पितां गतिहीनां नावमिव तरंगितप्रवाहवेगजेह्रीयमाणविग्रहामवलामवलां मां परित्रायस्व परित्रायस्वेति तारमाचाक्रन्द्यमानामारादवलोक्य तां समुद्धर्तुं कालक्षेपासहिष्णुर्द्रांग्वारिमध्येऽवगाह्य तां केशेषु जिघृक्षुर्निमग्नामनुसृत्य निममज्ज ततश्च क्षणान्तरे शांभवं दिव्यायतनं तत्र च

पारिजातादिकुसुममाल्यैर्घ्राणतर्पणसौगन्ध्यवाहिभिर्मञ्जुलैःस्तुतिशतैश्च श्रवणसुभगैस्त्रिपुरान्तकं वृषध्वजं संपूजयन्तीं तामेव स्त्रियं ददर्श न पुनर्वारिप्रवाहम् । सुधांशुमौलिं खण्डपरशुं सभाजयित्वा पेशलपारितथ्यालंकृतधम्मिल्लपाशा हीरकमयकुण्डलयुगलविभूषितकर्णपाली मुक्तावलीपरिष्कृतपीनोन्नतकुचस्थलशोभिनी तुहिनधवलाप्रपदीनकौशेयांशुकसंवीतसर्वांगाभिरामा सविभ्रमचरणन्यासकलकलकूजितहंसकमनोहरी मूर्तिमती लावण्यसंपदिव हंसगामिनी सा ललना दिविपदीश्वरहर्म्यप्रतीकाशं शातुकुंभरत्ननिर्मितं चतुरस्रविराजितं समुच्छ्रितमन्दिरं स्वकीयं प्रविश्य दर्शनीययोषित्सहस्रपरिवारिता मणिपर्यंके निषसाद । अनुसृत्य तां सोऽपि तत्र प्रविश्य किमेतद् वासु का त्वं किमर्थमत्र सुमहदाश्चर्यबहुले मामानैषीः सुदति गोप्यमत्र न चेत् तर्हि कथ्यतामिति सानुनयमनुयुयुजे । श्रुत्वा तद्वचः कण्ठनिरुद्धवाष्पगद्गदं सा निजगाद श्रूयतां यदि कौतूहलमेषाहमस्मि सुरवैरिणामधिनाथस्य विरोचनस्य कन्या विद्युत्प्रभा नाम मन्दभागिनी पुरा श्रीवत्सलांछनो विष्णुः स्वानिष्टकारिणमस्माकं पितरं पशुमारमवधीत् ततश्चास्मान् नगरान्निर्वास्य पुरप्रवेशप्रतिरोधकमचलोपममहाकायातिघोरं केसरिणमन्तरालेऽतिष्ठिपद् येन नो हृदयानि पितृविनाशशोकसंतप्तान्यपि खलु परिशोशुष्यन्ते हे मनुजवीर प्राग्धनदशापात् सिंहभावं प्राप्तो यक्षोऽस्मत्पुरीं संनिरुणद्धि धृतसिंहरूपो यस्य शापपर्यवसानं नूनं भविष्यति यदा स मनुष्येण हनिष्यत इत्यपि गरुडध्वजेन तेन

स्वयमवादि तस्माद्धे अप्रतिमवीर्यवन् नः शत्रुपाशो मृगरिपुस्त्वया विशस्यतां केवलममुमर्थमपेक्ष्य मायाप्रभावेन त्वामत्र समानैषं निहतात् तस्मात् केसरिणः सर्वलोकसुदुर्लभो निशितधाराप्रभास्वरश्चन्द्रहासस्त्वयोपलप्स्यते यन्महानुभावेन कृत्स्नां महीं साकल्येनात्मसात् कृत्वा भूमिपालोऽवश्यं भविष्यसि नात्र कोऽपि विचिकित्सालव इति। तथैव करिष्यामीति निगद्य महावीरः श्रीदत्तो दैत्ययोषिद्भिर्दर्शितमार्गो निर्गत्य दानवपुरसंरोधकं विततास्यदर्शितभीषणदंष्ट्रं गर्जन्तं महासिंहमकुतोभयोऽसिधेनुप्रहारेण बलात्कारेण जिहिंस तत्समनन्तरं च गृहीतशोभनपुरुषरूपात् कुबेराभिशापमुक्तिसंतुष्टात्तस्मात् सर्वश्रेष्ठखड्गरत्नमवाप्य कृतज्ञया विद्युत्प्रभया सबहुमानं विश्राणितं सर्वाकारविषघ्नमंगुलीयकमुररीकृत्य च यथागतं भागीरथीतटं निर्ययौ। निर्गत्य जाह्नवीसमीपवर्तिनि पथि गच्छन् सुहृद्विरहातुरं निष्ठुरकाभिधं वयस्यमवलुलोके तं च गाढमालिंगय विदितस्ववृत्तान्तं कृत्वा बान्धवमित्रगणोदन्तं पप्रच्छ। तेन पृष्टो निष्ठुरकः सविषादं व्याजहार त्वयि भीष्मसूजलान्तरेऽन्तर्हिते कालधर्मपाशाकृष्टे राज्ञि वल्लभशक्तौ कथाशेषीभूते चामात्यैः संभूय तत्सुतो विक्रमशक्तिर्भद्रासनमारोपितोऽपरेद्युस्त्वद्वैरनिर्यातनाशयान्धीभूतस्तव पितुरन्तिकं गत्वा साटोपं तमप्राक्षीत् कालनेमे कुत्र वर्तते ते पुत्रापसद इति तद्गर्जितमाकर्ण्य जनकेन विक्रमशक्ते क्वापि प्रयातस्य मे पुत्रकस्य महान् कालः समतिक्रान्तस्तथापि मन्दभागोऽहं तस्य प्रवृत्तिं न जानामीति प्रतिवचने

दत्तेऽमर्षमन्युरक्तीभूतनेत्रः सोऽभिनवलक्ष्मीमदमत्तो नृपकीटोऽनेन नूनं श्रीदत्तः कुत्रापि गोपितः स्यादिति मनसि विधाय चौरवत् तं ते जनकं न्यसूदिष्टेति। आकर्ण्यैतदकांडवज्रनिर्घातकल्पं नितान्त-निर्विण्णमनाः सुहृद्गणसंगमार्थमुज्जयिनीं ययासुः श्रीदत्तो निष्ठुरकेण सह प्रस्थितो दुर्लभमनुष्यसंचारं गहनं कान्तारं प्राप्य तत्र सशोकं रुदन्तीं कामप्यंगनां दृष्ट्वा सायंकाले शोककारणं तां सदयं पप्रच्छ। एकाकिनी मालवजनपदं गन्तुकामाहं प्रचरन्ती दिङ्मोहभ्रष्टमार्गास्मीति तयोक्ते श्रीदत्तो न भेतव्यं न भेतव्यमिति तामाश्वास्य तया समं कस्मिंश्चिन्निर्जने मन्दिरे निशीथिनीं क्षपयितुं प्रविवेश। अथार्धरात्रे दुःस्वप्नप्रबोधितो युगपदुत्थाय श्रीदत्तो प्रियवयस्यं निष्ठुरकं निहत्य तत्पिशितं यथारुचि बुभुक्षितां सिंहीमिव भक्षयन्तीमूर्ध्वकेशकरालदंष्ट्रां रात्रिंचरीं दृष्ट्वा राजराज-शापमुक्तयक्षोपहृतं प्रदीप्तद्युतिं तं करवालमुद्धृत्य तां क्रव्यभुजं केशेष्वतिदृढं गृहीत्वा रे रे निस्त्रिंशे तेजितनिस्त्रिंशरसमिदानी-मनुभवेति सरोषमाकृष्य यावत्तस्याः शिरश्छेत्तुमुद्ययुजे तावत् सुघोरं राक्षसीरूपं सहसा विहाय धृतदिव्यविग्रहा सा पुलकितमानसा तं श्रीदत्तमभिवभाषे महानुभाव करुणानिधे मुञ्च मां नाहं राक्षसी पुरा प्रभुणा त्र्यम्बकसखेन कुबेरेण तपोधनस्य कौशिकस्योग्रतप-श्चर्याविघ्नार्थं प्रेषिता यक्षी तेन क्रुधा शप्ता रजनिचरी भूत्वे-दृश्यामवस्थायां जुगुप्सितायामभ्रंशं किन्तु सांप्रतं त्वदीयहस्त-संपर्कविधिके कौशिकशापे दिष्ट्या त्वत्करकमलस्पर्शेन परिसमाप्ति

गतेऽलकारपुरीं जिगमिषामीत्युक्त्वा भक्षितं मित्रं पूर्ववदक्षतशरीरं विधाय झटित्यदर्शनमियाय। दृष्ट्वा मृतजीवितं सुहृदं निष्ठुरकमतिर्विस्मयकोटिमारूढो रोमाञ्चितवपुः श्रीदत्तः सूर्योदये तेन साकं पुनरध्वमार्गे पदं न्यास ततश्च कालक्रमेणोज्जयिनीमासाद्य सुहृदां सर्वेषां प्रमुदितानां नेत्रयोरमृतनिर्झरं दृष्टिपातेन प्रवर्षन्निव मित्रेण बाहुशालिना प्रचुरस्नेहबहुमानपुरस्सरं स्वनिशान्तमानीतोऽद्भुताश्चर्यरसनिस्यन्दि स्वीयं वृत्तान्तजालं निरन्तरं कथयित्वा तैः सह यथासुखं तत्रोवास। ततो जातु मधुरमधुपाननिरतमधुलिट्कुलझंकारनिनादितमञ्जुलवञ्जुलबकुलवासन्तीपुष्पगुच्छपरिमलभरितदिगन्तराले सर्वंदमाधिज्यकार्मुककुसुमायुधपौष्पशरशरव्यभूताभिनवयौवनमदमत्तायुवयुवतीजनकोमलहृदयांकुरप्रह्लादिनि मधुरमधुसमये वसन्तोत्सवयात्रादिदृक्षावर्जितचेताः प्रत्यग्रतारुण्यविकसितस्मितानन: श्रीदत्तः सहचरैः सह निर्गत्य सर्वतो विकसितविचित्रपुष्पमञ्जरीप्रफुल्लरुचिरालोके चिरप्रतीक्षितवसन्तागमप्रमुदितनानाविहंगमकलकूजिते लीलोपवने सुखं विहरन् मलयजसुगन्धवाहदक्षिणवायुदरविलोलकौशेयमृदुलकेशहस्तां नवयौवनविकस्वरचारुवदनां देहिनीं मधुश्रियमिव लावण्यसागरस्य कौमुदीमिव शृङ्गाररसस्योत्पत्तिभुवमिव पुनः पुष्पधन्वनो भार्यामिवानुत्तमरूपसंपदभिजनभूषामिव दरीदृश्यमानामुज्जयिनीनाथस्य नृपस्य बिम्बकेस्तनूद्भवां मृगाङ्कवतीं निर्वर्ण्य सपदि गम्भीरायां मनसिशयवागुरायां निपपात। सापि राजदारिका मन्मथावतारमिव

सुदर्शनमतनुतेजसं श्रीदत्तमुद्वीक्ष्य पञ्चशरशरव्यतामेकपदे गत्वा तं प्रति दुर्निग्रहमनोभूसंपीडिताघटितमिथुनघटनाप्रवीणां मकरध्वजशासनसंदेशहरीमुभयवेतनां दूतिकामिव प्रथमानुरागशंसिस्निग्धविभ्रमविलसितामपाङ्गदृष्टिं मुहुर्मुहुः प्रेष्य गतागतं कारयामास। इत्थं सहसाविर्भूतप्रत्यग्रप्रेमभारव्याकुलां मनोज्ञवासन्तीकुसुमातिकोमलाङ्गयष्टिं तां तीव्रविषधरो दन्दशूकोऽकाण्डे भयानकयमदंष्ट्रातीक्ष्णाग्रैर्दशनैर्ददंश तत्क्षणाच्चोद्दामगरलवेगापहृतसंज्ञां भर्तृदारिकां दृष्टवा हा हा अब्रह्मण्यमब्रह्मण्यमहो कष्टं मन्त्रौषधीविदो राजभिषजः क्षिप्रमाहूयन्तामाशीविषदष्टां विनष्टचेतनामस्माकं बहुमतां राजपुत्रीमायुष्मतीं परित्रायध्वं परित्रायध्वमिति संभ्रमज्वलितानां किंकर्तव्यतामूढचेतसामाकस्मिककुलिशघातसंनिभविषमविषधरव्यसनातिभृशविक्लवानां परिचारिकादीनां युवतीनामाक्रन्दविक्रोशनव्यतिकरे कोलाहले सोरस्ताडनं समुत्थिते निमेषमात्रविलम्बासहः श्रीदत्तोऽयमयमागच्छामि विषवैद्य इत्याकुश्य वयस्यान्वितो मङक्षूपेत्य गरलापहमन्त्रजपनसमकालमेव तस्या अङ्गुल्यामसुरकन्याविश्राणितं तदङ्गुलीयकमाधाय कपटजाङ्गुलिकोऽपि सन् विषघ्नांगुलीयकप्रभावेनैव तां मृतकल्पां समुदजिजीवत्। एवंगते व्यतिकरे विदितसरीसृपव्यसनप्रवृत्तिः स्निग्धदुहित्रवस्थादर्शनोत्सुको भार्यासखस्तत्र द्रुतमागत्य राजा विस्मितः स्वस्थां तां दृष्टवा च वीतज्वरः श्रीदत्तमहिमस्तुतितत्परो भृशं जहर्ष तदनन्तरं च प्रतिनिवृत्य प्रीत्या प्राज्यकाञ्चनादिकं पारितोषिकं निजसुताजीवितप्रदाय तस्मै यूनेऽतिससर्ज।

तल्लब्ध्वा सोऽपि मित्रवृन्दसहितस्यात्मन आश्रयदायिने स्वजनयितृसमाय विश्रम्भपात्रस्य बाहुशालिनः पित्रे तत् सर्वं ददौ। ततो दुर्निवारमीनकेतनजनितहृदयशोषणपरितापसंतात्प्यमानवपुषि दुरुद्वहावस्थान्तरगते तस्मिञ्श्रीदत्ते कान्ताध्यानतत्परेऽत्यर्थं दुर्मनायमानेऽयि सौम्य तदानीं तीव्रदर्वीकरविषवेगाद् दिष्ट्या त्वया परित्रातापीदानीं तव तुल्यावस्था सा मे प्रियसखी मृगाङ्कवती मदनदर्वीकरदष्टा मोमूच्छ्यंमाना जीवितसंशये वरीवर्ति प्राणप्रदस्त्वमस्याः प्राणप्रियः स्वयंवरभर्तापि भवान्यथा सा पुरा जीवलोकादस्मादसंशयमेव तिरोदधातीत्येवमादि तदंगुलीयकप्रत्यर्पणव्यपदेशात् तत्सकाशमागत्य तस्या विश्वासभूमिर्भाविनिका नाम सहचरी तस्मै न्यवीविदत्। एवं गते ते सर्वे श्रीदत्तबाहुशालिप्रभृतयः सुहृदस्ततः सम्भूय वयं राजतनयामुपांशु युक्तितोऽपहृत्य गूढावसथार्थं शीघ्रं मथुरां यास्याम इति तया भावनिकया सह रहसि संमन्त्र्य यद्यत् प्राप्तकालं तत्तत् समग्रमनुतस्थुः। ततो निशीथे कन्यान्तःपुरगर्भवेश्म युगपदग्निसात् कृत्वा धृष्टनायकः श्रीदत्तः सखीद्वितीयां मृगाङ्कवतीं तैर्वयस्यैस्तत्क्षणमेव मथुरापत्तनमग्रतोऽनीनयत् ततश्च यथासमयमुत्तरेद्युः पृष्ठतः स्वयमनुसरन् मार्गे मार्गणक्षतवपुषं दुर्गतां भावनिकां दृष्टवोत्थाप्य विस्मितमनाः किमेतदित्यन्वयुंक्त। एवं पृष्टा सा राजदुहितुः सहचरी सनिर्वेदं प्रत्यभाषिष्ट किं वदामि हतभाग्या तथापि श्रूयतां भूमिपालेन प्रेषितैरश्वारोहैर्बहुभी राजन्यैस्तवदी-

नितान्तोद्भ्रान्तचेताश्चक्रवाकीविश्लेषितचक्रवाकवत् परमार्यतो-
ऽस्त्येनदिति कुर्वाणः कान्तारस्य विषादस्य च पर्यन्तं हृ न लेभे
नीत्वा कथंचित् तां निर्वेदातिरेकमहत्त्रयामायमानत्रियामां
त्रियामां प्रातस्तरां यत्नतः सरणिमन्विष्य तमेव छायातरुमासा-
द्यापि दयितां मृगांकवतीं न ददर्श तदनु तत्कृपाणरत्नं भूतले
निधायेतस्ततस्तामन्वीक्षितुकामस्तं विकटभूरुहं तूर्णमारुह्य कुत्रा-
पि दृग्गोचरे तामलब्ध्वा तद्विरहविवशः सशोकं प्रमुक्तकण्ठं रुरोद ।
अथान्तरे कोऽपि करालाकृतिः किराताग्रणीस्तेनैव वर्त्मनाकस्मा-
दागत्य तरुमूले निहितं सर्वलोकदुष्प्रापं दीप्तद्युतिं तं कौक्षेयक-
मुदवार तं च धृतानर्घचन्द्रहासं पुलिन्दमवलोक्य सपदि वृक्षाद-
वतीर्य भो वनेचर यौवनारम्भस्था सुतनूर्वनस्पतिमूलेऽवासीना
मेऽसुसमा त्वया किं नु दृष्टेति सोत्कण्ठमप्राक्षीत् । एवं पृष्टेन
तेन दिवाकीर्तिना हे सौम्य मदनुचरैः किरातैस्तव भार्या वन-
पल्लिकां नीता तदितो मार्गेणानेनास्मद्गेहं याह्यनुपदमागत्येमं
तेऽसिं प्रतियच्छामीति सवितर्कमुक्ते प्रियतमादर्शनप्रत्याशासमा-
श्वासितमानसः श्रीदत्तः परिखेदपरिस्खलितचरणन्यासोऽपि
तैः शवरैर्नीयमानो वनेचराधिपस्य वसतिं प्राप्य सुभग
परिश्रान्त इव दृश्यसे यावद् वयं बहिर्गत्वा ते हृदिस्थामि-
हानयामस्तावन्मुहूर्तं विश्रान्तिसुखमनुभवेति तैरुक्तो दीर्घकालमृगा-
ङ्कवतीपर्येषणापरिक्लेशेन नितरां पराभूतत्वाद्दुरामसुषुप्साग्रस्तः
सन् क्षिप्रं सुष्वाप । समयेऽतीते कियति सुप्तप्रबुद्धः स कठोर
लोहशृङ्खलानिगडितहस्तपादं बंदिग्राहं गृहीतमात्मानं दृष्ट्वातिवि-

स्मयव्याकुलः किमेतदकाण्डे संजातमहो महदत्याहितमित्याचुक्रोश तं चैतदवस्थं दुर्गतिपतितं तपस्विनमुद्वीक्ष्याप्रतिमतदाकृतिसौन्दर्यविजितान्तरात्मा किराताधिपपुत्री सर्वकषमकरध्वजपुष्पबाणविद्धहृदया सती सविलासापाङ्गवीक्षणपुरस्सरं तमभिदधेऽङ्ग कस्मादत्र मरणायायातोऽसि पुलिन्देश्वरो मे जनकश्चण्डिकोपहारार्थं त्वां युक्त्यातिसंधाय समानैषीत् किन्तु कार्यान्तरगौरवादद्य जनपदान्तरं प्रति प्रस्थितः कियति काले समतिक्रान्ते प्रतिनिवृत्य सज्जीकृतपुरुषमेधसंभारो रुद्राण्यै त्वामुपहारीकरिष्यति सौम्य प्रथमदर्शनमात्रसंजातप्रेम हृदयं मे त्वयि सुतरामनुरज्यते यतो मन्मथातुरां मां भजस्व ततस्ते योगक्षेममपि नूनं संजनिष्यत इति । श्रुत्वा तद्वाक्यं गत्यन्तराभावाद दयितमृगाङ्कवतीसमागमोत्सुको बन्धनान्मुमुक्षुरसौ युवा गान्धर्वविवाहविधिना तत्क्षणमेव मृदुहस्तसंवाहनपुलकितचुचूकाभिरुचिरपीनस्तनीमतिशयहृदयंगमनिधुवनरसकुटिलीकृतपेशलांगीं शवरराजकन्यां तां वरारोहामारुह्यातिवेलं परिचुम्बन्नुपयेमे । ततः प्रभृति सततप्रत्यग्रीभूतोल्बणस्नेहपीयूषधारापूरितहृदयकूपा सा सुन्दरी प्रतिरात्रं स्वयमपाकृतचरणनिगड़ेन तेन तरुणेन साकं प्राज्यसुरतमहामहं यथातृप्ति निर्विवेश क्रमाच्च सापन्नसत्त्वा भूत्वा क्रोधालोः पितुर्गृहागमनसमये सन्निकृष्टे कान्तविरहासहापि परस्परपुनःसङ्गमसमयं विधाय कामुकं तं सर्वथा बन्धनादमूमुचत् । अथ चिराद् विमोचितशृंखलः स कामी हे सुभ्रु यो मे दिव्यचन्द्रहासः पित्रा

तेऽग्राहि तं मे सर्वस्वकल्पं यथाकथंचिद्धस्तेकृत्य पुनर्दर्शनसमये सुरक्षितं मे दत्स्व साधयाम्यधुना स्वस्ति तेऽस्त्विति तां किरातकामिनीमभिधाय कान्त न कर्हिचिदप्ययं जनो विस्मरणीयः क्षेमंकराः शुभंयवस्ते भूयासुः प्रयाणपन्थान इति तस्या आशीर्वादमप्युपलभ्य मृगाङ्कवतीपरिमार्गणाय द्रुतं प्रतस्थे। यत्र छायाभूरुहतले पिपासातुरा प्रियतमोपवेशितपूर्वा तत्रैव पुनरागत्य स विरही पुरतो यदृच्छयागच्छन्तं प्रवयसं मृगयुं दृष्ट्वा भो व्याध किं त्वया यदृच्छयापि नवयौवनारूढा नीलसरसिरुहलोचना वरवर्णिनी मे कान्ता क्वाप्यदर्शीति प्रेयसीप्रवृत्तिं तं सुमनसमप्राक्षीत्। किं त्वमेव श्रोदत्तनामासीति तेन लुब्धकेन सशङ्कं व्याहृते पुनश्च स सोत्कण्ठं सस्पृहं चावादित् सोऽहमस्मि सौभाग्यपश्चात्कृत ईदृगवस्थ इति। सोऽपि वयोवृद्धो मृगाजीवस्तं प्रत्युवाद यदक्लेशार्हा काप्यभिजनरूपसंपन्ना योषिच्छोकोद्विग्नमानसा क्रन्दन्ती मयात्राटव्यां दृष्टा सापि दृष्टिगोचरे निपतितं मामुद्वीक्ष्य किं मे जीवितनाथस्तेजस्वी श्रीदत्तो दृष्टो न वेति सविषादं मामन्वयुक्त ततस्तया सम्यग् निवेदितयुष्मद्वृत्तान्तः करुणाविष्टमना अहं कथमपि तां सांत्वयित्वेतोऽस्मत्पल्लिकां निनीवांस्ततस्तत्र दुर्विनीतेभ्यो रतिलम्पटेभ्यो भीतो मथुरां समया नागस्थलं नाम ग्रामं चकितचकितां तां वराकीं तत्र विश्वदत्तनाम्नः सदाचारभूषणस्य विप्रस्य सद्मनि न्यासीकृत्य तामतिष्ठिपं तत् सुरक्षितां तां लब्धुं नागस्थलं तूर्णं गच्छ। भृशमनुगृहीतोऽस्मीति सगौरवं कृतज्ञतामप्रमेयां प्रदर्श्य तस्मै प्राणसमाशीर्भ-

समागमोत्सुकः संहृष्टः स युवा तरसा प्रययौ ततश्च नागस्थले-ऽग्रहारेऽपरेद्युः सायं विश्वदत्तमुपेत्य श्रीदत्तोऽहमायुष्मन्तं सवर्णं त्वामभिवादये त्वदीये निशान्तेऽस्मिन् या मम जाया प्रत्यूषा मृग-युना सुरक्षार्थं न्यासीकृता तामवाप्तुमागतोऽस्मीति तमभिवभाषे। स्वागतं ते भो द्विजन्मन् मथुरापुरि मे मित्रवरो विप्रविपश्चिद-ग्रेसरो महाराजशूरसेनस्य मतिसचिवोऽभयो नाम तस्य हस्ते त्वदीयभार्यां विविक्तेऽग्रहारे तां सुष्ठु परिपालयितुमसमर्थो भूत्वा न्यक्षीप्सम एव प्रभाते तत्र त्वया गम्यतामद्य तु विभावर्यां मम वेश्मनि सुखमवश्रमोऽपनीयतामिति सोऽपि तमुवाच। प्रभा-तायां रजन्यां सुखोषितः श्रीदत्तस्तं ब्राह्मणमापृच्छ्य दयितादि-दृक्षाकृष्यमाणविरहपरितप्तमानसः पुनरध्वमार्गे पदं चकार नचि-रेण च मथुरामासादयाम्बभूव तदनु च दीर्घाध्वधूलिमलीमसदेहो गोपुराद्बहिः प्रसन्नाम्भसि सरोवरे स्नानं कुर्वाणस्तत्र तस्कर-निक्षिप्तमञ्चलग्रथितमहामूल्यमुक्तावलि पटच्चरं लेभे। तदादाय स युवा मथुरानगरीं प्रविश्य यावन्मन्त्रिभवनं प्रति प्रचचार तावद् राजपुरुषैस्तां मुक्तावलिमभिज्ञाय पापः पाटच्चरोऽयमिति संत-र्ज्यमानो वराको राजाज्ञया वधभुवं निन्ये। एष महापाप्मा मुक्ताहारचौरो वसुधाधिपस्यादेशादिदानीं वधाय निग्रहस्थानं नीयते ये केऽपि परस्वं चोरयन्ति ते यथायोग्यं दण्ड्यन्त इति पृष्ठतः प्रहतमृदङ्गघोषणैर्दण्डपाशिकैः पशुवदाकृष्यमाणं पश्चाद्र-ज्जुसंदानितबाहुं स्वप्नेष्वप्यविस्मृतं दयितदयितं जीवितेश्वर-

माराद् ददर्श तद्वियोगसंतापपरिक्षीणविग्रहा मृगाङ्कवती तं च दृष्ट्वा विस्मयशोकसम्भ्रमव्यतिकरव्याकुलीकृतमानसा ससम्भ्रममभ्यन्तरं गत्वा येनाहं दग्धदैवदुर्विपाकाद् बहुतिथं दुर्विषहं कालं विरहिता यस्य च समागमाशया हतजीवितमा संप्रति कृच्छ्रादधीधरं सोऽयं मे प्राणनाथोऽस्मिन् घण्टापथे वधभूमिं नेनीयते दीनबन्धो मन्त्रिन्निति गृहस्थाय मुख्यमन्त्रिणेऽभयाय न्यवीविदत्। श्रुत्वा तस्याः क्रन्दितं सोऽपि मन्त्रिपुरोगः कृपाकुलः सन् राजकुलमेकपदे गत्वा राज्ञे यथातथ्यं विज्ञाप्य विशसनात् तं मुग्धं व्यमूमुचत तत्समनन्तरं च निजप्रियासंगमाय तं गृहमानीय यथावृत्तमितिवृत्तं सविस्तरं पप्रच्छ। स श्रीदत्तः कान्तापुनर्दर्शनरोमाञ्चितवपुः पादयोः सस्नेहं प्रणतायास्तस्या उपरि दृष्टिसुधाधारामविरतमभिवर्षंस्तस्मै सचिवमुख्याय स्वजन्मनः प्रभृति संवृत्तं बहुविधिसंकटसंकुलमात्मनो वृत्तान्तं विस्तरेण व्यजिज्ञपत्। हन्त भोः पुत्रक स त्वमसि मे भ्रातुः कालनेमेरात्मजो भवेदानीमनपत्यस्य मे पुत्र इति सविस्मयं सप्रहर्षं च व्याहृत्य शुभोदर्कदिष्टिनियोगात् प्राप्तं स्वचरणयोः सविनयप्रश्रयणपूर्वं प्रणिपतितं स्निग्धभ्रात्रेयमुदश्रुनेत्रो गाढं सस्वञ्जे ततश्च पितृसमानवात्सल्यो नूतनपुत्रलाभसंहृष्टः पितृव्यस्तं पुनरुपांशु प्रोवाच यच्छृणु मदधीना राजराजस्यानुचरी यक्षिणी पञ्च सहस्रतुरंगान्विताश्चामीकरमुद्रासप्तकोटीः सौहार्देन मह्यमशिश्रणत् तत् सकलमपुत्रिणो मे स्वापतेयं तवैव संजातमित्यभिधाय च कति-

पर्यैदिवसै' प्राज्योपायनादिवैवाहिकसंभारनिर्भरेण विधिवदनुष्ठितेन महतोपयामेन तं तस्या लज्जानम्रितस्मेरवदनाया मृगाङ्गवत्याः पाणिं सानन्दमजिग्रहत् । एवं परिणीय तां शश्वद्दृढस्थां वल्लभां पितृव्यार्पिताक्षय्यविभूतिरसौ कालक्रमेण सौहृदयार्द्रचेतोभिर्बाहुशालिपुरोगैः सुहृद्भिरपि सङ्गतो बृहस्पतिसमबुद्धेः पितृव्यस्य प्रज्ञावैभवेन मथुराधिपस्य शूरसेरस्य पुत्रीमपि प्राप्य परमानन्दथुकोटिमधिरुरोह । ततो जातु कार्यान्तरवशाज्जनपदान्तरप्रयाणमार्गस्थः कस्यांचिद् विरलजनसंचारायामटव्यां प्रचरन् तरस्वी श्रीदत्तोऽकस्मात् प्रादुर्भूतैः शस्त्रोपजीविभिर्दस्युभिर्मार्गे प्रतिरुद्धोऽपि भयविवर्जित ऊर्जस्वलपराक्रमो दस्युसेनापतिप्रमुखान् प्रभूतसंख्यकाञ्शत्रून् प्रतिहत्य तदनु प्रबलामित्रशक्तिप्रहारमूर्च्छितो भयंकराकृतिभिस्तैरवशिष्टैर्दस्युभिर्दुर्गोपहारार्थं मनुष्यरुधिरशोणितवेदिकं घण्टानादप्रतिनादितं भीषणयमसदनसंकाशं रुद्राणीमन्दिरं निन्ये तत्र पुनर्लब्धसंज्ञः संपूजितसिंहवाहिनीं पूर्वं गान्धर्वपरिणयविधिना स्वयं परिणीतां तामेव किरातेन्द्रसुतां प्रेक्षाञ्चक्रे । सापि तथाभूतं भर्तारमकाण्डे दृष्ट्वा पुनस्तत्संगतिप्रमुदिता तं नयनानन्दनं सुदृढं कण्ठे गृहीत्वा तत्रस्थांस्तान् पुलिन्दांस्तद्वधात् सर्वात्मना न्यवीवरत् ततश्च प्रवर्तिताभिषेकमहोत्सवा यथाविधि तमभिषिच्य विशालमटवीराज्यं यौवराज्येऽभिषिक्तं निजतनुसंभवं पुत्रं तत् करवालरत्नं च निर्भरानुरागसंभानपुरस्सरं तस्मा उपाहार्षीत् । इत्थंकारमतर्कितमेव विततकान्तार-

राज्यभद्रासनेऽधिष्ठापितो राजा श्रीदत्तो मिथःसन्धिचिकीर्षयैव पितृव्योपदेशं स्वीकृत्य श्वशुराभ्यां विम्वकिशूरसेनाभ्यां दूतान् प्राहैषीत् । जामातुस्तस्य सन्धिसंवन्धविषयकं संदेशमुपलभ्य निजनिजदुहितृस्नेहाच्चतुरङ्गपरिपूर्णवाहिनीकृतानुयात्रौ तौ राजानौ तदन्तिकमुपसस्रतुः । तदनन्तरं यथावद् दृढीकृतान्योन्यसंवन्धयोस्तयोः श्वशुरयोर्वाहिनीभिः सार्धं सज्जीकृतदण्डयात्रः श्रीदत्तोऽमर्षणः स्वपितृघातकं महापाप्मानं नृपकीटं विक्रमशक्तिमभिषेणयन् रणाजिरहुतभुजि तं निकृष्टनरपशुं दिव्यप्रभावशालिना तेन चन्द्रहासेन छित्त्वा सरोषं जुहाव ततश्च राजन् सहस्रानीक सार्वभौमोऽतुलविक्रमः श्रीदत्तः समुद्रमेखलामेकातपत्रांकितां मेदिनीं प्रज्ञोपेतेन निरुपमेण भुजवीर्येणोपार्ज्य तिसृभिः पतिदेवताभिर्वुद्धिमद्भिश्च पितृव्यपुरोगमैः सुहृद्भिरनुत्तमसाम्राज्यसंपत्संभोगसौख्यानि यथेप्सितं सुचिरमनुवभूव । एवं कालज्ञा धृतिमन्तो नानाविधसंकटसंकुलं प्रियजनविरहशोकसागरमवतीर्य श्वःश्रेयसमवाप्नुवन्तीति । इत्थंकारं कथाविशारदेन कथकेन संगमकेन कथितं विचित्राश्चर्यबहुलं रोमहर्षणं कथानकमाकर्ण्य तां दोर्वयामां विभावरीमतिवाह्य कियद्भिर्वासरैः सुरपतिमेघवाहनाधिष्ठितां सहस्रमरीचिसुधांशूदयानुरागपावनोदयशैलपरिष्कृतां ककुभमासाद्य सहस्रानीको राजपुंगवः परस्परविश्रम्भसुवितनिर्भयमृगविहंगश्वापदकुलसंकीर्णं पुष्पितसान्द्रच्छायाद्रुमराजिविराजिताजिरसुभगं शश्वच्छान्तिस्वरूपमिव प्रशान्तिरमणीयं

प्रादुर्भूयमानानि पुरातनपञ्चलक्षणपुराणेतिहासवद्विचित्ररसमयानि यानि वृत्तान्तकदम्बकानि तानि प्रयाणपथे दयितामुखात् संशृण्वंस्तां संश्रावयंश्च विविधवर्णसुरपतिधनुरभिरुचिरतोरणवैजयन्तीसमाकुलां महिषीयुवराजगृहागमप्रमुदितपौरजानपदसमूहसंबाधां प्रारब्धसार्वजनीनमहोत्सवहृदिस्पृशं राजधानीं कौशाम्बीं संप्राप्य युवराजानुगतां राज्ञीं पुरस्कृत्य कौतुकाकृष्टहृष्टमनसामनारतोच्चारितजयशब्दकोलाहलानां महोत्सवानुरूपाकल्पाभरणप्रसाधितानां परःशतसहस्राणां प्रजानामनिमेषलोचनैः सहर्षं पेपीयमानोऽनन्तवसुदया वसुंधरया कलत्र्यपि मृगावत्या कलत्री सहस्रानीको राजकुलप्रत्यागमनसंप्रमुदितालोकभ्राजिष्णू राजप्रासादं प्रविवेश तदनु च निःशेषराजलक्षणसद्गुणशालिनं तनयमुदयनं यौराज्येऽभिषिच्य प्राज्यराज्यसंपदा सह युगन्धरप्रभृतीनां निजमन्त्रिणां सवयसस्तनूजान् राजनैतिकमन्त्रार्थं तस्मै प्रीतिपूर्वं विश्राणयांबभूव। ततस्तस्य युवराजस्य मन्त्रिमुख्यो यौगन्धरायणोऽक्षौहिणीनायको रुमण्वान् नर्मसचिवो वसन्तकश्च स्वस्वकार्यचिन्तनप्रवीणा अवश्यंभाविनः सहाया बभूवुः। इत्थं पुत्रांससमारोपितराष्ट्रभारो निश्चिन्तः सहस्रानीकभूभृदीश्वरश्चतुर्दशवर्षावधिकदुस्सहकान्ताविरहसमयराशीभूतानि जीवलोकसंभोगसुखानि तया सह यथातृप्ति भुक्त्वा कालक्रमेण पलितधवलेन यशसा यशोधवलेन पलितेन च संप्राप्तयशोवार्द्धक्यः सभार्योऽमात्यत्रयकृतानुगमो महाप्रस्थानायैव तुषाराद्रिं प्रति पदं चक्रे।

—:०:—

तस्य व्यसनिनो मनसि कृत्स्ने जगतीह मदीयपाणिग्रहणयोग्या सर्वलोकसंमतास्मद्वंशसदृशप्रकृष्टकुलाभिजाता श्लाघ्याभिजनरूपशीलशालिनी मदनुरूपा प्रमदा कुत्रापि न वर्तते परन्तूज्जयिनीनाथस्य कन्यारत्नं सकललननाललामभूता वासवदत्ता नाम केवला वरवर्णिनो कर्णकर्णि नन्वनुश्रूयते तथापि समुन्नतशिरस्कोऽहमुत्तमांगं प्रह्वीकृत्य परिपन्थिनं तं तामभियाचितुं नोत्सहे तर्हि तां कथंकारं हस्ते कुर्यामित्यात्मानुरूपदारपरिग्रहचिन्तनं समुत्पेदे । तत्कालं लोकोत्तरदिव्योत्साहविस्मापितसुरासुरसमुदायाभिष्टुतदिविषद्वरूथिनीनायककार्तिकेयतुल्यपराक्रमः सद्धर्मन्यायमार्गानुसारिसुनीतिरञ्जितजनपदसंपूजिताविकलमहिमा यथायोग्यसन्धिविग्रहप्रजानुग्रहनिग्रहाद्युपायप्रयोगातिनिष्णातः समस्तपार्थिवाग्रणीर्मालवेश्वरश्चण्डमहासेनोऽपि विचारयामास यद्यपि मामकीनतनूद्भवा वासवदत्ता समधिगतानवद्यविद्याकलाकलापप्रवीणा निष्कलमषलावण्यसौजन्यसौशील्यप्रमुखाशेषस्त्रैणगुणसमुपेता संप्रनि विवाहयोग्यवयःस्था तथापि लोकेऽस्मिन् समग्रगुणसंपन्नायास्तस्याः सदृशः करपीडनसमुचितो वरो वत्सेशोदयनवर्जं न क्वाप्युपलभ्यते सोऽपि वत्सराजो मम शाश्वतिको विरोधी दुराराध्यो दुरासददुर्गमालासुरक्षितराष्ट्रः प्रीणितप्रकृतिः परमभक्तिमदमात्यगणोऽप्रतिमवैभवनिर्भरकोशागारो मतिमतां वर उपायशतैरपि प्रवणीकर्तुं न शक्यस्तत्कथं नाम तं वशीकर्तुं शक्नुयामभिमानोत्सिक्तोऽसौ वैवाहिकसम्बन्धमुद्दिश्य मां न याचतेऽहमपि तं न याचे तद्व-

नेतुं कामयते भूभृच्चण्डमहासेनस्तस्मादात्महिताय पौरजानपदयो-
गक्षेमाय च सर्वलोकगर्हितं व्यसननिषेवनं जीर्णपटच्चरमिवापहाय
यथापूर्वं राज्यधुरामुद्वहेति प्रत्युक्ते भो मालवराजसंदेशहर राज-
पुत्री वासवदत्ता वीणां यथारुचि मत्सकाशादध्येष्यते तदर्थं सेहा-
गच्छतु यथा हि विद्यार्थी गुरुगृहमुपैति न तु गुरुर्विद्यार्थिगृहमिति
सुविस्पष्टं तं दूतमुक्त्वा व्यसृक्षीत् तत्समनन्तरं च संदेशहरमुखो-
दीरितानुचितमालवेन्द्रवाचिकश्रवणोत्थितक्रोधाग्निप्रजाज्वल्यमान-
सर्वाङ्गो धूमलभ्रूकुटीवन्धधूमोद्गारानुमेमीयमानोल्बणान्तर्मन्युधूम-
केतुः पार्श्ववर्तिनः सचिवसेनापतिप्रमुखान् महामात्रान् सरोषमि-
त्याजिज्ञपदतिदर्पदर्पितोऽवन्तिनृपतिर्मत्सकाशाद्वीणां शिशिक्षिषु-
मात्मनो दुहितरमत्राप्रेष्यैव भृत्यमिव मां सावज्ञमाकारयति तत्
कथं नाम निर्मर्यादमानोद्धतस्य दुर्विनीतस्य तस्यावधीरणां तिति-
क्षुरपि तितिक्षे सपदि समीरणवेगेन वेतसमिव तीक्ष्णदण्डनिपात-
नेन तं दुरात्मानं विनयविनम्रतां निनीषामि भोः सेनानीः सान्धि-
विग्रहिक सज्जीक्रियतां तूर्णं दण्डयात्रार्थमरिंदमचतुरङ्गकृतव्यूहा
चमूः। इत्याकर्ण्य मालवराजापमानविनष्टधियोऽविमर्शकारिणस्त-
स्यासमञ्जसं वचः सुधियामग्रेसरो दूरदर्शी मन्त्रकुशलो मन्त्रि-
णामग्रणीर्यौगन्धरायणो व्याहार्षीद् राजन् युक्तरूपमिदं ते वाक्यं
न खलु मनस्विनः परेषामवहेलां क्षमन्ते तथाप्युपसंह्रियतां वरू-
थिनीसंनाहसमादेशो यथा हि दिव्यानुभावप्रसादितोऽतिमानुष-
शक्तिमानप्रतिभटश्चण्डमहासेनो न केनाऽपि पराभवितुं शक्यते

तीव्रतपश्चर्यैकाग्रमना निशितधारयासिवेन्वा स्वकीयकलेवरात् पिशितानि खण्डश उत्कृत्योत्कृत्य विन्ध्यवासिनीं रुद्राणीं सुचिरं प्रासीषपदत् ततश्च तदीयरौद्रकर्माराधिता भवानी साक्षादाविर्भूय हे वत्स प्रसन्नास्मि ते भक्तिप्रकर्षेण यस्मात् त्वयेदृशं चण्डकर्म व्यधायि तस्मादद्यप्रभृति त्वं चण्डमहासेनाभिधया लोकेऽस्मिन् विश्रुतिं गमिष्यसि हस्ते कुरु चन्द्रहासमिमं यदीयमहिम्ना खलु रिपूणामजय्यः शत्रुंतपो भविष्यसि किञ्चाङ्गारकनाम्नोऽसुरस्य कन्यारत्नमङ्गारवती नाम जगदेकमत्तकाशिनी त्वदीया जाया पुरा भवतीति व्याहृत्य तस्मा अकुण्ठितधाराभ्राजिष्णुमिमित्रघ्नं दिव्यकौक्षेयकोत्तमं स्वयमतिससर्ज। तस्य चण्डमहासेनस्य न केवलं कृपाणरत्नं सुनासीरस्यैरावत इव प्रांशुपर्वतोपम उद्दाममदामोदतृणीकृताष्टदिग्वारणोऽप्रधृष्यबलोद्रेकः सर्वमर्दनो नडागिरिर्नाम कुञ्जरेन्द्रोऽपि वरीवर्ति यस्य सर्वकर्षेण महानुभावेनाकुतोभयः स राजेन्द्रोऽतिपृथ्वीं पृथ्वीं प्रशास्ति। अथ जातु दिव्यकृपाणाद्विरदोत्तमप्राबल्यसंतुष्टान्तरात्मा चण्डमहासेनो मृगव्यावेशाकृष्टचेताः सुमहतीं गहनाटवीं प्रविश्य तत्राह्नि पिण्डीभूतं नैशान्धतामिस्रमिव दिवसमपि रात्रिमन्यं कुर्वाणं पुनर्वृहच्छिलोच्चयाकारं जलदागमशङ्कामकाले जनयन्तं महाकायातिभीषणं स्तब्धरोमाणं प्रत्यक्षीकृत्य तत्क्षणमेव तीक्ष्णाग्रैर्विशिखैरजस्रमभिववर्ष तथापि वज्रसारमयदेहोऽसौ भूदारो निशातनाराचधाराभिरप्य-

दिष्ट्या त्वामपहाय किंचिद्विश्रामहेतोः परित्यक्तवराहवेषः सांप्रतं स्वपिति यदि सुप्तप्रबुद्धोऽसौ त्वामत्रागतं जानीयान्निःसंदेहं त्वां यमसदनं प्रापयेदिति तव हितैषिणी त्वदर्थे रोदिमीति। आकर्ण्य तस्या दयालु वचनं स महीनाथः किमपि ध्यात्वेत्थं तामसुरकन्यां सस्नेहमभ्यर्थयाञ्चक्रेऽयि सुदति मयि तावकीनं मनोऽनुरज्यति चेत् तर्हि मद्वचनादिदानीं पितुः समक्षं प्रमुक्तकण्ठं सविषादमिवोदश्रुनेत्रा विलप ततोऽत्यन्तरुदितेन तवोद्विग्नचेताः स शोकहेतुं त्वां नूनं प्रश्नयेत् तदा त्वं तमभिधेहि हे पितः कठिनतमवज्रसारमयवर्ष्माणमपि त्वां बलीयान् कोऽपि मारयेच्चेत् कीदृशी मे मन्दभागिन्या अवस्था भवेदिति चिन्तयन्ती रोदिमीति तत्समनन्तरमेव परस्परगाढानुरक्तयोरावयोर्योगक्षेमपुरस्परं श्वःश्रेयसं समुत्पत्स्यते। तदनु तिरस्करिणीपृष्ठनिगूढवपुषि राज्ञि शृण्वति तद्वचनं सहर्षमूरीकृत्य सा वामलोचना प्रसुप्तस्य पितुः पुरत उच्चैस्तमां रोदितुमचेष्टिष्ट ततश्च तस्याः क्रन्दनेन प्रबोधितः स वराहासुर ईषद्विपण्णमना वत्से कस्मात् कारणादेवंकारं क्रन्दसीत्यनुयुयुजे। तात यदि बलाधिकेन केनापि मदेकाश्रयस्त्वं पञ्चतां नीयेथास्ततः का मे शोच्यावस्था भवेदित्यसंभाव्यमपि भावि दौर्भाग्यं तर्कयन्तीत्थमभिशोचामीति मुग्धाया दुहितुर्वाक्यं निशम्य स दैत्येन्द्रोऽङ्गारकः सोपहासं व्याजहार हे पुत्रि मौग्ध्यभूषणासि मा स्म भैषीर्यथा निसर्गजवज्रसंनद्धाच्छेद्यशरीरोऽतिमृत्युः शश्वदनश्वरोऽहं ननु सर्वंकषमपि यमुनाभ्रातरं साटोपमावहेले तथाभूत-

समुपजोषं निशम्य साधुवादपुरस्सरमुत्थाय सुनीतिज्ञोऽवन्तीश्वरश्चण्डमहासेनः प्राकारगोपुराद्बहिः स्वयं गत्वा तैः सुभटैर्जीवग्राहं गृहीत्वानीयमानं वत्सेन्द्रं राजोचितसत्क्रियाविशेषेणादृत्य तेन साकं राजभवनं प्राविक्षत् तदनु च भो वत्सभूमण्डलाधिराज शृणु यथेयं मे कन्यका वासवदत्ता वीणावादनादिगन्धर्वविद्यामभ्यसितुं नितरां समीहते तथैनां त्वदीयां शिष्यां गान्धर्वं शाधि विदांकुरु केवलं तदर्थमिह बद्ध्वानीतोऽसि तदत्रास्मद्गेहमनि कञ्चित् कालं वीतज्वरेण त्वया यथासुखमुष्यतां कदाचिदपि मा स्म विपद इति प्रीतिपूर्वं निगद्य तस्मै स्वीयं कन्यारत्नं सानन्दमदीदृशत् । सोऽपि वत्सराजश्चिरकालहृदिस्थां नयनकौमुदीं कृष्णकौशेयसुकुमारचिकुरहस्ताभिरुचिरां मनोज्ञनीललोचनच्छवितिरस्कृतेन्दीवरां पेशलभ्रूचापरचनोपहसितकुसुमायुधधनुषं नेत्रोत्सवदायिवदनेन्दुसुषमामनोहरीं जिष्णुमनोभूराजाभिषेकसौवर्णकलशायमानपीनस्तनयुगलाचारीकृष्यमाणयुवजनलोचनभ्रमरनिकुरम्बां मंजुलभुजलताभ्यां प्रथमप्रणयिनं सानुरागमाशिश्लिक्षुमिव पुनस्तनुनावलग्नेन कान्तिमद्वलित्रयं विभ्रतीं मदनलीलारोहणार्थं विश्वसृजा निर्मितस्येवातिपृथुलस्य नितम्बविम्बस्य भाराद् गजगामिनीं मनोरमरम्भोरुं किं बहुना परिमितकथां सौजन्यसौशील्यसुगुणशालिनीं समस्तललनाललामभूतां तां वासदत्तां निर्वर्ण्य कन्दर्पमन्दाक्रान्ते पाराबारतले प्रतिबिम्बितोऽमृतदीधितिरिव निर्वातिबन्धसम्मथनगर्भसंक्षोभिते हृदये तरलायमानो दुर्गादुरुद्धारसागरे न्यमज्जत् । सापि राज-

दारिका दुहितृवत्सलेन सततलघूत्थानशीलेनालंभूष्णुना प्रज्ञा-
प्रभावात् प्रसह्यानीतमतनुद्युतिविराजितं निसर्गसुभगं सहजराज-
लक्षणसमुपेतदर्शनीयवपुषं मूर्तिमन्तमनङ्गमिवानवद्यसौन्दर्यविल-
सितं तं वत्सराजं दृष्ट्वैव निष्करुणमकरध्वजसायकाभिहतेवाधो-
मुखी भूत्वा दुर्भरकुचस्थलवेपथुदुर्बला समजनि । तस्मिन्नेव क्षणे
स्मरवागुरायां पतयालु संजायमानान्योन्यानुरागं तादृग्भूतं युवयुग्म-
मालक्ष्य सद्यःसफलीभूतमनोरथ इव क्ष्माभृत्पुंगवश्चण्डमहासेनः
स्मितविकस्वरदृष्टिर्भूत्वा संतुष्टिप्रकर्षमयासीत् । ततः प्रभृति
प्रत्यग्रविकसिताम्लानप्रेमपुष्पसाराधिकमधुरया प्रवाससंतापपरि-
तप्तहृदयविनोदिन्या सुचरितपरिचर्यावरिवस्यातत्परया तया वास-
वदत्तया स्मितिपूर्वमजस्रमुपसेषेव्यमानः पुष्पंधय इव तदीयसान्द्र-
प्रणयामृतरसं यथातृप्ति पायं पायमानन्दोद्रेकविस्मृतनिजराज्या-
वस्थाचिन्तनो वत्सदेशाधिप उदयनः स्निग्धां घोषवतीमङ्के कृत्वा
मधुरमधुरैः स्वरैर्गान्धर्वमर्मज्ञस्तां वीणामशिशिक्षदेवंकारं चार्हदिवं
तेनाञ्जसानुशिष्यमाणा साप्यतनुशेमुषी सूक्ष्मवीणावादनकौशल-
मध्यगमत् । अत्रान्तरे सरीसृपकुटिलेन कूटोपायेन चण्डमहासेनेन
जीवग्राहमार्यहलं गृहीतमुदयनं विदित्वा सकलमतिविस्मयप्रकोप-
विक्लवं वत्सराज्यमकाण्डझंझावातप्रहतसमुद्रवदतिवेलं संचुक्षुभे
वत्सराजभक्ताश्च सर्वे पौरजानपदा उद्दामक्रोधवह्निप्रज्वलित-
मानसा ऐकमत्येनैकीभूय बद्धमुष्टय उच्चैस्तरामाचुक्रुशुर्वयं सर्वे
प्रभुसमुद्धरणाय दुराचारं दुरात्मानं नृपकीटं चण्डमहासेनमभिषेण-

यामेति । भो भोः प्रजाः शृणुत यूयं सर्वाः प्रजा यावत्या राष्ट्र-
भक्त्या निकृष्टापमार्गानुगामिनमवन्तिनरपतिमवस्कन्दितुमुत्सहध्वे
तावतीं पुनरवलम्ब्य जनपदहिताय प्रभुकल्याणाय च सांपरायि-
कोत्साहमपाकुरुध्वं यथा न केवलं दुराधर्षबहुदुर्गपरिपालितोऽपि
दिव्यमहानुभावपरिरक्षितोऽसौ बलाधिकश्चाण्डमहासेनो न जातु
पराजीयते किञ्चास्कन्दनेऽसमञ्जसं विधीयमानेऽस्मद्विभुशारीर-
कक्षेममपि विनश्येत् तस्मात् प्रज्ञाप्रभावेनैवाक्षतशरीरं प्रभुं
समुद्धर्तुं यतामह इत्यमित्रबलमापनप्रवीणोऽप्रतिरथो वाहिनीपती
रुमण्वान् कथञ्चित् ताः प्रकृतीः प्रशान्तसंक्षोभा विदधौ । एवं
वत्सराजैकतानभक्तिदृढीकृतसंकल्पमनुरक्तप्रजं देशं विज्ञाय प्रसन्न-
वदनो बुद्धिमतामग्रगामी निरुपमप्रतिभानयोगप्रभावसंपन्नोऽमात्य-
मुख्यः स यौगन्धरायणो भोः सुहृद एवंविधे व्यतिकरेऽहं वसन्तक-
कृतानुयात्रः क्षिप्रमुज्जयिनीं गत्वा निजमनीषानुभावयोगतो
निश्चितमेवास्मदीयं स्वामिनं बन्धनाद्विमोच्य पुरेहानयामि तत्
सततोत्थानशीलैरतन्द्रितैरत्रस्थैर्भवद्भी राज्यं यथाबजं रक्षितव्यं-
मिति सेनानीरुमण्वत्प्रभृतीन् महामात्रानभिभाष्य प्रस्थितो वसन्त-
कसहायोऽतिमानुषविद्यावैभवेनाचिरेणाभ्रंलिहाग्रप्रांशुभूरुहराजि--
नीरन्ध्रां बहुविधविहंगश्वापदसमवायसमाकुलां दुस्संचारां विन्ध्य-
शैलाटवीं प्राप्य वत्सराजसखस्य पुलिन्दकाह्वस्य सकलाटवीकाधि-
राजस्य दुर्गप्रासादं प्रविश्य च स्वमित्रोपजीविप्रधानामात्यागमन-
प्रहृष्टमनसा तेन प्राज्यातिथेयेन सत्कृतस्तं विदितोदयनबन्धन-

प्रवृत्तिं विधाय तच्छरीररक्षार्थं प्रत्यागमनमार्गे सज्जीकृतसमग्र-
वनेचरसेनासन्नाहमचीकरत् ततश्च वसन्तकद्वितीयोऽल्पीयसा
कालेनोज्जयिनीं समासाद्येतस्ततः संकीर्णकर्परकीकसखण्डकङ्काल-
भयानकालोकं सर्वतोव्याप्तपललरुधिरमेदःपिण्डदौर्गन्ध्यातिव्य-
थितघ्राणेन्द्रियं दुर्गन्धवाहिसान्द्रधूमावलिपरिच्छन्नं शवमांसाहार-
तृप्तिनरीनृत्यमानवेतालराक्षसादिकुणपाशननिवहं सततबुभुक्षित-
सारमेयतरक्षुवृककोलाहलबधिरीकृतं महाघोरपितृवनं निशि प्रविश्य
तत्रस्थेन योगेश्वराभिधेन ब्रह्मराक्षसेन सख्यं बद्ध्वा कामरूपता-
सिद्धिं तस्मात् प्रापत् । तत उत्तरेद्युः प्रातस्तरां कामरूपः सुधीर्यो-
गन्धरायणो युगपद्विकृतरूपोऽपोगण्डो वामनः खुरणसः पंचाशिखा-
जटिलः पिचण्डिलो गडुलः काणो वितताक्षः पंगुरुन्मदिष्णुः
स्वच्छंदं भूत्वा तेनैव रूपपरिवर्तनयोगेन वसन्तकमपि वैरूप्यं नीत्वा
विकटमहाकायमूर्ध्वकेशं विस्फारितगोलकसंकाशवृहल्लोचनमुच्चा-
वचदंष्ट्रादंतुरं गृध्रचञ्चूवत्खरणसं विशालहनुमुष्ट्रग्रीवाभासदीर्घ-
ग्रीवं सर्वजनहास्यभाजनं तं चकार तदनु च तादृग्रूपेण वसन्तकेन
सह घंटापथे प्रस्खलितगतिश्चाखञ्ज्यमानो गायन् नृत्यन्नट्टहासं
कुर्वाणो किमपि वाचयन् महाजनं सहस्ततालमुच्चैः परिहासयंश्च
कौतुकाकृष्टैः कृतकलकलैर्वटुगणैरनुसेर्स्रीयमानो राजकुलकन्य-
कान्तःपुरसमीपं गत्वा नितान्तोन्मत्तनर्मपरिहासनृत्यप्रयोगमतिभृशं
चकार । ततः क्षुब्धान्तगवाक्षेभ्य उद्ग्रीवा विरूपयोस्तयोरति-
विचित्रचेष्टां निरूप्य विस्मयातिभूमिं गता वासवदत्तायाः पारि-

पार्श्विका महदद्भुतं तत् तस्यै निवेदयाञ्चक्रुस्तत्क्षणं च सापि कौतूहलाविष्टमनाः सपदि ताभिः समस्तमर्त्यलोकदुष्प्रापमतिशय-दुर्दर्शनं विकृतरूपं हास्यपात्रं तन्नरयुगलं संगीतशालामनाययत्। अथ तत्रानीतौ कुब्जविकटकायौ यौगन्धरायणवसन्तकौ चिर-विरहितं वीणाचार्यं वत्सेशमुदयनं पुरतश्चिराद् दृष्ट्वोदश्रू निःशब्दं रुरुदतुस्ततश्च तस्मै प्रत्यभिज्ञानसंज्ञां तूष्णीं ददतुः। सोऽपि वत्सराजस्तौ विकृतरूपौ प्रत्यभिज्ञाय गूढसंमन्त्रणार्थं परिजन-सहितां राजसुतां सरस्वतीपूजां व्यपदिश्य विससर्ज ततश्च निर्गता-यां तस्यां दूरप्रसारिताभ्यां भुजाभ्यां वयस्यौ चिरस्नेहं परिरभ्य बाष्पोद्गारदुर्दिनायमानवदनः स्वराज्यस्थितिप्रवृत्तिपूर्वकमशेष-वृत्तान्तं विस्तरशः पप्रच्छ। दीर्घनिःश्वासपुरस्सरं निरवशेषेण तस्मै निवेद्य समग्रवृत्तान्तजालं सुकृती राज्यधुरंधराग्रणीर्वत्सराज-

रूप्यविभूषितोऽप्यद्भुतकथावैचित्र्यरसपरिपूर्णसर्वाङ्गशोभी कथा-
पण्डितंमन्यानामपि मनांसि विचित्राख्यायिकाकथनेन लोहकान्त
इव लोहशकलानि ध्रुवमावर्जयितुं प्रभवामि किं पुनः कथाविद्या-
विहीनानां भवादृशीनामविदग्धानि मनांसीति सदर्पं गर्जितेऽधिक-
प्रफुल्लनेत्रसरोजा हसन्ती सा तं नर्मावतारनीकाशमभ्यभाषिष्ट
तर्हि महाब्राह्मण त्वया कथ्यतां कापि चेतोविनोदिनी कथेति ।
श्रूयतां यदि कौतुकं महामहिपि ते कथयामि कथामिति प्रस्तुत्य
कथाविशारदो वसन्तक उपाख्यानं कथयितुं प्रचक्रमे । अस्ति मथुरा
नाम महापुरी कंससूदनदामोदरजन्मपवित्रिता पुष्कलरतिरसविल-
सितगोपाङ्गनासहस्रपरिवृतराधाकृष्णसंभोगशृंगारविहारभूमिस्तत्र
च पुरा बभूव कापि स्वाधीना रूपाजीवा नूनं कृत्स्नपुरुषजाति-
वशीकरणाय सकलवारवनितासारेणादभ्रकेलिरसाकृष्टमनसा
मीनकेतनेन विशेषतः सृष्टेव प्रकृष्टाकृतिलावण्यहेपितानिरुद्धप्रसू
रूपिणीत्यन्वर्थसंज्ञा । अथ कदाचित् सास्वादितानेकपुरुषरसा
गणिकापि भूत्वानुरागवती सहृदया देवायतनं गत्वा सौन्दर्याति-
शयितप्रद्युम्नं मूर्तं तारुण्यसारमिवाभिरुचिराकृतिं कंचित् पुमांसं
यदृच्छया दृष्टिगोचरे प्रदुर्भूतं निर्वर्ण्य सपदिप्रबुद्धमनसिशयसंक्षोभ-
प्रकम्पितहृदयकूपा मदनातुरा समभूत् तत्समकालं च परिचारिकां
समादिक्षदसौ युवा मदीयसदनमविलम्बितमानीयतामिति । तथे-
त्युक्त्वा सा परिचारिका तस्मै यूने तद्वाचिकं न्यवीविददेवं च
तयाकारितः सोऽपि प्रत्यवादील्लोहजङ्घाह्वयो निष्किञ्चनो विप्रोऽहं

कथं द्रविणसाध्यं वाराङ्गनावेश्म प्रवेष्टुं शक्नोमीति । प्रथमदृष्टि-
पातमात्रसंजातानुरागा मे स्वामिनी सानन्यादृशी वारमुख्या त्वयि
भृशं स्निह्यत्यैतस्मात् कारणात् त्वां निमन्त्रयति, न तु धनलोभा-
दिति तया चेटिकयोक्तं वाक्यं पुनः श्रुत्वा कौतूहलरिरंसाभ्यां
युगपदाकृष्यमाणस्तया सह स लोहजङ्घस्तन्निशान्तमगमत् ततस्तत्र
संभोगरसोत्कर्षहेतुकपीनकुचयुगमश्रोणिफलकाधिकाभिरामया राम-
या संख्यातीतसुरतविदग्धकामुकसंगमाधिगतबहुविधविचित्ररतिक-
र्मनिपुणया सततकण्ठलग्नया प्रत्याख्यातपुरुषान्तरप्रवेशया निरंतर-
प्रत्यग्रीकृतप्राज्यरिरंसया तया रूपिण्या समं बहुतिथं कालं
रममाणः सानन्दं तत्रोवास । एवं निवारिताखिलधनाढ्यकामिसंघ-
संगमां वारविलासिनीमपि हिरण्योपार्जने विमुखीभूय सर्मार्जितपूर्वं
स्वीयं स्वापतेयं व्ययीकृत्य नक्तंदिनं तेन निस्स्वेन ब्राह्मणकामुकेन
रंरम्यमाणां तां पुत्रीं निशाम्यातीव मनसि दुःखायमाना तस्या
जनयित्री कुपितरतिशूरसार्थतीव्रदशनखण्डितनासिका नखानखि-
प्रवृत्तनियुद्धसमयनिशितनखरोन्मूलितकेशपाशा स्वायत्तवल्लभा-
पहरणरुषितप्रतिपक्षवारस्त्रीदंष्ट्रासामिच्छिन्नकर्णपाली कलहज-
व्रणकिणनिकरचित्रितलपना द्वितीया कालरात्रिरिव भीषणाकारा
पुरुषमांसभोजना राक्षसीवोद्वेजयित्री मकरदंष्ट्रा नाम मत्सरिणी
शम्भली समुदीरयामास हे वत्से कथं नाम द्रव्योपार्जनोद्योगमपि
परित्यज्य कुलांगनेव वेश्या त्वमीदृशमकिञ्चनमकिञ्चित्करं
ब्रह्मबन्धुमियन्तं कालमुपसेवसे क्व कुटिललोकयात्रानिपुणा रूपा-

जीवा क्व च सदाचारभूषणा कुलवधूः किं न विजानासि कपट-प्रेमप्रदर्शनेन प्रचुरधनार्जनमेव विदग्धवारयोषितामस्माकं परमधर्म इति सुरतकलासुभगेऽर्थलाभसमुचिते यौवने व्यतीते जराजीर्णा-भ्योऽस्मभ्यो रतिलम्पटोऽपि को दीनारं प्रदद्यादयि पुत्रिके यावद् यौवनस्था त्वं तावत् सर्वात्मना कृत्रिमं प्रेम दर्शयन्ती निकामं धनिभ्यः कामुकेभ्यः प्रभूतं हिरण्यमपहर्तुं प्रयतस्व यथा परि-शीलनविवर्जिता विद्या तथैकपुरुषनिरता अनुरागवत्यो गणिकाः परपरिहासास्पदीभूय विनश्यन्ति तत् केवलं स्वसहजधर्मपदवीमे-वैकाग्रेण चेतसानुसरन्ती सुवर्णराशिं यथाशीघ्रं सञ्चिनुष्वैतदर्थे दरिद्रोऽयं निष्प्रयोजनो ब्रह्मब्रुवाणः संत्यज्यतां पुत्रि जानीहि वार-वनितानां कृते सर्वथा वरं विरूपोऽपि महाधनो न पुनर्निर्धनः सुरूप इति। अम्ब यदि ते हृदि दुहितृवात्सल्यगन्धो मयि वानु-क्रोशलेशो विद्यते मैवं खलु भाषिष्ठाः किमिति परस्परगाढनुरक्तयोः प्रणयिनोरावयोः प्रणयभंगं चिकीर्षसि शृणु लोहजङ्घोऽयं मदेका-श्रयभूतोऽस्मभ्योऽपि गरीयान् मदीयो जीवतेश्वरो यस्य प्रथमसंगम-दिवसात् प्रभृति सर्वलोकजुगुप्सितां रूपाजीववृत्तिं जीर्णोपानहमिव सम्यक् पर्यत्याक्षं किंच यावज्जीवं पर्याप्तं वित्तं मे वर्तते तदविकेन द्रव्येण किं प्रयोजनमलमलमुपदेशेनानिष्टेन हे मातर्यतोऽहं तेन मे प्राणनाथेन कृतसंवेशा ततो विशुद्धां कुललनापदवीमेवानुसर्तु-कामास्मीत्यहितवादिन्यै मात्रे क्रुद्धा रूपिणी प्रत्यवोचत्। आकर्ण्य तुनिश्चितं दुहितुः प्रतिवचनमभ्यधिकामर्षमत्सरमूर्च्छितान्तरंगा

सा मकरदंष्ट्रातीक्ष्णहृदया मकरदंष्ट्रा वृद्धकुट्टनी लोजङ्घनिरसनोपायं मनसा परिमार्गयन्ती तूष्णीमासिष्ट ततश्च जातु भवानीपर्युपासनार्थं बहिर्गतायां रूपिण्यां स्वगेहं समया वर्त्मनि प्रचरन्तमायुधीयैरनुसृतं यायावरं सुरतलोलुपं सामन्तपुत्रमकाण्डे दृष्ट्वा तमभ्येत्य च विजनेऽवादीद् राजपुत्र निष्किञ्चनो ब्रह्मबन्धू रूपिण्यानिशं रममाणोऽस्मद्गहे राजायते तदेहि तस्मा अपहस्तं दत्त्वा तां कामं भजस्वेति। तथा करिष्यामीति निगद्य स तद्वेश्मस्थं तं लोहजंघं शस्त्रपाणिभिर्निजभृत्यैः सह दण्डप्रहारपादाघातैर्गात्रेषु समस्तेषु भृशं ताडयित्वा बलात्कारेणापहस्तयति स्म। इत्थंकारं प्रसह्य रूपिणीगृहान्निर्वासितो मन्दभाग्यः प्रियाविश्लेषसंतापसंतप्तमना वराको लोहजङ्घो गत्यन्तराभावाद् यत्रसायंगृहः प्रव्रज्यां प्रवेष्टुं निर्ययौ ततश्च कालेन क्वचिदूषरे ग्रैष्मिकतिग्मांशुपरितापिते नखंपचे व्रजन् दुर्विषहौष्ण्यमूदितविग्रहोऽनातपाभिलाषी कुणपाशनैर्जन्तुभिर्निर्मांसीकृतं वण्यदन्तिनश्चर्ममात्रावशेषं कङ्कालं प्रविश्य सान्द्रया निद्रया ध्रुवं जगूहे। अथातितीव्रवेगे महाझंझावाते सुघोरे सहसा समुत्थिते जंघाद्वयसैर्जलौघैरपजेह्लीयमाणं तद् गजकलेवरं प्रभञ्जनप्रेरितं प्रवहणमिव दक्षिणसागरं प्राप तच्च कल्लोलैरुह्यमानमवलोक्य प्रहृष्टोऽशनायितो विष्णुवाहनवंश्यः पक्षीन्द्रस्तदुद्धृत्य तरसोत्पपात नचिराच्च लङ्काद्वीपमासाद्य यावत् तत् कलेवरं विदारयितुं प्रारेभे तावत् तदभ्यन्तरस्थितं सजीवं मनुष्यमतर्कितं निरीक्ष्य चकितचकितः क्वाप्येकपदे दुद्राव। अथ

स्वर्गमारोढुमुत्सुकायते देवि मामनुग्रहीतुं तस्मै देवाय सकृपं विज्ञापयेति सादरमुपायाचिष्ट । ततः पुना रात्रौ रूपिणीसंगमाय समायातो देवकीनन्दनवेषधारी तया सप्रश्रयं विज्ञप्तनिजमातृस्वर्गमनसमीहः सन् स्तोकं ध्यात्वेत्थं निजगाद प्रिये बहुपुरुषासृक्पा महापापा दुरात्मा ते जननी न खलु स्वर्गाय कल्पते तथापि त्वद्वचनानुरोधाच्छ्वो मदभिमतायामेकादश्यां पंचचूडाकल्पितोत्तमांगा कपालमालिनी दिगम्बरा कज्जललिप्तदेहार्धा कुंकुमारुणितापरार्धा मसीविलेपनसान्द्राननां मकरदंष्ट्रां विहायसा द्रुतं त्रिविष्टपं मया नेष्यते । ततोऽपरेद्युरेकादश्यां ज्यौत्स्न्यां स्तुतिपूर्वं रूपिण्या समर्पितां स्वर्गकामां नग्नीकृतां कपालमालारुक्षितभुजान्तरालामपरूपां स्वर्गारोहणप्रमोदातिरेकरोमाञ्चितकज्जलसिन्दूरकुंकुमरूपितसंहननां भयानकरात्रिंचरीसरूपां तां वृद्धरूपाजीवां मकरदंष्ट्रां युगपत् पक्षिवाहने समारोप्य श्रीवत्सलांछनरूपधारी वैरनिर्यातनोत्सुको रूपिणीरमणो लोहजंघः संहृष्टमनास्तरसोड्डीय क्षणान्तरे देवालयस्योच्छ्रितायां चक्राङ्कितायां स्थूणायां दिगम्बरां विकृतरूपां तां स्थापयित्वा च तामब्रवीत् कुट्टनि क्षणं प्रतीक्ष्यतामद्यैकादशीयात्रोत्सवप्रसंगेऽत्र मन्दिरे समवेतेभ्यो मदेकपरायणेभ्यो महाजनेभ्यः साक्षाद्दर्शनप्रसादं ददामीति तदनन्तरं च मंक्षूत्पत्य व्योमस्थो गम्भीरां घोषणामकरोद् भो भो मथुरानिवासिनः शृणुत महाघोराकारा समग्रलोकप्राणापहारिणी मारी निपतिष्यत्यधुनेति । अथाशरीरिणीं गगनादुद्भूतां सरस्वतीमाकर्ण्यातिशयविभीषिता-

स्तत्रस्था जनसमूहा देवस्तोत्रस्वस्त्ययनमन्त्रोच्चारणैर्भृशं दिगन्तरालं निःशेषं वधिरीचक्रुस्तत्क्षणं च सोऽपि लोहजंघ उपांशु विष्णुपदात् कृतावतरणः पद्मनाभवेषमपनीय साधारणः पूरुषो भूत्वा तदेव विचित्रं प्रेक्षणकं दिदृक्षुर्महाजनमध्ये निभृतं तस्थौ। सापि देवलोकसंभोगगृध्नुः शम्भली स्तम्भपृष्ठनिहिता सती भूतलनिपतनभयादतीव त्रासिता भुजलताभ्यां स्थूणाचक्रमवलम्ब्य हंहो पतामि हंहो पतामीति तारं चक्रोश। आकर्ण्य महतीं विभीषिकामुपरिदत्तचकितलोचनास्तामेव नग्नां कपालमालिनीं भीषणाकृतिमुद्वीक्ष्य सर्वे तत्रत्याः पौरा हे महादेवि मारि मा पप्तोऽस्माकं दयस्व महादेवि मा निपतेति सादरमञ्जलि बद्ध्वा तां प्रार्थयांचक्रिरे तत्क्षणाच्च पुनर्हाहा संप्रत्येषोपरिष्टादधो निपतामि वीतधृतिरिति तया क्रन्दिते तेऽपि सर्वे तन्निपतनाशङ्काग्रस्ता अतिमात्रं विम्यतः सकरुणं विलेपुरस्मांस्त्रायस्व महादेवि मा पत मा पतेति। पतामि पतामीत्येवमुच्चैस्तमां क्रोशन्ती सा राक्षसीतुल्या मकरदंष्ट्रा च मा पत मा पतेत्यार्तस्वरमविच्छिन्नं कुर्वाणास्ते पौरजानपदाश्च भयसाध्वसदीर्घीभूतां तां सहस्रयामायमानां रजनिं कृच्छ्रात् कृच्छ्रादतियापयामासुः। ततः प्रभाते कृत्स्नरात्रिजागरणोच्छूननयनाः सर्वप्राणिप्राणापहारिमारोनिपतनत्रासोद्भ्रान्तचेतसः सबालवृद्धास्ते सकलजनसमूहाः स्वर्लोकगमनार्थसोपानमार्गमध्यस्थामिव प्रांशुस्थूणावलग्नां दुर्गामिव करंकमालाभूषितवक्षःस्थलां किल्विषकलंकितां स्वचित्तवृत्तिमिव कज्जलकुंकुमकर्बुरितमलिनदेहां निस्त्र-

पपुञ्चलीमिव नग्निकां सर्वतोऽयशःप्रकटितनिजाभिधानां मृतप्रायां मकरदंष्ट्रावत्तीक्ष्णाशयां मकरदंष्ट्रां प्रत्यभिज्ञाय विदग्धरूपाजीवया विडम्बितबहुपुरुषयानया मुग्धा वयं सर्वेऽतिवेलं विडम्बिता इति स्तम्भात् तस्मात् तामवतार्य रे रे महादेवि दुर्गे मारि कथंचित् पतिताऽसीत्याक्रुश्य सारमेयीमिव पादघातं लोष्टघातं च प्रहृत्य परःसहस्रपुरुषघ्नीं पापमलीमसां योनिं करतलेन वैरूप्यविकृतं मुखमितरकरतलेन च प्रच्छादयन्तीं तां तूर्णमपसारयाम्बभूवुः। एवं कृतशम्भलीगृहनिरसनप्रतीकारः सफलीभूतमनोरथो मथुरानिवासिजनप्रशंसाभाजनीभूतः कनकरत्नराशिसमृद्धकोषो लोहजंघोऽनन्यसदृशीं रूपिणीं विधिवत् परिणीय यावज्जीवं वीतज्वरो वीतदरिद्रभावस्तया पतिव्रतया साकं सहवाससुखमनुत्तममनुबभूवेति। इत्येवमतिवैरूप्याद्भुतदर्शनेन वसन्तकेन कथितामतिवैचित्र्याद्भुतरसनिस्यन्दिनीमाख्यायिकामनुश्रुत्य संतुष्टिसंहर्षम्याधिकविकसितवदनसरसीरुहा राजतनया वासवदत्ता मञ्जुलमञ्जुलं कटाक्षवाणं साकूतमुपकण्ठवर्तिने वत्सभूभर्त्रे चिक्षिपे। सोऽपि वीणाचार्यो वत्सभूमण्डलेश्वर उदयनोऽनल्पकालपरस्परपरिचयजनितविश्वासावर्जितमानसां कालक्रमानुसारेण दृढीभूतगाढानुरागबद्धाव्यभिचारिपक्षपातां सर्वंदमकुसुमायुधाज्ञावशंवदां गन्धर्वविद्यार्थिनीं वासवदत्तां ज्ञात्वा संहृष्टचेताः सन् विपणसमधिपणस्य यौगन्धरायणस्य प्रज्ञासाहाय्येन तस्या अपहरणे मनो बबन्ध। ततोऽल्पीयसि कालेऽतीते योगप्रभावादृश्यरूपो लब्धवर्णो यौगन्धरायणो वत्सरा॰

पुनः प्रच्छन्नमुपेत्य वसन्तकोपाक्षं पलायनसाधनमधिकृत्याममन्त्रत देव यथैव बलाभिमानगर्वितो धूर्तश्चण्डमहासेनोऽपौरुषेयेण कैतव-प्रयोगेण त्वां जीवग्राहमग्रहीष्ट तथैव वयमपि तदीयकूटोपायप्रतीकारविधानार्थं तस्य दुहितरमाच्छिद्य स्वागपसरामो राजन् विद्यतेऽत्र वासवदत्तायास्तरस्विनी महाबला हस्तिनी यामधिरुह्य वसन्तकसखस्तया सार्धमद्य तामिस्रायाममुकममुकं पन्थानमनुसृत्य सत्वरं पलायस्व तदर्थमापाढको नाम तस्या आधोरणोऽपि प्रचुरोत्कोचदानेन मयात्मसात्कृतस्त्वयापि पलायनार्थं सर्वा निभृतमेव सज्जीक्रियतां भवद्वर्त्मपरिरक्षणहेतोः पूर्वमधुना साधयामि भवदीयसख्युर्वनेचरेश्वरस्य पुलिन्दकस्यान्तिकमिति । मतिसचिवप्राग्रहरेऽग्रे प्रयाते ततस्तन्मन्त्रवचः प्रतिपद्य निश्चितगमनाध्यवसायां विश्रम्भस्नेहास्पदीभूतसहचरीकाञ्चनमालासमन्वितां राजात्मोद्भवां वासवदत्तां समादाय सवसन्तको वत्सराज उदयनो नक्तं सर्वेष्वन्तर्वंशिकप्रमुखेष्ववरोधरक्षिहस्तिपकेष्वतिशयमद्यपानक्षीवेषु निःसंज्ञं निद्रितेषु जवनकरेणुकाध्यारूढो महीनाथः शस्त्रपाणिरुदयनो राजकुलात् तरसा निष्क्रम्य ततो गोपुररक्षकान् भृशं प्रहत्य तूर्णमदुद्रुवत् । तत्क्षणात् पुररक्षिभिर्विज्ञापितोदयनवासवदत्तापलायनोदन्ते तेनैव काकतालीयेन विस्मापितमनसि वसुधाधिपे चण्डमहासेने किंकर्तव्यतामूढेऽशेषे च नगरे सहसोत्थितोल्वणकोलाहलसंक्षोभिते विनिद्रे सत्युद्दामामर्षज्वलनज्वलितो राजसूनुः पालको नडागिरिं मतङ्गजेन्द्रं समारुह्य रंहसा द्रुतमुदयनमनुद्रुत्य पृष्ठतः सरोषं

कार्मुकमास्फालयन् तेजिताग्रैर्नाराचैरजस्रं प्राहार्षीत् । धृतिसागरस्तरस्वी वत्सनृपतिरपि परिवृत्य कर्णपर्यन्तविस्फारितधन्वा वाणाभिवर्षणैस्तं प्रतिप्राहृत । एवंभूते व्यतिकरे मालवेन्द्रश्चण्डमहासेनो निकटवर्तिनं ज्यायांसं तनूजमथादिदेश गोपालक गच्छ शीघ्रं कनीयांसं भ्रातरममर्षणं वीरं पालकमुदयनाभिद्रवणान्निवर्तय गच्छतु तो वहुमतो वत्सेशो यथेप्सितमभीष्टां दिशमिति । शिरसि धृत्वा पितुराज्ञां सुग्रीवनाम्ना वायुवेगेनाजानेयेन सप्तिना तूर्णमनुधाव्य कौशाम्बीपतिना नियुध्यन्तं शूरमनुजं सान्त्वयन्नुज्जयिनीं निनाय । भूपतीच्छानुवर्तिनोस्तयोर्भ्रात्रोः प्रतिनिवृतयोर्वत्सभूभर्तरि च विश्रब्धं निर्विघ्नं प्रचलिते तत उत्तरेद्युर्मध्यंदिने ललाटंतपतपनकिरणपरितापितं नखंपचं विन्ध्यभूध्रोपान्तमासाद्यानारताध्वपरिश्रमतृषार्ता दन्तिनी भद्रवती दुर्निवारपिपासावशाद् विषदूषितं कासारसलिलमुदरपूरं पीत्वा युगपद्गीतचेतना तिग्मांशुपरिपाचिते पांशुले धरणीतले निपपात तत्समकालं च समस्तेष्वुदयनप्रमुखेष्वध्वनीनेषु सुतरां दुर्मनायमाणेष्वकाण्डे सरस्वती व्योम्नः समुत्तस्थौ शशिवंशावतंस वत्सेन्द्र मायावती नाम विद्याधरयोषिदहं हृदयशोषणाच्छापादद्यपूर्वं दुस्सहवेदनामयं कालं भद्रवतीसंज्ञा करेणुका समभूवं, प्रेयसीसहितस्य तवोपकृत्य संप्रति मुक्तशापा सुचिरात् पुनर्लब्धविद्याधरीपदवी वासवदत्तायां जनिष्यमाणस्य त्वदीयौरसस्य भाविविद्याधरचक्रवर्तिनो भूयोऽप्युपकरिष्यामीति । आकर्ण्य भद्रवतीं भद्रवतीवाणीं संप्रमुदितमना वसुधाधिपो

दत्तवासवदत्ताहृन्तावलम्बनः पादचारी शनकैः प्रचरन् निजागमन-निवेदनाय वनान्तकं गन्धर्वे पुलिन्दकाय प्राहेषीत् ततश्चाल्पीयसि समयेऽतियातेऽग्रयायिवनान्तकदर्शितमार्गेण यौगन्धरायणसहितेन सुहृदागमनप्रहृष्टेन किरातेन्द्रेण पुलिन्दकेन प्रीतिपूर्वं स्वागतीकृतः सन् तस्य दुर्गपुटभेदनमनुप्राप्य तत्र दीर्घाध्वश्रमापनोदाय तां निशीथिनीमतिवाहयितुं मनोऽकृत । अत्रान्तरेऽनुपदं तूर्णमभ्येत्य यौगन्धरायणस्य नत्वा सार्थवाहः प्रणम्य स्मितपूर्वं तत्रस्थं राजानमिति व्यजिज्ञपदायुष्मन् मालवभूभृन्महाराजश्चण्डमहासेनोऽन्योन्यप्रेमप्ररूढिगाढबद्धहृदयौ युवां विदित्वा प्रीतमनाः प्रसादोन्मुखो भूत्वा युवयोः पाणिग्रहणमहामहमुद्दिश्य प्रतीहारमद्य युष्मत्सकाशं प्रेषितवान् । इत्युपलभ्य शुभंयु प्रवृत्ति चरितार्थमात्मानं मन्यमानो दयितासखः उदयनो लज्जावैलक्ष्याधोमुख्यां दयितायां वासवदत्तायां प्रीतिप्रोत्फुल्लां दृष्टिं सस्मितं निपात्य पार्श्ववर्तिनमपनीतवैरूप्यं प्रकृतिस्थं मतिसचिवाग्रण्यं यौगन्धरायणमवोचदिदानीं कौशम्वीप्रतिगमनायास्मदीया विजयध्वजिनी समाहूयतामिति तत्क्षणं च राजन् कतिपयेभ्यो वासरेभ्यः पूर्वमेतदर्थं संदेशहरं प्रेष्य मयाकारितः सेनानीर्महायशा रुमण्वांश्चतुरङ्गपरिपूर्णया वरूथिन्या सममद्य वा श्वो वा ध्रुवमिहासादयिष्यतीति तेन प्रत्युक्तेऽतीव प्रसन्नचेताः प्रशंसामुखरः सततोत्थानशीलस्योपकारिणस्तस्य दूरदृष्टिमभ्यस्तावीत् । सापि वरवर्णिनी सान्द्रानुरागरञ्जितहृदया परित्यक्तबान्धवा नृपतनया वासवदत्ता वणिग्मुखात् तावेव हृदयं-

गमां वार्तामुपश्रुत्य वैलक्ष्यविक्लवा निजगृहनिष्क्रमणव्रीडितेव नम्रिताननां पितृस्नेहं बहुमन्यमाना मनस्यतुलमानन्दातिशयमनुभूय सन्निकर्षवर्तिनं नर्मकथाकोविदं वसन्तकमयि विचित्रकथाविदामग्रेसर कामपि दीर्घाध्वश्रान्तहृदयप्रह्लादिनीं कथामिदानीमुपवर्णय यदीच्छसीति सानुनयमवादीत् । आकर्ण्यतां देवि यदि शुश्रूषेति कथामुखे प्रस्तुत्य समयोचितं पातिव्रत्यबृंहणमुपाख्यानं कथयितुमुपचक्रमे मनीषी कथानिधिर्वसन्तकः । अस्ति पौरुहूतायां ककुभि रुचिरदिवाकरोदयारुणसुषमारोचिष्णुपूर्वार्णववेलाकृतसंनिवेशे सांयात्रिकवाणिज्यापार्जितहीरकहरिन्मणिपद्मरागवैदूर्यमुक्ताकार्तस्वरखर्जुराद्यनन्तद्युम्नद्युतित—महाकोशतिरस्कृत—वैश्रवणनव — निधौ सह्यजनपदेऽचंचललक्ष्मीविभ्रमभूमिरप्रतिमस्वापतेयवैभवसदासुखितपौरलोका सततस्पर्शनसुभगमृदुलगन्धवाहवाहिकपिशाशैवलिनीकूलवर्तिनी ताम्रलिप्तापुरी यत्र बभूव किल धनगुप्ताह्वो धनाढ्यः सांयात्रिकः । सोऽनपत्यतादुःखितः पुत्रकामो जातु निजवेश्मनि बहूसंख्यकान् विप्रयायजूकानुपनिमन्त्र्य कल्पितपूजाविधिः सविनयमभ्यर्थयाञ्चक्रे भो ब्राह्मणाः कुलस्थितिकरसंतानविच्छेदेन संपत्समृद्धं चिरन्तनमपि मामकं गोत्रं विनङ्क्ष्यति मनसि मेऽसहनीया वेदना संजाजायते तस्माद्धेतोर्भाविनः पुंनाम्नो नरकान्मां परित्रातुं प्राप्तकालं मार्गं मे दर्शयतेति । सौम्य मा विषादं गमोऽस्मादृशानां शास्त्रविदां साहाय्येन सुकृतिनो मनीषितार्थं साधयन्ति यथा पुरा सोमकाभिधो यजमानः कोऽपि नृपः कर्मकाण्डप्रमुखनानाविधाध्वर-

दयितं द्वितीयं मीनकेतनमिव श्लाघनीयसौन्दर्यसौशील्यविभूषित-स्वरूपं तं गुहसेनं दृष्ट्वैव युगपदुत्थितमनसिशयाज्ञा-वशीकृतहृदया साभिलाषा भूत्वा तस्य यूनः कृते हृदि सद्योऽकुरितस्य प्रेमप्रसून-स्यार्थे चात्मानं समर्पयितुं कृतवन्धुजनपरित्यागनिश्चया सहचरी-द्वारा निर्दिष्टे संकेतनिकेतने निशि प्रणयिनं तमभिससार। सोऽपि गुहसेनस्तस्याः प्रथमदर्शनमात्रोद्भूतमदनमदातुरोऽभिसरणरोमां-चितसर्वांगो भूत्वा लब्धजनकानुमतिस्तां स्वयंवरां सुन्दरीं समादा-यार्धरात्रे पित्रा साकं तस्माद् द्वीपादुपांशु विनिर्जगाम। ततः कालेन ताम्रलिप्तां समासाद्य सकलबन्धुसुहृज्जनाभिनन्दितयोर्यथावद् विहितपाणिपीडनमहोत्सवयोस्तयोर्वरवध्वोरुद्दाममन्मथामृतनिर्भर-संसिक्तयोः सुदृढबद्धमूलोऽनुरागप्ररोहः शनैः शनैर्वर्धमानः प्रौढिं ययौ। ततोऽनेकेषु संवत्सरेषु व्यतिक्रान्तेष्ववारणीयकालपाशाकृष्टे प्रवयसि पितरि कुलधुर्यस्य वाणिज्यकृतमुखस्य देहजस्थ स्कन्धे पारंपरिण-कुलव्यवहारधुरं न्यस्य दिष्टान्तमुपगते वणिग्वरो गुहसेनोऽपि वैश्यवृत्तिलब्धकीर्तिः सन् बान्धवमित्रगणैः प्रोत्साह्यमानोऽतिविदूर-स्थकटाहद्वीपप्रयाणे मनो बबन्धस्तदनु च गृहाभ्यन्तरे प्रविश्य हे प्रियतमेऽदभ्रहिरण्योपार्जनार्थं कतिपयदिनान्तरे समुद्रयानेन कटाह-द्वीपं यास्यामि तद् धैर्येण धैर्येण नयने निमील्य त्वयेहस्थया मम प्रत्यागमनं प्रतीक्ष्यतामिति विरहाशंकाविह्वलां दीनदीनां साश्रु-वदनां दयितभार्यामभिबभाषे। अयि नाथ कियद्दूरे वर्तते कटाह-द्वीपं कदा प्रत्यागमिष्यसि तत्रगतं सुरूपं वियोगसमयाननु

भोगरसं त्वां तत्रत्याः सुभगा वामलोचना गम्भीरायां स्मरवागुरायां सहेलं कटाक्षवागैर्नूनं निपातयिष्यन्ति हे प्रियतम कथं नाम प्रयाणाय त्वामनुजानामि मया सह गच्छान्यथा मां पुनर्न द्रक्ष्यसीति भर्तृविश्लेषासहिष्णुरजस्रनिपतद्बाष्पबिंदुसंततिनिष्पादितमुक्तावलिविलसच्चारुवक्षोरुहा गाढानुरक्तप्रेममञ्जरी सा देवस्मिता दयितस्य पत्युरश्रुक्लिन्नं मुखं तृपितया दृशा पायं पायं सविषादं प्रत्युवाद । एवंकारं वाणिज्यव्यवहारविज्ञेषु ज्ञातिमित्रेषु द्वीपयात्रां प्रति प्रोत्साहयत्सु भार्यायां तु चिपेधन्त्यां किंकार्यतादोलायितमनाः सभार्यः संशितव्रतः स पोतवणिग् हे प्रभो संशयं मे छिन्द्धि प्राप्तरूपं मार्गं दर्शयेति प्रार्थयमानोऽर्धेन्दुमौलिं पार्वतीजानिमुपासाञ्चक्रे । तयोर्मिथःप्रणयसंदेहापन्नयोर्जम्पत्योरुपवांसनियमप्रीणितो वृषभवाहनः शंभुः स्वप्ने साक्षादाविर्भूय युवामेकैकं कमलमिदमुपाददाथामवश्यंभाविनि विरहे यदि युवयोरेकः शीलखण्डनेन प्रणयभङ्गं विधास्यति तर्ह्यपरस्य करे धृतं कमलं सपदि परिम्लास्यतीति स्मितपूर्वं व्याहृत्य प्राधान्येन शीलसंरक्षणार्थं कोकनदद्वयं ताभ्यामतिससर्ज । तदनु सुप्तोत्थितौ तौ प्रणयिनौ जायापती परस्परस्यानुरागरक्तं हृदयमिव भक्तवत्सलेन कैलासवासिना कृशानुरेतसा स्वयं हस्ते न्यस्तं लोहितसरसीरुहं प्रत्क्षीकृत्य जहृषतुस्ततश्च शुभंयुशकुने पुण्याहे ज्ञातिसुहृज्जनाशीर्वादप्रमुदितो गुहसेनः सस्नेहं प्रियजायामापृच्छ्य तदेव शांभवरक्तसरोजं हस्ते सगौरवं धृत्वा प्रतस्थे । तदानीं पारावारवेलापर्यन्तं सगोत्रवधूभिः समं तमनुसृत्य तस्मिन्

भर्तरि समुद्रप्रवहणमधिरुह्य दृष्टिगोचरातीते प्रथमवियोगानल-संतातप्यमाना निःशब्दं रुदन्तीं करतलधृतरक्ताम्बुरुहनिक्षिप्त-लोचना सा देवस्मिता सखेदं गृहमाजगाम। अथ काले कटाहान्त-रीपं समुद्रयानपात्रेण प्राप्य व्यवहारकोविदः स रक्ताम्बुजपाणिर्गुह-सेनो महार्घनानाविधमणिचामीकरभाण्डक्रयविक्रयतत्परोऽल्पेनैव कालेन परिपणाधिकफलप्राचुर्योदयेन लाभवाञ्शनैः शनैर्बहुकृत्वो वृद्धिं गतेन फलेन रत्नभाण्डवाणिज्यं चक्रे तं च तथाभूतं प्रत्यग्र-विकसितमिव सतताम्लानमरुणवारिरुहं करे धारयन्तं विलोक्य विस्मितमनसश्चत्वारस्तरुणवणिजः किमप्यत्राद्भुतं कारणं स्यादिति मनसि विधाय तज्जिज्ञासाप्रेरितकौतुकास्तं निपुणेनानवरतमद्य-पानेन निर्भरं क्षीवयित्वा हस्तगृहीताम्लास्नुरक्तकुशेशयगतां वार्तां तं सकौतुकमनुयुयुजिरे पृष्टश्चासौ निसर्गपरिमितभाषणशीलोऽपि मदावस्थावाचालो भूत्वा तद्गतं सर्वं निर्विचारं कथयाम्बभूव। मन्यामहे यदयं कोकनदपाणिर्गुहसेनः स्वकार्यवशादत्र सुचिरं निवत्स्यति तद् वयं सर्वे ताम्रलिप्तामविलम्बितं गत्वा तस्यः पति-देवतायाः शीलवंचनां कथंचिद्युक्तितः करिष्यामस्ततस्तस्यां सुचरि-तायां संदूषितायां प्रतिनिवृत्य तस्य परिम्लानं शैवपद्मं संपरीक्षि-तास्मह इति मिथः संमन्त्र्य दुर्निवारकौतूहलावर्जितान्तरङ्गास्ते

वेषा तमाश्रित्य गृहकृत्यान्यतन्द्रितेन मनसा सम्यक्कुर्वन्ती विश्वस्तस्य तस्य वणिजो महामूल्यसुवर्णरत्नराशिं सर्वस्वभूतं प्रातस्तरां चोरयित्वा त्वरितगतिस्तस्मात् पत्तनाद्रहोऽपससार। अथ विविक्तेऽरण्यवर्त्मनि सत्वरं गच्छन्तीं पृष्ठारोपितलोप्त्रभारावनम्रपूर्वकायां तां यदृच्छयोद्वीक्ष्य धनलोभात् तां जिघांसुः कोऽपि भयंकराकृतिः पश्यतोहरो वामहस्ते मुरजं दक्षिणहस्ते तेजितधारां क्षुरिकां धृत्वा साक्रोशं पृष्ठंतोऽनुदधाव। तं घोरालोकं मलिम्लुचं दृष्ट्वा न्यग्रोधतरुतले सपद्युपविश्य च सा धूर्तकितवी सिद्धिकरी प्रमुक्तकण्ठं सशोकमिव रुदित्वा कण्ठनिरुद्धाश्रुगद्गदं सकृपणं तमभिवभाषे सौम्य कलहकुपितेन पत्या गेहान्निर्वासिता क्षीणपुण्या मन्दभागिनी जीविते निराशा सांप्रतमात्महत्यां कर्तुमिहागतास्मि तेन हि मदर्थेऽस्य न्यग्रोधशाखिन ऊर्ध्वशाखायां दृढलतापाशं बधानेति। यत इयं वराकी स्वयं मर्तुमिच्छति ततः किंनिमित्तमिमामाहं व्यापादयामीति मनसि विधाय पाटच्चरस्तं महोरुहमधिरुह्य कठिने विटपे पाशं बबन्ध तत्समनन्तरं चावरुह्य हे वासु तव मरणार्थं पाशं सज्जीकृतवानहं तच्छीघ्रं वृक्षं स्तोकमारुह्य मया धृतमिदं पाशमण्डलं कण्ठे कुरुष्वेति समुदीरयामास। तदनु सा वञ्चुको सिद्धिकरी कातर्यतरलिताक्षी मूढबुद्धिरिव सगद्गदं

परिचुम्बन्ती जिह्वया जिह्वां लिहन्ती च परमप्रीतिघूर्णितनेत्रस्य भृशं दण्डायमानं मेहनं स्वरतिमन्दिरे सरभसं निवेशयितुमुद्यतस्य कामुकस्य जिह्वां प्रसह्य दन्तैर्युगपत् परिचिच्छिदे । तस्मिन्नेव क्षणे तीव्रवेदनाभिभूतोऽसौ तपस्वी लल्ललल्लेत्यविस्पष्टशब्दोच्चारण-पुरस्सरं क्षितितले बभ्रंशे तं च दृष्ट्वा मुखादुल्बणरुधिरोद्गारिण-मतिभृशं व्यथमानं ते सर्वेऽन्ये भीतभीता राक्षसीग्रस्तोऽयं वराक इति मत्वा सर्वासु दिक्षु जवादपसस्रुः । ईदृक्प्रतिभानप्रभावा समग्रमायाविनीपुरोगामिनी मेऽभिमता शिष्या तापसीमतल्लिका सिद्धिकरी ततोऽत्रागत्य यथावृत्तवृत्तान्तविज्ञापनपूर्वकं वणिक्सर्व-स्वं लोप्त्रं ममोपाहार्षीत् संप्रति तु कार्यान्तरवशाद् बहिर्निर्गता साधुनैव प्रतिनिवर्तिष्यत इति । इत्थं मायोपजीविन्या योगिन्या स्वशिष्याचरिते साटोपमुपवर्णिते सैव विश्रुता कौटिल्याजीवा मायायोगिनीनामग्रिमा संन्यासिनी सिद्धिकरी प्रादुर्भूय भक्तिप्रह्वेण मनसा तां वृद्धां विदग्धतापसीवृन्दारिकामाचार्यां प्रणनाम तदनन्तरं च तत्रोपविष्टांस्तांश्चतुरो यूनः सकौतुकमवलोक्य हे अम्ब वैदेशिका इव दृश्यमाना युवान एते के कथ्यतामिति ताम-प्राक्षीत् । अयि पुत्रि ते स्वागतं शृणु विदूरवर्तिनो द्वीपान्तरात समायाता एते वणिग्युवानो नो बहुमता अतिथयस्त्वत्साहाय्येन

नान्येतानि दिवसानि दीर्घदीर्घनिश्वासेष्वनारतप्रवहद्वाष्पप्रवाहेषु कथंचित् कथंचिदतिवाहयन्त्याः प्रियभर्तुः सस्पृहं सततमनुस्मरन्त्यास्ते दयतेतमां मे मनोऽपीत्यादिभिर्भधुरैर्वचोभिस्तां सकृपमिव सान्त्वयित्वा तदीयवासगृहान्निरगात्। । अपरेद्युरतितिक्तमरीचचूर्णसान्द्रावलिप्तं पिशितपिण्डमादाय यथापूर्वं शिष्याकृतानुयात्रा गुहसेनवसतिगृहं प्राप्य सा योगकरण्डिका प्राङ्गणस्थायै शुन्यै तदेव मांसपिण्डं प्रादात्। सापि बुभुक्षिता सारमेयी साधुवादार्थहस्ततालस्थाने पुच्छमितस्ततश्चालयन्ती घ्राणतर्पणमकाण्डोपनतं सुस्वादु मांसशकलं यथातृप्ति साकल्येनावभक्षत्। यावत् सा कुक्कुरी कटुमरीचजनितपरितापाक्षमा रसनां बहिर्निकृष्य जलसंतर्ति नासाविवराभ्यां नेत्राभ्यां च निस्यन्दमाना तीव्रवेदनया सुतरामदोदूयिष्ट तावदभ्यन्तरे शिष्यया साकं प्रविश्य देवस्मितया पुष्पफलादिनार्घेण सभाजिता सा वृद्धा मायोपजीविनी योगकरण्डिका सहसा साश्रुनयना रोदितुं प्रावर्तिष्ट। भगवति कस्मादकस्माद् रदिषीति तया पतिदेवतया पृष्टे सा तापसी सखेदमिव प्रत्यवोचत् सुभगे किं न पश्यस्यजस्रनिपतदश्रुक्लिन्नाक्षी त्वदीयैषा सारमेयी जन्मान्तरसहचरीं मां

सन्त एषा निकृष्टवञ्चुकी सशिष्या संन्यासिन्यपि स्वदुश्चरित-फलमनुभवत्विति यथावृत्तं देवस्मिताकर्तृकं खलीकारोदन्तमनिवेद्यैव हे भगवति परमयोगशालिन्यास्ते साहाय्येन मधुरिमातिरेकहृदिस्पृशा देवस्मितासुरतोपभोगेन कृतार्थीभूय स्वदेशं प्रतिगच्छामस्त्वमपि हृदयंगमनिधुवनसुखितां तामभिनन्दयितुं तद्गेहं गच्छेति व्याहृत्य तस्यै किञ्चिद् धनमपि दत्त्वा यथागतं जग्मुः। उत्तरेद्युर्निजकार्यसिद्धिसंभावनाप्रमुदिता लोकोत्तरमायायोगिनी सा योगकरण्डिका देवमितायाः प्रशंसावादपुरस्सरं पारितोषिकं लब्धुकामा शिष्यया सिद्धिकर्या सार्धं तदीयं निवासस्थानं प्रययौ। ततो गृहागतां शिष्यासहितां तापसीं सत्कृत्य कृत्रिमस्मितविकस्वराननना चरित्रकवचा साध्वी सा देवस्मिता प्रबलधत्तूरकचूर्णोपेतं मधुरं मधु पाययित्वा मद्यवेगापहृतचेतनयोस्तयोर्नासिकाकर्णांश्छुरिकया परिच्छिद्य ते कुस्त्रियौ पुरीषकर्दमाधाने परिजनेन प्राचिक्षिपत् तदनु चैतेऽस्मत्खलीकारविमनीकृताः सारमयेचरणाङ्किता-लिका दुर्दशापन्ना वणिग्युवान उन्मत्तश्वान इव निजजनपदमागत्य मा जातु भर्त्रे गुहसेनायाभिद्रुह्येयुरिति मनसि विधाय कटाहद्वीपगमने कृतनिश्चया सती श्वश्वै यथासंवृत्तां तामेव वार्तां सविस्तरं न्यवीविदत्। उपश्रुत्य चमत्कारात्मिकां रोमहर्षणीं सतीसद्वृत्तिशंसिनीमतिप्रशंसनीयां वार्तामयि वत्से साधु साधु, भर्तृवत्सलया त्वया शीलसंरक्षणं सुष्ठु विहितं परन्तु मे पुत्रकस्य ते प्राणसमस्याकल्याणं नूनं समुत्पद्येत किमत्र कर्तव्यमिति श्वश्वां

चरन्ममान्तरात्मानमतिवेलं प्रह्लादयन्नग्रे दृश्यमानः कोऽयं स्यादिति। सापि मनस्विनी देवस्मिता राजानमभ्युपेत्य राजन् बालस्त्रीजनवर्जं सर्वे नागरिकाः सर्वास्थानमण्डपे समाहूयन्तां यथा किमप्यत्यावश्यकं विज्ञाप्यं मेऽस्तीति प्रश्रयणपूर्वमभ्यर्थयाञ्चक्रे ततश्च निःशेषपौरेषु तत्र समुपस्थितेषु किं ते विज्ञाप्यमस्तीति भूभुजा सकौतुकं पृष्टे देव ये मे चत्वारो दासास्ताम्रलिप्तानगरात् पलायिता इह तिष्ठन्ति तानायुष्मान् देवो मे प्रतिददात्विति विज्ञप्तिं चक्रे। सौम्य पश्य यर्हि समस्तपौराः संभूयात्र समुपस्थितास्तर्हि तांस्त्वदीयान् दासान् प्रत्यभिज्ञाय यथेप्सितं गृह्णीष्वेति तत्रत्येन वसुधाधिपेन समादिष्टा पुंवेषा साध्वी सा देवस्मिता सभामध्यस्थाञ्शारदीय--बलाहकपाण्डुरोष्णीषपट्टनिगूहितललाटतटान् खलीकृतपूर्वांश्चतुरस्तरुणान् प्रत्यभिज्ञाय राजन्निमे मे दासा इति निगद्य च जग्राह। तत्क्षणात् खपुष्पोपमं काकतालीयं व्यतिकरं प्रत्यक्षीकृत्य विस्मयरोषाविष्टमानसास्तत्रत्याः सर्वे सभासद उच्चैराचुक्रुशुर्भो राजन् कुतः शशशृङ्गमयं धनुरुपलभ्यते कथं बन्ध्यासुतः संभवति कथं पुनरेते वणिक्सुताश्चत्वारो वैश्यजातीयाः परवशंवदा दासा भवन्तीति। यूयं सर्वे मम वचनं न श्रद्धद्ध्वे चेत् तर्हि ज्वलनतप्तेन लोहमयेन कौलेयकपादेन मया कृतलाञ्छनान्येतेषां चतुर्णामलिकानि संपरीक्षध्वमिति वणिग्रूपधारिण्या तयोक्ते ते पारिषदास्तेषामनिच्छतामपि यूनां शीर्षवेष्टनानि बलात्कारेणापनीय भालेषु शाश्वतीः समाः स्थायीनि सारमेयप-

वसन्तकेन कथितां सदाचारशीलोपदेशगर्भामनल्पाश्चर्यरसप्रस्रविणीं सुचरित्राकथां समुपजोषमाकर्ण्य हृष्टमानसा राजपुत्री वासवदत्तापि देवस्मिता भर्तरीव वत्सभूमण्डलाधीशश्वरे गाढबद्धानुरागद्विगुणीकृतां शाश्वतीं भक्तिं बबन्ध। अत्रान्तरेऽवन्तीश्वरवाचिकहरः प्रतीहारो विन्ध्याद्रिदुर्गस्थं तं वत्साधीश्वरमुदयनमभ्युपेत्य सादरकृतप्रणतिः कुशलप्रश्नपूर्वं तमभिदधे महाराजश्चण्डमहासेनः समादिशति यत् त्वमस्मद्दुहितरं प्रच्छन्नमपहृतवांस्तत् समंजसमित्यनुमन्यामहे केवलं तस्याः कृते पूर्वं विन्ध्याटवीतो मायादन्तावलप्रयोगेन विलोभ्य त्वां जीवग्राहं गृहीत्वोज्जयिनीमनीनयमिति ते विदितमस्तु किंच यदि वयं बन्दिने ते वासवदत्तां स्वयमदास्यामहि तर्ह्यस्मासु ते प्रणयो नूनं न समजनिष्यतेति संदिग्धमतिभिरस्माभिस्तदानीं सा न दत्तेदानीं तु मिथःसंजातगाढस्नेहपाशसंदानितहृदययोर्युवयोः सर्वलोकसंमतविधिवत्पाणिग्रहणमहामहं निर्वर्तयितुमस्मदीयो ज्येष्ठतनूजो गोपालको वैवाहिकोपायनसामग्रीमादाय युष्मदन्तिकं प्राप्स्यतीति तदनन्तरं च प्रतीहारो वासवदत्तां सादरं प्रणम्योवाद राजपुत्रि त्वज्जननी महादेव्यङ्गारवतीत्थं संदिशति वत्सावत्सलायै मह्यमप्यनिवेद्यैव रहः प्रणयिनोदयनेन सह पलायितां त्वां ज्ञात्वा हृदयं मे विषादेनेदानीमपि विदेदीर्यते वात्सल्यार्द्रार्द्रमानसां त्वत्प्रसूं मामपि निरनुक्रोशेव परित्यज्य किं न लज्जसेऽयि वत्से सुचिरमुदयनस्य भार्यात्वे कल्पिता त्वं तेनैव समं निष्क्रान्तेति किञ्चित् समाश्वासमनुभवामि यतो हि तव

मन्मथजायाया मालवेन्द्रचण्डमहासेनसुताया वासवदत्ताया नूतन-विकस्वरवासन्तीप्रसूनाधिकसुकुमारं करकिसलयं सानन्दं गृहीत्वा तया समं सप्तपदीं चकार । अथैवं विधिवन्निर्व्यूढे परिणयविधौ क्षमाभृदुदयनः पट्टबन्धनभूरिप्रत्युपहारविश्राणनपूर्वकेण सपर्या-विधिना सान्द्रसौहार्दनिधिं श्यालं गोपालकमूर्जस्विनं सखायं पुलिन्दकं च यथायथं स्वयं सभाजयित्वा करदीभूतानां सामन्त-नृपाणां पौरजानपदानां च यथोचितसत्क्रियाविधौ तौ मुख्य-मन्त्रिसेनान्यौ यौगन्धरायणरुमण्वन्तौ नियुयुजे । सततप्रभविष्णु-समादेशविधेयोऽपि संख्यातिगप्राघूर्णिकसमुदायसंमाननकर्मनियुक्तः सन् मन्त्रिमुख्यो यौगन्धरायणः सहायं वाहिनीपतिं रुमण्वन्तमेव-मभ्यवादीदहो सखे दुर्वहराज्यधूर्वहनादपि गरीयसि दुष्करे कार्ये प्रभुणेदानीं नियुक्ता आवामेतस्मिन् विवाहमहोत्सवप्रसङ्गेऽत्र सम-वेतं बहुविधचित्तवृत्तियुजमतिथिसमूहं सर्वात्मना भोजनादिसत्का-रैर्मनोऽनूकूलतो प्रापयितुं कथं शक्नुयाव यथा लोकचित्तवृत्तिरतीव दुरवबोधा दुराराध्या खलु बोभवीति हि सखे सम्यगसंतोषितो डिंभकोऽपि मनसि मन्युं भजेत विद्यतेऽत्र निदर्शनं श्रूयतां पुरा बभूव किल देवसेनसंज्ञकेऽग्रहारे रुद्रशर्माभिधः कोऽपि द्विजातिस्तस्य च बभूवतुर्द्वे भार्ये तयोरेका पुत्रमेकं जनयित्वा दिष्टान्तमुपजगाम तं शिशुं विनष्टकनामानं परिपोषणार्थमपरायाः पुत्रिण्या जायाया हस्ते स रुद्रशर्मा प्रिये मातृविहीनं त्वत्प्रसूतपुत्रसमानमिमं मे नन्दनं सस्नेहं परिपोषयेत्युक्त्वा समर्पयांमास सा तूदरंभरिः स्वौर-

सोदरपोषणतत्परा निस्त्रिंशहृदया विमाता तं डिम्भकमपथ्यभोजनदानेन परिकर्शयाम्बभूव तं च दुर्बलं परिकृशमस्वास्थ्यपाण्डुराङ्गं पिचण्डिलमात्मजमवलोक्यातिभृशं दुःखितः स रुद्रशर्मा तां सखेदमनिन्दीज्जनयित्रीविहीनत्वात् स्वीयपुत्रापेक्षया समधिकानुकम्पार्हमपि मम पुत्रकं कस्मात् त्वमीदृशीं दुरवस्थामजीगम इति सापि मृषावादिनी वितथमभ्यधादनिशमतन्द्रितया मया दुग्धघृतौदनादिभिः पथ्यैरशनैः स्वकीयतनूज इव परिपोष्यमाणोऽप्ययं बालकः स्वभावत ईदृगवस्थः संवृत्तो नात्र मेऽपराधगन्ध इति तच्छ्रुत्वैष मे पुत्रकः प्रकृतिकृशतनुरिति तदीयालीकवचनविडम्बितः सरलाशयः स द्विजोऽमंस्त ननु मधुरिमनिस्यन्दिना विदग्धांगनानामनृतवाक्येन को नातिसंधीयते तदानीं व्यलीकवादिन्याः कुटिलस्वभावायास्तस्या विमातुः सूनृतविपरीतं वाक्यमाकर्ण्यान्तर्ज्वलितामर्षानलो वयसा पञ्चवर्षदेशीयोऽपि बुद्धया प्रौढसमोऽसौ बालविनष्टको यथा कदर्या विमाता मां सततं पीडयति तथाहमपि केनाप्युपायेन तस्याः प्रतीकारं विधास्यामीत्यध्यवस्य राजभवनात् प्रतिनिवृत्तं जनकं तात द्वितीयः पितापि मेऽस्तीतीषदविस्पष्टमभ्यभाषिष्टैवमर्हदिवि वारंवारं बालके तस्मिन् वदति सोऽपि संजातेर्ष्यामर्षः सभ्रूभंगमुखो रुद्रशर्मा तां भार्यां कुशीलां पांसुलां संदिह्य सर्वथा परिहरणीयं किल्विषमिव न केवलं तस्याः शरीरसंपर्कं दर्शनमपि व्यवीवृजदेवं गते परिखिन्ना सा विमाता सुतरां दुर्मनायमाना कथं

नाम भर्ता मेऽनपराधायै कालमियन्तं चोक्रुधीति ध्रुवं मया कदर्थितेन मृतसपत्नीपुत्रहतकेन किमप्यनभीष्टमनुष्ठितं स्यादिति चेतस्यवधार्य कृत्रिमवात्सल्यव्यंजनेन क्षीरसर्पिःशर्करासुसंस्कृतं स्वादु मिष्टान्नं तं भोजयित्वा सगौरवं तं क्रोडीकृत्य च कपोले परिचुम्बन्ती सानुनयमप्राक्षीद्वे वत्स मदीयपुत्रादपि गरीयांस्त्वमसि मेऽप्रतिमस्नेहास्पदं तथापि कच्चित् त्वं पितृपादान् ममोपरि निष्कारणमेव प्राचूकुप इति तस्या भणितं निशम्य स डिम्भस्तां प्रत्यवादीदथ किं हे विमातरतोऽप्यधिकाधिकं विप्रियं ते करिष्यामि यदीत्थं मां व्यथयितुं कुस्त्री त्वं निर्बध्नासि कमर्थमपेक्ष्य निजयोनिजपोषणलालनैकतानमानसा निर्दया त्वं मामपमृत्युं प्रापयितुं मह्यं कृपणाय सततं दोग्ध्रीक्षीति बालकवचनश्रवणोत्थपश्चात्तापपरितापिता सा सहसोद्गतवाष्पबिन्दुक्लिन्नाक्षी बद्धाञ्जलिः प्रणम्य तं शिशुं शपथपूर्वकमेवं प्रत्यवोचद् मां मर्षय मर्षय न भूयस्ते द्रोहिष्यामि निर्घृणाया मे पापिष्ठं दौश्चर्यं क्षमस्व श्रुत्वा च विमातृनिगदितं स बालाको विनष्टकः सहर्षं व्याहार्षीद् विप्रतीसारस्त्वया हृदये याथातथ्येन संप्रत्यनुभूयते चेत् तर्हि त्वदर्थे जनकचरणानां कोपाग्निं सपदि निर्वापयिष्यामीत्युक्त्वा राजकुलात् प्रत्यागताय पित्रे मुकुरं दर्शयित्वा च तत्रैव प्रतिबिम्बितं तं निर्दिशन्नेष मे द्वितीयो जनकोऽयं द्वितीयो जनक इत्यभीक्ष्णं तमभिदधे सोऽपि रुद्रशर्मा स्निग्धबालकस्य मुग्धवचसा

युगपदुत्पन्नविश्वासः प्रसन्नधीरकारणपरिहृतां तां स्वीयां भार्यामनुकूलयति स्म ततश्च कालेन निजसुत इव तया पथ्याशनैः प्रीतिपूर्वं सौहार्दात् परिपोष्यमाणोऽसौ बालविनष्टकः स्वस्थीभूय पितृनयने नन्दयन् वैमात्रेयेण समं शुक्लपाक्षश्चन्द्रमा इव शनैः शनैः प्रववृधे हे सखे रुमण्वन्शशुरपि विप्रकृतः कुप्यति तस्माद्धेतोरत्र संमिलितं सपौरलोकं राजकं यथाशक्ति प्रीणीयाव। इति समुदीर्य विशालधीर्यौगन्धरायणो रुमण्वता सह तस्मिन्नुदयनवासवदत्तापरिणयावसरे प्रशस्तभोजनशयनार्पणादिकैर्हृदयग्राहिभिर्निर्दोषैरुपचर्यासत्कारविधिभिरशेषं राजकं प्रजासमुदायं च प्रकामं पिप्राय येनैतौ मन्त्रिसेनापती मदेकपूजापरायणौ भवत इति सम्मानविशेषहृषितः सर्वोऽपि जनः समुपजोषं मेने। अथ सम्यग्निर्वर्तितोपयमोत्सवो नवोढया वासवदत्तया सार्धं निर्वृतिकोटिमध्यारूढो महीक्षिदुदयनः सततोपकारिणो निजहितैषिणस्त्रीन् सखीन् मुख्यामात्यं यौगन्धरायणं वाहिनीपतिं रुमण्वन्तं नर्मसचिवं वसन्तकं च प्राज्यकौशेयहिरण्यरत्नपरिष्कारग्रामातिसर्जनेन यथास्वं संमानयामास। ततो निर्विघ्नशुभंकरोढाहकर्मविधातरि श्याले गोपालके निजपितृनियोगं समञ्जसमनुष्ठाय सकलेन कृतज्ञेन राजकुलेन संपूजित उज्जयिनीपुटभेदनाभिमुखं प्रस्थिते नवपरिणयसुखितोऽतिशयमधुरप्रेमरसनिर्भरायाश्चवधूवदनहेमाम्भोजमधुपानासक्तभ्रमरो हृदयंगमकटाक्षविभ्रमपेशलाया अक्षय्यरतिसर्वस्वभूतायाः सर्वाकाराभिरुचिरमुरतसुधाधारानिर्भ-

रिण्यास्तस्या वरवर्णिन्या वासवदत्ताया मीनकेतनाभिषेककनक-
कलशायमानातिस्पृहणीयपीनवक्षोरुहस्थले सुललितशृङ्गारकेलि-
निरतमनसिजलीलोपवनप्रतीकाशे प्रकामतो विहरन् वत्सराज
उदयनस्तया सत्रा मन्मथसाम्राज्यनिर्वृतिं यथातृप्ति समुपबुभुजे ।



(९) पद्मावतीविवाहकथा

एवं कृताभीष्टदारपरिग्रहेऽनिशमनन्ततृष्णामूलकसुरतसंभोग-मद्यपानमृगयादिदुर्निग्रहव्यसनप्रसक्तचेतसि व्यसनिन्युदयने निःशेष-प्रजागणयोगक्षेमजनपदसंपदावहेषु कुलक्रमागतराज्यकार्येष्वपि पराङ्मुखीभूय केवलमिन्द्रियार्थनिषेवणार्थमेव विहरति सति सेनान्या रुमण्वता सह दुर्वहां महतीं राज्यधुरमुद्वहन् मन्त्रिपुंगवो दूरदर्शी यौगन्धरायणस्तं सहायं निजावसथे निमन्त्र्य सविमर्श-मवोचद यदप्रतिमपराक्रमविस्मापितपिनाकिनः शत्रुणामजय्यस्य सततजिष्णोः कृष्णसारथेः सर्वलोकसंपूजितमहिम्नि प्रशस्तान्व-वायेऽभिजातोऽमृतदीधितिवंशललामभूतोऽपि सर्वंकषेण मकर-ध्वजेन प्रसह्य पराभूतत्वादजिगीषुरस्मत्प्रभुर्गजसाह्वयमहापुरीसमु-पेतां पितृपैतामहीं महीं महीयसीमविजिगीषया परित्यज्य वत्सभू-मण्डलावशेषः संवृत्त इदानीमपि बलवद्विषयप्रसङ्गमुपितधिषणो राष्ट्रनियोगनिर्वाहणविमुखो निश्चिन्त आस्ते सखे यद्यत्र प्राप्त-काला प्रतिक्रिया न विधीयेत सौदामनीवच्चंचला पतयालू राज-लक्ष्मीर्ध्रुवं निपतेत् तस्माद्धेतोरस्माभी राज्यभारधुरीणैः प्रज्ञानै-पुण्यप्रयोगात् तथैव कर्तव्यं यथासौ पुनः कुलक्रमागतां समस्त-वसुंधरां हस्ते करिष्यति प्रज्ञावलेन किमसाध्यं भवेदिह लोकेऽत्र

निदर्शनरूपमुपाख्यानं कथयामि ते पुरा बभूव किल क्वचित् क्षमामण्डले महासेनो नाम कोऽपि मनस्वी वसुधाधिपो यो जातु बलोत्कटेनामित्रेण संग्रामाजिरे पराजितः शत्रुपरिभवोत्थोद्दाम-मन्युज्वलनपरितातप्यमानो दुश्चिकित्स्यं गुल्मरोगं लेभे तं च भैषज्यासाध्यव्याधिपेपीड्यमानं वीतच्छायं मृतप्रायं संपरीक्ष्य मतिमतां वरोऽगदङ्कारवरेण्यः परहितो नाम हा राजन् त्वदीया हृदयैकवल्लभा महिषी सद्यो दिष्टान्तमुपगतेति सशोकमिव मृषा प्रोवाच तच्च निशम्याकाण्डोपनतकुलिशनिर्घातकल्पं प्रियभार्या-मरणजविषादावेगाद् युगपत् क्षितितले निःसंज्ञं निपततस्तस्य राज्ञः कुक्षिस्थं गुल्मदन्वनमतर्कितनिपतनवेगेन स्वयं प्रपुस्फोट ततः स क्षितिक्षित् स्वस्थीभूय स्वदयितया समं रंरम्यमाणः काल-क्रमानुसारेण विद्वेषिणमभिभूय पुनरवाप्तराज्यसंपत्समृद्धस्तांस्ता-नैहलौकिकसंभोगान् प्रकाममुपबुभुजे तद् भिषग्वर इव वयमपि विभुहिताय तदीयकुलपरंपरागतां विपुलामर्वीं पुनः साधयितुं प्रयतिष्यामहेऽस्मदीयप्रभुर्दिग्विजयार्थदण्डयात्रायां तु केवलमेक एव प्रत्यर्थी पाणिग्राहो मगधमहीमण्डलाधिनाथः प्रद्योतो वरीवर्ति यो नूनं पृष्ठतोऽस्मान् कदर्थयिष्यति कथमपि युक्तितोऽनेन सन्धि-सम्बन्धे कृतेऽसौ महीपालः पाणिग्रहणं न करिष्यति तदर्थं मया प्राग् वत्सराजाय कन्यारत्नं पद्मावतीं देहीति याचितोऽपि स क्षमाभृद् वासवदत्तायां दृढबद्धानुरागायोदयनाय मदीयस्नेहभाजन-मात्मप्राणसमां पुत्रीमर्पयितुं नोत्सह इत्युक्त्वा प्रत्याख्यातवान्

तस्मात् कारणात् कुत्रचिदपि प्रच्छन्नस्थाने देवीं वासवदत्तामुपांशु निधाय तया शून्यीकृतं वासगृहमग्निसात् कृत्वा दैवहतकेन जातवेदसादाहीति सर्वत्र समुद्घोषिष्यामस्ततो वासवदत्तादाहकिंवदन्त्यां ग्रैष्मिकदवाग्नाविव विश्वतो वितेस्तीर्यमाणायां भूयोऽस्माभिरभ्यर्थितो मगधाधीशः प्रद्योतो वत्सेशेन पद्मावत्याः पाणिमसंशयं ग्राहयिष्यतीत्यं लब्धमगधराजसाहाय्या वीतज्वरा वयं पूर्वं पौरंदरीं ककुभमात्मसात्कर्तुं विजययात्रां विधास्यामः। इत्येवं सचिवमुख्येन निगदितं वचः समाकर्ण्य निर्विचारसाहसाशङ्काविष्टमानसो विमृश्यकारी वाहिनीपती रुमण्वांस्तं प्रत्यभ्यभाषिष्ट यद्यपि त्वदीयां प्रभुभक्तिं निर्ममां बहु मन्येऽहं तथापि नैतद् युज्यते त्वया चिकीर्षितमेतदसमञ्जसं क्रियेत चेत्तर्हि निःसंदेहमेतदनिष्टमत्याहितमावहेत् कथं नु खलु राज्यामतिगाढानुरक्तो नरेन्द्र उदयनस्तद्विनाशवार्तामचिन्तिताशनिप्रहारसंकाशां सहेत हे वयस्य तद्वार्तश्रवणमात्रेणैव स्फुटितहृदयो जीवितसंशये पतिष्यति किं न त्वया विचारितं यत् परस्परानुरागातिरेकसुदृढसंदानितहृदययोर्दम्पत्योः कादाचित्कोऽपि विश्लेषोऽतिदुस्सहसंतापावहः प्राणसंदेहाय भवतीति श्रूयतां मयापि कथयिष्यमाणां कथामिमां पुरा मथुरायां प्रेमैकपात्रीभूतया प्रियतमया जायया साकं यथासुखमुवास बहिल्लकाभिधस्तरुणवणिग् यः कदाचिद् रत्नवाणिज्यार्थं विदूरभूभागवर्ति देशान्तरं प्रति प्रस्थातुं व्यवसितमनास्त्वया जीवितनाथेन सार्धमहमपि गच्छामीति वाष्पप्रवाहसंरुद्धकण्ठगद्गदं कथंचित्

कथंचिद् भाषमाणां भुजवल्लरीभ्यां कण्ठे लग्नां प्राणसमां कृच्छ्रात् सानुनयं विमुच्य यावत् प्रयाणमार्गे पदं चक्रे तावद्बाह्य-द्वारकपाटाश्रितपृष्ठभागा साश्रुनयना प्रयान्तं भर्तारं सविषादं दर्श दर्श निःशब्दं रुदन्ती दृग्गोचरात् तिरोहिते तस्मिन् सा दयितासु-समा नरकयातनाप्रतीकाशपतिविप्रयोगासहिष्णुः सहसा धरणितले निपत्य हन्त समुत्क्रान्तासुः संबवृते तत्क्षणात् सोऽपि मनसि समुद्-भूताकल्याणविभावनाचरीकृप्यमाणः प्रतिनिवृत्य विष्णुपदादि-काण्डे भूमितले परिभ्रष्टामिन्दवीं श्रियमिव शुभ्रतुषारसवर्णां व्यपेतप्राणवायुं प्रेयसीं ददर्श दृष्ट्वा च तां क्रोडीकृत्य प्रियतमेऽहह कथं न्ववस्थायामीदृश्यां पतितासि देहि मे प्रतिवचनामृतमिति प्रमुक्त-कण्ठं रोरुद्यमानो मुहूर्तान्तरे शतधा शतधा विशीर्णहृन्मर्मा दुर्भर-शोकातिशयेन व्यसुः संबभूवेत्थमसहनीयान्योन्यवियोगानलदन्दह्य-मानान्तरात्मानौ तपस्विनौ जायापती जीवलोकं विहाय पंचतां ययतुरेवं सखे वासन्तीपुष्पसुकुमारहृदयवेधी प्रेमरसनिर्भरान्तरङ्ग-दाहको विप्रलंभकुपीटयोनिः केन सोढुं शक्यते किं पुनरस्मदीयेन महीभुजेति । आकर्ण्य विचारशीलेन रुमण्वतोदाहरणरूपेण कथितं कथानकं धैर्यसागर उत्साहमन्त्रशक्तिसंपन्नो यौगन्धरायणस्तमित्य-ब्रवीदस्माभिः सविमर्शमनुष्ठास्यमानस्य वत्सराजदिग्विजयहेतुकस्य सुनिर्णीतकूटोपायस्य प्रमादाशङ्कां मा स्म कार्षीर्यथा तादृग्भूते कूटोपाये निपुणं विधीयमाने सर्वं समीहितं सेत्स्यति विदांकुरु स्वायत्तसिद्धिः सचिवायत्तसिद्धिरुभयायत्तसिद्धिश्चेति राजानस्त्रि-

विधाः सन्ति तत्र सचिवायत्तसिद्धिर्वत्सराजस्तु मतिसचिवानामस्माकं बुद्धिसाहाय्येनैवाभिलषितमर्थमशेषं साधयितुं प्रभवति विनष्टपुंश्चिह्नेषु वर्षधरेष्विव निरुत्साहेष्वस्मास्वकिंचित्करेषु केवलमस्मदधीनेनानेन कोऽर्थोवाप्स्यते नात्र विचिकित्सा कार्या किञ्च सततवत्सराजहितैषी महाराजश्चण्डमहासेनोऽपि देवी वासवदत्ताप्यस्माभिरचिरेण विधित्सितं देवीदाहोपायं ध्रुवमवज्ञास्यत्यत एव सफलमन्त्रशक्तिप्रोत्साहोद्योगसमन्विता वयं राज्यधुरंधराः प्रभुहितकाम्ययेप्सितार्थसाधनेन सुचिरभुक्तस्य भर्तृपिण्डस्यानृण्यं गच्छामः। मुख्यमन्त्रिणोदीरितं वाक्यं कर्णे कृत्वा समीक्ष्यकारी निर्विघ्नोपायप्रयोगसंदिग्धमतिः सेनानीः पुनरेवमवादीद् यद् भवता दीर्घदृष्टिना निर्धारितमेतत् कार्यं यदि निर्विघ्नमप्रमादं च निष्पादयितुं शक्यते तर्हि विभुविभवाभ्युदयाय कल्पते परन्तु प्रमाददोषशङ्किने मे नाभिरोचते यद्यपि पुमान् वाञ्छितार्थसंपादनाय प्रयतते तथापि जातुचिद् दैवं प्रातिकूल्यं कुरुते सखे मनसाभिप्रेतपरललनादर्शनेनाप्यधीरो विमुह्यति किं पुनः स्वजीवितसमावियोगेन नः पार्थिवस्ते कथयामि कथानकमपरं पुरा किल बभूव श्रावस्तीसंज्ञायां महापुरि न्यायमार्गानुसारी दण्डनीतिप्रयोगकुशलोऽपि शिरीषकुसुमकोमलहृदयो बुद्धिमतामग्रिमो देवसेनो नाम वसुधाधिपस्तत्र चोवास कश्चिद् धनधान्यस्फीटभाण्डागारो वाणिज्यकृतमुखः सार्थवाहस्तस्य बभूव तनूद्भवा स्मरस्मेरप्रत्यग्रयौवनारूढा तपोभङ्गकुपितविरूपाक्षतार्तीयीकलोचनाग्निभस्मी-

कर्मानुष्ठानालंभूष्णवः सामर्थ्यतितिक्षाप्रोत्साहसंपन्ना महापुरुषाः समीहितकार्यसिद्धिर्येऽभिमतबन्धुजनविरहजं हृदयप्रमाथिनमपि परितापं तितिक्षन्ते किं सीताजानिना दाशरथिना शरच्छतायितानि बहूनि हायनानि दुर्विषहापि दयिताविरहवेदना न तितिक्षाञ्चक्रे किं धृतिसागर उदयनजनकः सहस्रानीकोऽपि क्षमाभृद्नृपभः शताब्दकल्पांश्चतुर्दशसंवत्सरान् सततहृदिस्थया जीवितसमया भार्यया विनाकृतो नरककुण्डायितां विप्रयोगयातनां न चक्षमे यथायमुदयनोऽपि कान्ताविश्लेषव्यथां कञ्चित् कालं सहिष्यते तथैव करिष्याम इति । श्रुत्वा मतिमतां वरेण मन्त्रिपुरोगेण समुदीरितं वाक्यं पुनरपि परामर्शनशीलः सूक्ष्मदृष्टी रुमन्वान् सविमर्शं तमित्यभिवभाषे यत् त्वया राज्याभ्युदयनिमित्तं प्रोक्तं तत् सर्वमनुजानामि किन्तु यत् किमपि समीहितार्थसाधनाय नरो विधत्ते तदननुकूलः कृतान्तोऽन्यथा विदधाति येनोक्तं च कविशिरोमणिनापि क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्त इति हे वयस्य त्वया विधित्सितमिदं कर्म मा नाम काकदन्तगवेषणन्यायेन संवदत्वनर्थं वा मा खलु संजनयेत् तथा समाकर्ण्यतां मया भूयोऽपि कथ्यमानमपरमुपाख्यानमित उत्तराहि भागीरथीरोधसि कृतस्थितिरस्ति माकन्दिकाभिधं पुटभेदनं तत्र कोऽपि भिक्षोपजीवी वाचंयमः पाराशरी क्वचिद् देवालयमठेऽन्तेवासिभिः कर्मन्दिभिः सह तस्थिवान् वसति चक्रेऽथैकदा भिक्षापात्रद्वितीयः स मौनी मस्करी भिक्षार्थं कस्यचन व्यवहारकस्य वास्तव्यं प्रविश्य भिक्षादानाय

गर्भगृहान्निर्यातां मनोरमाकृतिशोभितामपरां मनोभववल्लभामिव हृदिस्पृशं तस्य दुहितरं विस्फारिताक्षः सन् निरीक्ष्य काममोहितमनाः सहसा समुज्झितदीर्घकालधृतमौनव्रतो हा कष्टं हा कष्टमहो अब्रह्मण्यमब्रह्मण्यमिति तारं समुदीरयामास तत्समनन्तरं च हाकष्टशब्दश्रवणविस्मितमानसो गृहस्थः स वणिग् वहिर्निर्गत्य भो भगवन् केन कारणेन युगपच्चिरन्तनीं वाचंयमतां परित्यज्य हाकष्टशब्दमुच्चारितवांस्त्वमिति कौतुकात् तं मौनत्यागनिदानमनुयुयुजे पृष्टेन तेन तापसेन विजने प्रत्यवादि यदियं ते कन्या सुदर्शनापि दुर्भगा कुलक्षयकरी सपुत्रकलत्रं त्वामचिरेणैव निश्चितं विनाशयिष्यति नात्र कोऽपि विचिकित्सागन्धो भवति यथा त्वं मदैकभक्त इति त्वामनुकम्पमानोऽहं याथातथ्यं वदामि तद्रात्रौ यदीच्छसि कुलविनाशभयदामेनां पुत्रीमुपरिभागे निहितप्रदीपायां मंजूषायां निक्षिप्य जाह्नवीप्रवाहे परिजहीह्येवं कृते भयविमुक्तस्य तनयदारसहितस्य ते कल्याणं भविष्यति तच्छ्रुत्वा भीतभीतः स वणिगधमो मनुष्यकोटः कुक्षिभरिः स्वतनूजां मंजूषान्तर्निवेशितां निर्दयं त्रिस्रोतसि संपरितत्याज ततो निशामुखे सुरनिम्नगाकूले शनैः पर्यटन् प्रदीपदर्शितालोकां तामेव भीरुणा सार्थवाहेन परित्यक्तां मंजूषामुपलभ्य कश्चिद्राजपुत्रस्तदन्तर्गतां वराकीं चकितचकितहरिणशावाक्षीं सुन्दरीं समुद्धृत्य साश्रुलोचनया तया सगद्गदं निगदितमात्मसंकटवृत्तान्तमनुशुश्रुवानुल्वणदयाकोपाविष्टस्तत्रैव मंजूषायां दुराराध्यमतिक्रोधालुं वलीमुखं

निधाय सुपिहितां तां गङ्गाजलौघे प्रक्षिप्य च प्रथमदर्शनसंजाताभिनवप्रेमांकुरामतिशयपेशलाकृति–शोभानिर्जितमनसिशय-वल्लभां श्लाघ्यसौजन्यशीलशालिनोमतर्कितोपनतसुधाधारामिव हृदयह्लादिनीं नयनानन्दथुदायिनीं तां पित्रा भयात् समुज्झितां वरारोहां समादाय संप्रहृष्टचेताः स्वभवनमियायात्रान्तरे दुर्दमनकामवशंगतः स परमेश्वरविक्रयकोविदो मायावी परिव्राट्पाशो भो यूयं सर्वेऽधुनैव त्रिपथगां गत्वा तत्रोत्प्लवमानां प्रदीपप्रकाशिताकृतिं वृहतीं दारुमंजूषां मङ्क्षवत्र समानयतेति निजशिष्यानादिदेश ततश्च समये कियति व्यतिक्रान्ते तैरन्तेवासिभिरानीतां तां मंजूषामवलोक्य संप्रमोदविकसितस्मेरलोचनयुगलोऽक्षतयोनिकन्याव्यतिक्रमप्रत्याशापुलकितवपुः स साधुवादपुरस्सरं तान् प्रोवाच साधु साधु संप्रत्यर्धरात्रः संजातस्तन्निद्रासौख्यं निर्वेष्टुं गच्छत पुनर्मदीयाञ्शब्दाञ्श्रुत्वापि यूयमत्र मा स्म प्रविक्षतेति तत्क्षणात् तापसेषु तेषु शयितुं निर्यातेषु द्वारि दृढमर्गलं दत्त्वोद्दामरिरंसादण्डायमानशिश्नः शिश्नदेवोऽसौ अविदारितरतिकुहरकन्यानिधुवनतृष्णारुणिताक्षः प्राज्यसुरतलोलुपासृक्कनिर्गलितं लालास्रावं परिलेलिहन् वस्त्रमपनीय सगर्वमिव दर्शितदण्डबदुच्छ्रितमेहनदण्डः सोत्सुकं यावन्मंजूषामुद्घाटयति तावल्लोहितवलीवदनसंसूचितान्तर्ज्वलितामर्षानलो विकटाकारः शाखामृग उत्प्लुत्य तस्मिन्नेव निमेषे तत्राविद्यमानं विवरमपि प्रविविक्षुमतितमां भीतभीतं सद्योऽधोमुखीभूतनिर्वलमेढ्रहतकं दिगम्बरं देवदासं तं मस्करिणं मूषकमिव दृष्ट्वा समधिक-

प्रदीप्तकोपधूमकेतुः सन् तूर्णमभिपत्य महापापस्य तस्य कर्णावितीक्ष्णैर्नखरैर्दंष्ट्राभिश्च परिच्छिद्य तदनु दीर्घावलम्बितं किमेतदित्याशङ्क्यैव दीनदीनमनास्वादितकन्यारसं तदपि तस्य लिङ्गं समूलं समुन्मूलयाम्बभूव ततः प्रभाते सर्वमर्त्यलोकातिदुष्प्रापं संन्यासिवानरवृत्तान्तं विदित्वा तापसशिष्यान्वितस्तत्रत्यः सकलपौरलोकः क्वाप्यपसरन्तं व्रीडाधोमुखं दिशोभाजं महादेवनामविक्रयनिपुणभिक्षुलिङ्गिनमप्यलिङ्गिनं कर्णविहीनं तं पापिनं पृष्ठतः प्रेक्ष्य प्रकाममुपजहास ततः पश्चात् तेन मायायोगिना विडम्बितपूर्वः स वणिक् स्वात्मजापरित्यागदौश्चर्यविबोधोत्थापितविप्रतीसारातिभृशपरितप्तत्वाद् भूरिणा हिरण्यरत्नांशुकादिकसंभृतेनौद्वाहिकप्राभृतसंभारेण समं यथाविधि तस्मै राजकुमाराय निजकन्यारत्नस्य पाणिं समर्पयाञ्चकारैवं सखे विचित्ररूपा नियतिचेष्टा बलीयसी पुरुषकारेण न निवार्यते । आकर्ण्य वाहिनीपतिवाक्यमद्भुतरसप्लवि प्रबलदैवगतिनिरूपणार्थगर्भितं स्मितविकस्वराननतामरसो मतिसचिवपुरोगामी धृतिमान् यौगन्धरायणः स्मितपूर्वं तं सेनान्यमभ्यवादीत् प्राप्तरूपं धीमता भवतोक्तं तथापि स्थिराचलबुद्धयः प्रतिकूलमपि दैवदुर्विपाकं सूक्ष्मशेमुषीपुरस्सरेण पौरुषेणैव प्रतिहत्य दुस्साध्यमप्यभीप्सितकार्यं साधयन्ति वर्तते-ऽत्रोदाहरणं मयापीदानीं कथ्यमानं तद् विमृश्यकारिणाप्रतिरथेन भवता श्रूयतां यदि श्रवणकौतुकं प्रागुज्जयिन्यां महापुरि बभूव महातेजाः पुण्यकामा पुण्यसेन इति संज्ञितः प्रथितयशा भूभुक्कुञ्जरो

यो जातु वलीयसा संपूर्णचतुरङ्गसन्नद्धाक्षौहिणीप्रावल्योत्सिक्तेनाकाण्डेऽभिषेणयता शत्रुभूपालेन वहुतिथं कालं यथावलं योयुध्यमानोऽपि हीनचमूवलत्वाच्चरमं सांयुगीनप्रियाप्सरोगणापहृतसंख्यातीतमहायोधसमुदायः सन् पार्वतदुर्गेऽमित्रेण नियतिवलात् प्रतिरुरुधे ततो निजप्रभुभक्तिपरायणा अकुण्ठिताशयाः कार्यार्थसाधनोपायप्रयोगनिष्णातकुशाग्रवुद्धयो राज्यभारधुरंधराणामग्रेसरास्तदीयामात्यवरेण्या वलाधिकप्रतिपक्षकर्तृकदुर्गप्रतिरोधभङ्गस्याचिन्त्यत्वात् पुनरसह्यक्षुत्पिपासापरिश्रमार्दितेन दुर्वलेनावशिष्टेन वलेन प्रत्यभिस्कन्दस्याविधेयत्वाच्च प्राप्तकालकूटोपायप्रयोगदत्तमनसोऽहो सर्वेषां तेजस्विनामग्रिमो महाराजाधिराजः पुण्यश्लोकः पुण्यसेनः पराजयशोकाद् दिष्टान्तमुपगत इति दिक्षु सर्वासु किंवदन्तीं विस्तृत्य प्रकाशे नृपवेषधारि मृतकलेवरं चितायां प्रदीप्तायामाध्यारोप्य राजानुगुणेन पश्चिमक्रियाविधिना यथावत् संचस्करुस्तदनु ते मतिमतां सत्तमा मन्त्रिपुंगवा राजन् ते सम्यग्विदितमस्तु यदस्माकं विभुरवन्तीश्वरो महाराजः पुण्यसेनो विधिहतकेन पञ्चतां नीतस्तद् भुवि यशोमात्रावशेषस्य तस्य सौवर्णसिंहासनमधिरुह्यैतर्हि वस्तुतोऽराजवद् राज्यं प्रशाधीति दूतमुखात् तस्मायमित्राय संदेशं प्रजिघ्युस्ततश्च तत्संदेशार्थं सहर्षं प्रतिपद्य मन्त्रिणां कूटोपायवागुरानिपतितः स विपक्षराजः समग्राक्षौहिणीं तत्रैव कटके स्थापयित्वाल्पेन निजशरीररक्षिणाश्वीयेन परिवारितो हयारूढः प्रमोदप्रफुल्लवदनो दुर्गं प्रविश्य तुरङ्गमादवरूढः

पादचारी सचिवानां सकाशमाययौ तस्मिन्नेव मुहूर्ते पुरुषसिंहास्ते मन्त्रिवराः सिंहनादमभिद्रुत्य तमेकपदे जिहिंसुरित्येवमेव प्रांशुधियः स्थैर्यनिधयोऽलंकर्मीणाः प्रतीपगं दैवमविक्लवेन पुरुषकारेण निहत्य कांक्षितार्थलाभेनात्मानं कृतार्थीकुर्वते तस्माद्भर्तृपिण्डोपजीविनो वयमपि तस्य कृते निबिडबद्धकक्षाः सन्तो महिषीदाहमिथ्याप्रवादसंविधानेन राज्यकार्यमिदं सफलीकुर्यामिति । मन्त्रिमुख्यनिगदितं तद्वचः साकल्येनोपश्रुत्य वाहिनीपतिना रुमण्वतैवं व्याहारि यदीत्थंकारं त्वया व्यवसितं तर्हि देव्या बहुमतं सोदरं युवराजं गोपालकमुज्जयिनीतोऽत्र झटिति समानीय तेन साकं कार्याकार्यविचारोऽनुष्ठीयताम् । तथा करिष्यामीति सेनापतेर्वाक्यमुररीकृत्य सुधीरमात्यपुंगवो यौगन्धरायणोऽपरेद्युः कालातिपातासहमावश्यककार्यान्तरव्याजाद् गोपालकाह्वानाय संदेशहरं तस्मै क्षिप्रं प्राहैषीत् ततश्च पञ्चसेषु वासरेषु व्यतिक्रान्तेषु वायुवेगहयारोहे मूर्तिमतीव संभ्रमोदे तस्मिन् युवराजे मंक्षूपयाते सति हर्षातिशयरोमाञ्चितसर्वाङ्गः सपदिसंजातनिर्विघ्नकर्मसिद्धिप्रत्ययद्विगुणीकृतकर्तव्यनिश्चयाचलवदचलाशयो दुस्साध्योपायचतुष्टयषाड्गुण्यप्रजाप्रशासनसन्धिविग्रहर्चिंतनात्मकराजनीति-समालोचनप्रयोगातिविचक्षणबुद्धिसामर्थ्यशाली स सर्वेषां मन्त्रिणां पुरस्कृतो मन्त्रिमुख्यो नक्तं समस्ताक्षौहिणीनायकेनाप्रतिद्वंद्वभुजबलप्रीणितसुरसेनानीपाणमातुरेण प्रतिभयरणाजिरापराङ्मुखोर्जस्वलपराक्रमशक्तिमता रुमण्वता सह तं चण्डमहासेनात्मजं निजवासगृहमानीय

राजोचितऽश्रयणवरिवस्यापूर्वकेणातिथिसत्कारेण संपूज्य च यत् सेनान्या संमन्त्रितपूर्वं तत् सकलं तस्मै सानुरोधं न्यवीविदत्। एवंकारं विदग्धप्रधानमतिसचिवविज्ञप्तं भ्रातृस्नेहभूमेः स्निग्धाया अवरजायाः पूर्वं दुर्वहपरिक्लेशावहमपि पश्चाद्धृदयंगमसुखोदर्कं सिसात्सितं कार्यार्थं सविमर्शमुपश्रुत्य किंचिद् दुर्मनायमान इव राजपुत्रो गोपालको भो मन्त्रिन् यद्येष ते कर्तव्याव्यवसायोऽनुपसंहरणीयस्तर्हि तथा विधीयतां यथा त्वया संविधित्सितं परन्तु गाढानुरक्तां देवीं वासवदत्तां दुर्निवारनियतिनियोगादग्निसाद्भूतां विदित्वैव नूनं प्राणान् समुज्झिष्यन् वत्सराज उदयनः कथंकारं समुद्धरणीय इत्यत्र सावधानं विमृश्यतामिति समुदीर्य तेन मुख्यामात्येन नचिरात् प्रयोक्ष्यमाणं कूटोपायमभिमतस्वसृस्नेहाद् वत्सभूभर्तृहितकाम्यया चान्वज्ञासीत्। तदनन्तरं समीक्ष्यकारिणा मन्त्रिवरेण वाहिनीपतिना रुमण्वतापि सविचारमवाचि यत् सुविहिते कर्मण्यपि कदाचित् तत्फलभुजोऽभावाद् विफलीभवति साधितोऽप्यर्थस्तस्मादस्मदीयप्रभुर्यथाशक्ति विनिपातव्यसनात् सुरक्षणीयो येनाभीप्सितार्थप्राप्तिर्निःसंदेहं सफलीभविष्यति। उपश्रुत्य तद्वचो गुणदोषनिरूपणसमर्थसूक्ष्मदृष्टितासम्यग्विचारितकार्याकार्यो यौगन्धरायणो भूयोऽप्येवं न्यगादीत् कृतं संदेहेन नास्त्यत्र कश्चिदप्यस्मच्चिकीर्षितकृत्यभङ्गसंशयलेशोऽस्माकं बहुमानपात्रीभूता महिषी वासवदत्ता क्ष्माभृत उदयनस्य प्राणेभ्योऽपि प्रेयांसो धर्मदारास्तथा भृत्यानां नः सततपूजार्हस्य युवराजगोपाल

कस्य वात्सल्यभूमिः कनीयसी सोदरा तथापि यादृच्छिकेन जातवेदसा दग्धां स्वीयां स्वसारं ज्ञात्वापि नानुशोचन्तं श्यालं गोपालकं दृष्ट्वा नूनं संदिग्धमतिरुदयनः किं नु मदीयप्राणसमा म्रियेतेत्याशंक्य पुनरस्माभिः समाश्वास्यमानः कथञ्चिद् धृतिमाश्रयिष्यत्येवं गते पुनर्याचितो मगधेश्वरः प्रद्योतस्तस्मा उदयनाय भार्याविहीनाय स्वां दुहितरं पद्मावतीमसंशयं दास्यत्येव ततो वत्सराजमागधराजपुत्रीपरिणये संवृत्ते वयं वासवदत्तां पुनः प्रादुर्भावयिष्यामः संप्रति तु वासवदत्ताद्वितीयमजस्रमृगयाप्रसक्तमुदयनं विषयप्रान्तवर्तिनीं मगधजनपदसन्निकर्षस्थां लावाणकाभिधां मृगव्यविहारभूमिं निपुणेन यथाशीघ्रं नीत्वा तत्र देवीवासगृहमग्निसात्कुर्महि ततो युक्तितो वासवदत्तां प्रच्छन्नरूपां पद्मावतीभवने निदध्महे एवं कृते तयोरपि परस्परपरिचयप्रणयौ संजनिष्येते ध्रुवमिति। तस्यामेव निशीथिन्यामेवंविधं मिथः-संमन्त्रणमनुष्ठायोत्तरेद्युः पूर्वाह्णे राजकुलं प्रविश्य ते त्रयो राज्यधूर्धराः सर्वास्थानमण्डपस्थं राजानं प्रणम्य रुमण्वन्मुखेन व्यजिज्ञपन् राजन्नस्ति प्रकृतिसुषमामनोभिरामो नानाविचित्रविहङ्गश्वापदकुलसंकुलः श्रुतिसुभगकोकिलादिपक्षिकूजितापहृतसत्त्वचेता अपि कण्ठीरवशार्दूलप्रमुखानेकविधचतुष्पाद्वृंहणप्रतिशब्दितमनोहरदिगन्तराल इतस्ततः संकीर्णोपलशकलप्रस्खलद्गतिमञ्जुलनिर्झरिणीपूरितालवालसलिलप्रत्यग्रीभूतपर्णपुष्पगुच्छनीरन्ध्रभूरुहराजिभ्राजिष्णुर्मीनकेतन-विहृति-भूमिरिवाभिरुचिरा-

लोको मगधपर्यन्तदेशोपकण्ठवर्ती लावाणकनामा परिसरविषयो यत्र प्राचुर्येण सन्ति मृगयानसुचितस्थलानि यं चैतर्हि दुर्ललितः पार्ष्णिग्राहो मगधराजः प्रद्योतः स्वसेनां प्रेष्य कदर्थयति तदाखेटार्थं परिपालनार्थं च राज्यकार्यचिन्तनपरिश्रान्तान् कंचित् कालं विनोदयितुकामानस्मानादाय देवीसहित आयुष्मान् देवस्तत्र गच्छत्विति । सामिलाषमाकर्ण्य तद् विलोभनवाक्यमतितमां प्रमुदितमानसो मृगयारसास्वादलोलुपो वत्सराजस्तत्समकालमोमिति व्याहृत्य सपदि सांवत्सरिकमाहूय च लावाणकप्रयाणोचितं शुभयुं तिथिमप्राक्षीत् ततश्च तेन निर्दिष्टे शुभशकुनेऽपरेद्युर्मुहूर्ते तत्र प्रस्थाने मनोऽभान्त्सीत् । एवंकारं मृगयाविनोदाय लावाणकप्रयाणे सोत्कण्ठं व्यवसिते नृपादिषु सर्वेषु सभासत्सु तत्र समासीनेष्वकाण्डे स्वीयान्ववायसमुत्पन्नकुलधुरंधरोदयनस्नेहेन कुमुदवान्धवोऽमृतदीधितिरिव तमोनुद्द्युतिप्रकाशिताशेषककुवन्तरालोऽम्लानदिव्यस्रग्धरो निजवपुष्कान्तिद्विगुणीभूतप्रभास्वरपीताम्बरो गगनेचरो नारदो व्योम्नोऽवतीर्य सर्वेभ्यस्तेभ्योऽतनुनेत्रोत्सवं ददत् ससम्भ्रमसभ्युद्गतेन वत्सेन्द्रेण स्वयमुपहृतभद्रासननिषण्णो यथाविधिसमर्पितातिथिसत्क्रिया-सभाजितः सन् सभातले प्रणिपतिताय तस्मा उदयनाय शश्वदम्लास्नुपारिजातमालां स्वकण्ठे धृतां प्रीतिपूर्वमतिसृज्येति तमभिदधाने राजन्ननुस्मरामि हन्त त्वां च वासवदत्तां चैकदानीं प्रत्यक्षीकृत्य बहुभ्यो बहुभ्यो हायनेभ्यः प्राक् स्त्रीनिमित्तं भ्रातृभेदमाशङ्कितवता मया त्वदीयेभ्यः प्रपितामहेभ्यो

युधिष्ठिरभीमार्जुननकुलसहदेवेभ्यः स्वसखिभ्यः कथितां वार्तां वत्सराज तेषां पञ्चानां भ्रातृणामेकैव धर्मपत्नी द्रौपदी नाम समभूद् या परमार्थत आसीच्चक्षुष्ययाकृत्या सौहार्देन सर्वजनश्लाघ्येनाभिजनेन च तावकीनदयितभार्यासमा भर्तृपरायणा तां तादृग्रूपां दृष्ट्वा तदानीमहं चिन्तापूर्वकं तान् भ्रातृनब्रवं भ्रातृस्नेहैकीभूतमतयः सततदूरीकृतान्योन्यमत्सरवैरा यूयं सर्वे द्रौपदीमूलकं परस्परभेदं सर्वात्मना सर्वथा मद्वचनान्मिथःप्रणयाच्च निवारयत, संशृणुत मया कथ्यमानं भ्रातृभेदपिशुनमुपाख्यानं पुरा किल बभूवतुरधृष्यबाहुबलपीडितसमस्तसुरासुरमनुजौ त्रैलोक्यकण्टकौ सुन्दोपसुन्दौ नाम दानवभ्रातरौ तयोर्भुजवीर्येण सुतरां कदर्थितैर्दिविषद्भिः सुनासीरप्रमुखैः सखेदमभियाचितः कमलासनो हिरण्यगर्भः सकललोकचित्तहरिणवागुरां निःशेषललनाजातिविभ्रमवसतिमिव मनोहरोमप्सरसं तिलोत्तमां नाम ससर्ज तदनन्तरं च तद्रूपलावण्यविशेषदिदृक्षयेव सोऽपि ह चतुर्मुखः किल संववृते ततो जातु मधुरमधुपानमत्तमधुलिट्परभृतपुरस्सरपतङ्गझंकारकूजनाभिरुचिरे सद्यःपुष्पितवल्लरीपादपकुसुमस्मितिनयनमुषि युवजनमनोह्लादिनि मन्मथसुहृदि मधौ क्रीडोपवने विहरन्तीं मंददक्षिणसमीरणोच्चालितशुभ्रकौशेयवसनसामिदर्शितचारुरम्भोरू पर्वतनिनम्वायमानपृथुलजघनभारालसगतिं पीनस्तनीं तां सुरांगनां दृष्ट्वा सपदि तत्कान्तिमुषितचेतसौ तावसुरसहजौ ममैषा ममैषेति तां जिघृक्षू युगपन्नखानखि बाहूबाहवि सुघोरं नियोयुध्यमानौ

समानबलत्वाच्चरमं क्षतिजर्जरितविग्रहौ भयानकविग्रहान्त उभावपि यमसदनं जग्मतुरिति हे उदयन शशिकुलावतंस ततस्ते धर्मराजादयो महापुरुषास्तव प्रपितामहाः कर्हिचिदप्यविज्ञातपरस्परभेदा मिथःप्रणयादरैकीभूतहृदयाः सन्तः प्राज्यराज्यसंपदं तया द्रुपदात्मजया सार्धं समुपजोषं समुपाभुञ्जन् तद्राजन् त्वमपि मन्त्रिणोर्यौगन्धरायणरुमण्वतोर्वचनं कात्स्न्येन प्रतिपद्येथाश्चेत् कंचित् कालं कमपि हृदयशोषणं पराधिमनुभूय दुःखान्ते सुमहतीं राज्यविभूतिमुपलप्स्यसे ते जीवितसमा सेयं वासवदत्ता कालेन सर्वलोकदुर्लभं कुसुमायुधावतारं समग्रविद्याधराधिनाथं चक्रवर्तिनं त्वदीयं पुत्रं प्रसोष्यत इत्युक्त्वा स्मितविकसितदशनांशुद्योतितसभामण्डपः शशिकुलप्रियो नारदः सर्वांस्तानापृच्छ्य विष्णुपदमुत्पपात । ततः प्रातरुत्तरेद्युः सज्जीकृतप्रयाणोपस्करसंभारो वासवदत्तासखः यौगन्धरायणप्रभृतिभिः कुलक्रमागतैर्मन्त्रिभिः परिवारितः ससैन्यो महीभृदुदयनो देवर्षिनारदवाक्याधिकप्रमुदितान्तरात्मा सन् सहर्षं प्रयाणमार्गे पदं चक्रे ततो वासरैः कतिपयैः परिसरविषयं लावाणकमासाद्य तत्र कृतवसतिः प्रत्यहं दुर्वारमृगव्यावेशसमाचरीकृष्यमाणान्तरंगोऽधिज्यकार्मुकपाणिर्मनोजवसैन्धवारूढः कृष्णसारकण्ठीरवव्याघ्रादिबहुविधश्वापदयूथसंबाधं गहनकान्तारं परिवम्भ्रम्यमाणो मृगयाविनोदेन नितरां संतुतोष । अत्रान्तरे सहस्रचारचक्षुर्मगधराजः प्रद्योतः सन्नद्धचतुरङ्गबलमादाय नातिदूरवर्तिनं सोमविषयं प्राप्तमुदयनं विज्ञाय तस्याभिषेण-

नमाशङ्क्य दरत्रस्तः संचित्सुर्यौगन्धरायणान्तिकं दूतं व्यसृक्षीत् तदनु च तत्र समायातं तमतिथिसत्कारेणाविकलेनाभिनन्द्य मन्त्रकुशलो दीर्घदर्शी यौगन्धरायणस्तन्मुखादभयं तस्मै प्रद्योताय व्यशिश्रवत्। अथैकस्मिन् दिवसे यथापूर्वमाखेटकार्थमुदयने कान्तारं याते मिथ.समयादमात्यप्रकाण्डः कामरूपः स्वच्छंदं धृतप्रवयोविप्रवेषो यौगन्धरायणो भ्रात्रा गोपालकेन सानुरोधं भर्तृकृतेऽनुनीतां पतिव्रतां वासवदत्तां तरुणब्राह्मणीरूपधरां विधाय रूपविकारयोगेन काणवालकेन परिणतं वसन्तकमादाय तया साकं मगधराजधानीं ययौ ततश्च तत्रासाद्य राज्ञः प्रद्योतस्य दुहितुः पद्मावत्या वासगृहं प्रविवेश। प्रविष्टं तं दृष्ट्वा राजपुत्री पद्मावती सकौतुकं तं प्रश्नयति स्म भूसुर कमर्थमपेक्ष्य कन्यां बटुकं च समादायेहोपस्थितोऽसि ब्रूहि कैषा नयनोत्सवदायिनी कन्यकेति। इत्थं तयानुयुक्तेन स्थविरद्विजवेषधरेण तेनापीति प्रत्यवादि राजदारिके श्रूयतामियं मदीयौरसी प्रोषितभर्तृका नामतोऽवन्तिका निखिलविद्याकलाकलापपारंगता विदुषी यामपहाय स्वैरवृत्तिर्दुरात्मा भर्ता जनपदान्तरं प्रयातस्तद् राजपुत्रि दुहितरमिमामनेन मे पुत्रकेण समं तव करसरोरुहे निचिक्षिप्सामि यावदहं विदेशनिवासिनं जामातरं गवेषयित्वा शीघ्रमत्रानेष्यामि तावत् त्वयापि सभ्रातृका सेयं मे तनूजा सौहार्दात् परिरक्ष्यतामिति व्याहृत्य तत्क्षणाल्लब्धतदनुमतिना तूर्णं लावाणकं प्रति प्रस्थानमकारि। यस्मिन्नेव वासरे वसन्तकसखो यौगन्धरायणो महिषीमादाय

निरगात् तस्मिन्नेव वासरे गोपालकेन राहुरुमण्वान् रहो देव्या वासगृहं प्रज्वलितेन तीव्रवेगेन ज्वलनेन भस्मसात् कृत्वा हा हा कष्टमहहा अत्याहितमत्याहितं वसन्तकसहिता देवी वासवदत्ता निर्दयेनाकस्मिकेन दहनेन दग्धेति सशोकं समुद्घोष्य मुक्तकण्ठमरोदीत् ततश्च निदाघदवाग्निरिव देवीदाहप्रवृत्तिः सर्वासु ककुप्सु युगपद् व्यस्तोर्पट । ततो जराजीर्णाग्रजन्मरूपिणि यौगन्धरायणे जामातृपरिमार्गणमिथ्याव्यपदेशान्निर्गते ते राजपुत्र्यौ वासवदत्तापद्मावत्यावन्योन्यस्य नयनानन्ददायिनमतिमनोहरमाकृतिविशेषं निरूप्य विस्मितमती प्रथमदृष्टिपातमात्रसंजातमिथोबहुमानप्रणये संबभूवतुस्तदनु च सौहार्दार्द्रार्द्रप्रेमसौजन्यशालिन्या मागधराजसुतया सादरमभ्यन्तरं प्रवेशिता सा वासवदत्ता तत्र चित्रभित्तिन्यस्तां दाशरथिहृदयवल्लभां संवत्सरान् बहून् भर्त्रा विनाकृतां साध्वीनां सर्वासां पुरोगामिनीं जनकतनयां समुद्वीक्ष्य सद्य उपनतासह्यव्यथपतिविरहसंतापसंतात्यमानापि धैर्यभूषणा केवलं भर्तृहिताभ्युदयकाम्यया वासंतीकुसुमसुकुमारहृन्मर्मभिदं परार्धि सोढुं मनसि व्यवससौ । अस्या अनन्यसदृशेन रूपप्रकर्षेण शीलेनाभिजनशंसिना विद्याकलाकौशलेनानवद्येन शयनोत्थानाशनभाषणविधिना गन्धर्वविद्यानैपुण्येन च सुतरां विस्मापितचेता मागधी पद्मावती, काप्येषा नलजीवितसमा दमयन्तीव पुनः पाण्डवेयवधूरिव सत्कुलोत्पन्ना केनापि कारणेन प्रच्छन्नरूपेण नूनमत्र निवसतीति, मनसा कृत्वा सौहित्यस्नेहपूर्वकेणात्मानुरूपेण परिचर्याविधिना तां

प्रीतिपूर्वमुपचचार । कदाचिदम्लास्तुमाल्यतिलकमण्डनप्रसाधितातिशयपेशलाकृतिशोभितां निजात्मजामवलोक्य कौतूहल्याविष्टमानसा महादेवी तामुपांश्वप्राक्षीत् केनैषा विचित्ररूपा मालातिलकरचना विरचितेति । इत्थं मात्रा पृष्टा मगधभूभर्तृतनया प्रत्यभाणीन्मातः काप्यवन्तिका नाम प्रवासस्थभर्तृका सुरूपा युवतिर्मदीयवासवेश्मनि तिष्ठति तया स्वहस्तसौष्ठवेनैषा मदर्थे व्यरचीति । अयि वत्से यद्येवं तर्हि सेयमतिमानुषविज्ञानशक्तिमती नूनं प्रच्छन्नरूपा दिव्ययोषित् स्याद् यथास्मादृशी मर्त्यविग्रहा न कापि सीमन्तिनी विज्ञानमेवंविधं जानीते कदाचित् कदाचिदनिमेषलोचनदेवर्षिप्रभृतयः प्रच्छन्नवेषधरा दिवौकसश्चरित्रशीलपरीक्षार्थं भुवं पर्यटाट्यमानाः सतां वसतीरधिवसन्ति बाले शृणु मया कथ्यमानामिमां कथां पुरा बभूव यादवानामग्रणीर्महायशाः कुन्तिभोजो नाम महीभृद्वर्याग्रो यदीये निशान्ते जातु दुर्वासा नाम दुराराध्योऽतिक्रोधालुर्देवर्षिरुवास तत्सपर्यायै राज्ञा समादिष्टा नृपतनया कुन्ती निर्ममेण मनसा यथाशक्ति सप्रश्रयणं तं परिचचार ततः कदाचिदसौ देवर्षिस्तां परीचिक्षिषुरभिबभाषेऽयि बाले यावदहं स्नात्वागच्छामि तावत् त्वं क्षिप्रमुष्णं दुग्धौदनं संस्कुरु ततः सा स्नानं कृत्वा प्रतिनिवृताय तस्मै सुसंस्कृतोष्णपयश्चरुनिर्भरं पात्रमुपजहार सोऽप्यङ्गुलीभिः पात्रं मनाक् स्पृष्ट्वातिवेलेनोष्णेन तद्धस्ते कर्तुमसमर्थो भूत्वा राजपुत्र्याः पृष्ठे दृशं साभिप्राय निपातयाम्बभूव तस्मिन्नेव निमेषेऽवगततदीयेङ्गिता सा चापवद-

वनश्रीकृते स्वीये पश्चाद्भागे परितप्तं तत् पात्रमवस्थापयामास तत्क्षणाच्च तेनातितप्तेन भाजनेन तस्याः पृष्ठस्य दह्यमानस्यापि स मुनिः प्रीतमनाः सन् दुग्धौदनं शनकैः शनकैरुदरपूरं जघास ततोऽतीव प्रसन्नेन तेन दुर्वाससा सहर्षं विश्राणितं सत्पुत्रप्राप्तिवर-मुपलभ्य सा कुन्ती कालेन पाण्डवेयान् युधिष्ठिरभीमार्जुनान् समस्तजगत्पूजितान् पुत्रान् सुषुवे तस्मात् त्वमप्यविकारेण मनसा स्वानुरूपाभिरव्यभिचारिणीभिरुपचर्यावरिवस्यासत्क्रियाभिरिहस्थां तामवन्तिकामुपसेवस्वेति साकूपं प्रोच्य पद्मावतीजननी व्यरंसीत् । अत्रान्तरे विदूरवर्तिनि कानने मृगयाविहारं कृत्वा प्रदोषे लावाणकं प्रत्यागतो वत्सभूभर्ता भस्मसात्कृतं शुद्धान्तवासवेश्म दृष्ट्वातिभृश-विस्मितमतिः पार्श्वस्थान् मन्त्रिणोऽहो किमेतत् संजातमिति सविस्मयं पप्रच्छ पृष्टैश्च तैरुदश्रुभिः सविषादं देव क्षीणपुण्यकर्माणो मन्दभागिनो वयं कथमिव दग्धविधिहतकस्य दुश्चेष्टितं दुष्प्रसह-मत्याहितं विज्ञापयामस्तथापि विज्ञापयामोऽद्य पूर्वाह्णेऽकुतःसंभवेन यादृच्छिकेन दहनेन नः परमादरपात्रीभूता वसन्तकसहिता महिषी वासवदत्ता दग्धेत्युक्तेऽतिमोहमुषितसंज्ञस्तीव्रकुलिशनिर्घातप्रहतो वनस्पतिरिव सपदि पांशुले क्षितितले निपपात । तत्समनन्तरं शिशिरमलयजसलिलकणानजस्रं किरद्भिर्युवराजगोपालकप्रमुखै राजपुरुषैः प्रयत्नतः समाश्वास्यमानः कथमपि प्राप्तचेतन उदयनः प्राणसमाविनाशाभिशोचनसहस्रधाविदेदीर्यमाणान्तरात्मा हा जीवितसमे वासवदत्ते गाढानुरक्तं मां त्यक्त्वा निस्त्रिंशेव क्व नु

गतासीति प्रमुक्तकण्ठं क्रन्दन् भुजान्तरालपर्यन्ताविरतनिपतद्वाष्प-
विन्दुसंततिविरचितकृत्रिममुक्ताहारः सन् निर्वेदातिरेकाद् दौर्भाग्य-
हतजीवितपरित्यागोन्मुखो बभूव मुहूर्तान्तिरे च सेयं वासवदत्ता
विद्याधरचक्रवर्तिनं पुत्ररत्नं जनयिष्यतीत्यादीनि कतिपयेभ्यो
वासरेभ्यः पूर्वं शशिकुलप्रियेण नारदेनोक्तानि वचांस्यनुस्मृत्य
पुनश्च भगिनीवत्सलस्यापि स्वल्पशोकस्येव दरीदृश्यमानस्य गोपा-
लकस्य वदनं पुरतोऽवलोक्य दरमन्दीभूतविषादावेगो जीविताशा-
मवलम्ब्य ध्यानसमुद्रे निममज्ज । एवंविधे व्यतिकरे वासवदत्ता-
दाहप्रवादेषु सर्वासु दिक्षु मंक्षु परिसृत्य कर्णार्कर्णि सविस्मयमनु-
शोश्रूयमाणेषु तथाशावन्धावलम्बितधैर्ये दुरुद्वहप्रेयसीविरहसंतापा-
नलदन्दह्यमानेऽपीषदल्पीभूततद्विनाशशोके वत्समहीभृति विदित-
लावाणकान्तःपुरदाहवृत्तान्तो तद्गुणाकृष्टमना दूरदर्शी कालज्ञो
मगधराजः प्रद्योतः कार्याकार्यविवेकिना यौगन्धरायणेन निज-
विभुपाणिग्रहणार्थमभीक्ष्णमभ्यर्थितपूर्वामात्मतनूसंभवां वात्सल्य-
भूमिं पद्मावतीं तस्मै भार्याविहीनायोदयनाय भूध्रेन्द्रस्तुषाराद्रिरिव
गौरीं कृशानुरेतसेऽतिसिसृक्षुः संदेशहरं विससर्ज । तस्मिन् मागध-
दूते नृपकटकं संप्राप्य प्रद्योतस्य वाचिकं ददति तत आयुष्मन्
पद्मावतीकरपीडनेनैव सर्वमभिलषितार्थं प्राज्यराज्यवैभवोदर्कं व्यक्तं
साधयिष्यसि तत् कालातिपातं निषिध्य तामुपयमस्वेति वासव-
दत्ताविश्लेपदुःखं विस्मारयितुं मन्त्रिभिः साग्रहं प्रोत्साह्यमानो
भ्रातस्तथा क्रियतामिति स्वहितैषिणा श्यालेनापि गोपालकेन

स्मितपूर्वमनुज्ञायमानो नूनमेभिर्मदर्थं कूटोपायः प्रयुक्तः स्यात् तथा मदीयदयितापि किं नु खलु क्वचिज्जीवेदिति सामिसंदिग्धमतिरुदयन औद्दाहिकसंदेशार्थमूरीचक्रे। तत्क्षणमेव राजकार्तान्तिकैः शुभनक्षत्रयौगाधिष्ठितं शुभंकरं लग्नाहं निर्णाय्य लौकिकसमयानुवर्ती कालक्षेपासहिष्णुः समुपलब्धोदयनानुज्ञो मन्त्रिमुख्यो यौगन्धरायणो राजन्नस्माभिस्त्वदीयं वाचिकं स्वीकृतमद्यप्रभृति सप्तम्यां तिथौ वत्समहीक्षिदुदयनस्त्वद्दुहितृपाणिग्रहणाय प्राप्स्यतीति संदिश्य वैवाहिकप्राभृतसंभृतं प्रतिदूतं मागधदूतेन समं तस्मै मगधराजाय प्रजिघाय। ततो मगधाधीशः प्रद्योतो दूतमुखात् प्रतिसंदेशमाकर्ण्य प्रमुदितचेताः सन् वत्सावत्सलाया देव्या उपाक्षं वहुमतवरलाभपुलकितवपुषेऽचिरभावि-विवाहचिन्ताजनितव्रीडारुणिताधोमुख्यै स्निग्धदुहित्रे मिथःपरिणयसमयं स्मितपूर्वं शंसित्वा स्वविभूतिसदृशभूरिवैवाहिकोपायनादि-वहुविधोपस्करसंभारसंभृतमुदयनपद्मावतीकरपीडनमहामहं भृत्यैः सज्जीकारयामास। तदानीं पद्मावतीगृहेऽवन्तिकासंज्ञया गूढं काणवद्रूपिणा वसन्तकेन सार्धं निवसन्ती सा राजमहिषी वासवदत्ता तदुद्वाहवृत्तान्तश्रवणेन दुर्विगाहनिर्वेदाकूपारे सहसा निमग्नापि भर्तृकल्याणबद्धैकमानसा हृदि तीव्रावेगेन प्रजाज्वलयमानं संतापानलं धैर्यातिशयेन निगृह्य निर्विकारवदना भूत्वा च पुण्याहे संप्राप्ते प्रातस्तरामभिमतवरहस्तसंपर्कसंकल्परोमाञ्चितसर्वाङ्ग-शोभनामनल्पद्युतिरोचिष्णुमणिखचितोज्ज्वलवधूवेषविभूषितां पद्मावतीं सौहार्दात् स्वहस्तनिर्मिता-

पुनर्न संभविष्यतीति विज्ञप्तिमकार्षीत् । सततनिजकल्याणनिरतस्य राज्यभारोद्वहनकुशलस्य सख्युर्वचसोऽनतिक्रमणीयत्वात् सखे तथा कुर्म इति व्याहृत्य वत्सभूभर्ता ससम्भ्रमसज्जीकृतप्रयाणसंभारां परिजनपरिवृत्तामुद्दामवात्सल्यार्द्राभ्यां मातापितृभ्यां तथा परस्पर-विश्लेषदुःखिताभिः सनाभिभिर्बंधूभिः सस्नेहं परिरभ्यमानां साश्रुवदनां नवपरिणयां पद्मावतीमादाय श्वशुरावामन्त्र्य कौशाम्बीं प्रति प्रतस्थे तदानीं च पद्मावतीहस्तनिक्षेपभूता सहगमनाय तया समादिष्टा वासवदत्ताप्यावरणांशुकपरिच्छन्नं वाहनमधिरुह्य विकृतरूपेण वसन्तकेन साकं पृष्ठतो गूढमनुससार । ततः काल-क्रमेण समासाद्य निजपुरीं प्रेयसीविरहसंतप्तक्षामाङ्गः क्षमाभृदु-दयनः पुष्पसायको रतिमिव तामेवानुध्यायन् नवोढया पद्मावत्या सममन्तःपुरं प्राविक्षत् तत्रान्तरे च वासवदत्तापि पत्या समुज्झिता दुर्भगेव तादृग्भूतां विचित्रां निजावस्थामनुशोचन्ती गोपालका-वसथं वैकाले प्रविश्य तदवस्थस्वसृदर्शनोद्भूताश्रुक्लिन्नवदनमग्र-जमभिवाद्य विललाप । तस्मिन्नवे समये मिथःसमयादागत्य मन्त्रिणौ यौगन्धरायणश्च रुमण्वांश्च भर्तृविरहव्यथां व्यपनोदितुं राजवल्लभां यथाशक्ति यावत् प्रयत्नतोऽससान्त्वतां तावदवन्तिका-परिचर्यानियुक्तेन परिजनेन तूर्णं राजभवनमागत्य देवि केनापि कारणेन राजकुलं परिहृत्यावन्तिका नाम प्रवयसा द्विजन्मना देवी-हस्ते न्यसीकृता सा युवतिर्युवराजगोपालकमन्दिरं प्राविशत् तदत्र किं करवामेति चिन्तापूर्वं विज्ञप्ता सा नववधूः पद्मावती प्राब्रवीद्

यूयं तत्र पुनर्गत्वा मद्वचनात् तामभिभाषध्वमवन्तिके यथा त्वं मदधीना निक्षेपभूता तथा ममान्तिकमागत्य जनकप्रत्यागमनसमय-पर्यन्तं निश्चिन्तया त्वया यथासुखमत्राध्युष्यतामिति। समाकर्ण्य तद्वचस्तस्मिन् परिजने निर्गच्छत्यदभ्राशंकाविष्टेन नृपेण सकौतुकमप्रच्छि यत् ते माल्यतिलकविरचना केन विहितेति पृष्टया तयापि पद्मावत्यैवं प्रत्यवादि हे भर्तर्यमासात् प्राक् प्रोषितभर्तृकैषा मे दुहितावन्तिका नाम निक्षिप्यत इत्युक्त्वा केनाचिद् द्विजेन मद्धस्ते स्थापिता योपिदस्ति तया हस्तशिल्पकुशलया निर्मिता मम माल्यतिलकभूषेति। तत्क्षणात् ससंभ्रममुत्थाय सैव निःसंशयं मामकीना हृदिस्था प्राणसमा भवेदिति मत्वा द्रुततमगतिरुदयनो गोपालकनिशान्तमगाद् गत्वा चाभ्यन्तरं प्रविश्य गोपालकर्यागन्धरायणरुमण्वद्वसन्तकसहितामनिष्टप्रवासात् प्रतिनिवृत्तामत एव सैंहिकेयमुखाद्विनिर्गतामैन्दवीं तनूमिव विरहदुर्बलाङ्गीं दयितदयितां वासवदत्तां दृष्ट्वा च संप्रमोदविषादव्यतिकरविमोहितचेतनः सपद्यमूर्च्छीत् ततश्च सापि सीताविनाकृतं सूर्यवंशधुरंधरं राववमिव वीतसंज्ञं प्रियतममवलोक्यानिर्वचनीयमानसिकव्यामोहापहृतसंज्ञा सती सहसामुहत्। तथाभूतं व्यतिकरं परिजनमुखाद् विदित्वा व्याकुलीभूतमनस्का नववधूः पद्मावत्यपि सत्वरं तत्रागत्य वसन्तकनिवेदितसमस्तवृत्तान्ता भूत्वा तादृगवस्थं प्रणयिमिथुनमनुकम्पमाना निःशब्दमरोदीत्। अथ सर्वेषु तत्रस्थेषु दैन्यविक्लवेषूद्वाष्पलोचनेषु संशृण्वत्सु कुटिलनीतिप्रयोगाति-

निपुणोऽप्यकुटिलस्वभावः सुकृती मन्त्रिपुरोगो यौगन्धरायणो पुनःप्रकृतिस्थं राजानमवोचदायुष्मन् नात्र कश्चिदपि देव्या वासवदत्ताया अपराधो मामेवापराधिनं पापाचारं निगृह्णीष्व नः पूर्वदिग्विजयोद्योगप्रतिरोधिनः पार्ष्णिग्राहस्य मगधराजप्रद्योतस्य दुहितृप्राप्तिद्वारा त्वां प्राज्यसाम्राज्यं प्रापयितुकामेन मया सर्वमिदं व्यधायि देव सेयं प्रधानमहिषी विशुद्धशीला प्रवाससमये तव द्वितीयदेव्या पद्मावत्या सुरक्षितेति। तदनु मागधी भर्तारमभ्यभाषिष्ट प्रभोऽहमेवास्या ज्येष्ठभगिनीसमायाश्चारित्रकवचाया वासवदत्तायाः शीलसाक्षिणी प्रज्वलिते हुतभुजि सांप्रतमस्याः सुचरित्रप्रकाशनार्थमात्मानं जुहोमीति। मैवं तावत् प्रवासकालीनात्मचारित्रसंशुद्धिप्रदर्शनायाहमेव युष्मत्समक्षं प्रदीप्तेऽग्नौ प्रविशामीति वासवदत्तापि व्यक्तमवादीत् तदनन्तरं चोदयनोऽपि ध्रुवमब्रवीद् यन्मदेकपरायणायाः पातिव्रत्यभूषणाया देव्यास्तुहिनशुभ्रामनवद्यशीलसंशुद्धिं सर्वथा श्रद्दधामि नात्र तनुरपि विचिकित्सा कर्तव्या केवलं मदर्थे दुर्विषहविश्लेषपराधिं हृदयवल्लभा मे द्वितीया निर्विकारेण मनसेयन्तं कालमतितिक्षिष्ट येनाहमेवैको ध्रुवमपराध्यामि यदि चेतसि मेऽस्यामविश्वासगन्धोऽपि वर्तते तदग्निप्रवेशोद्यमस्तावदास्ताम्। इत्येवं परंपरमुक्त्वा यौगन्धरायणादिषु विरतेष्वकाण्डेऽशरीरिणी सरस्वती गगनादुदपादि भो राजन् सौभाग्यवानसि यदीयो राज्यभारोद्वहनकुशलो मन्त्रिवरेण्यो यौगन्धरायणो यदीया हृदिस्था प्राणसमा वासवदत्ता पातिव्रत्य-

भूपणा स्वप्नेष्वप्यचिन्तितशीलखण्डना नृप कालज्ञस्य षाड्गुण्य-प्रयोगकृतमुखस्य यौगन्धरायणस्य संग्रामाजिरापराङ्मुखस्योर्जस्व-लपराक्रमस्य रुमण्वतश्च साहाय्येन पृथ्वीं पृथ्वीं हस्ते करिष्यतस्ते निरुपमं कल्याणं यावज्जीवं संपत्स्यत इति। गम्भीराम्बुवाह-गर्जितं श्रुत्वा मेघनादानुलासिनः शिखिन इव प्रतिशब्दमुखरित-दिक्चक्रं व्यामोद्भवं तद् वाक्यं निशम्योद्ग्रीवास्ते सर्वे मुदं परमामवापुर्विशेषतश्च क्षितिक्षिदुदयनोऽतीव प्रमुदितमना अकुण्ठि-तराष्ट्रभक्तिपिशुनं मन्त्रिमुख्यचरित्रं कृतज्ञतापूर्वकमुच्चैरभिष्टुत्य वपुष्मत्यौ रतिनिर्वृतीव लोकोत्तरमत्तका-शिन्यौ प्रीतिकरसहवा-सोपचितप्रेमादरे वासवदत्तापद्मावत्यावुभयोः पार्श्वयोराददज्जगदै-कमुखिनमात्मानं मन्वानश्च निजवसतिं प्रति प्रचचाल। ततोऽपरेद्युः प्रवर्तितदेवीयुग्मसमागममहोत्सवप्रसंगे पानगोष्ठिकायां प्रारब्धायां दुष्करकार्यार्थिसाधनचरितार्थीकृतमनोरथेषु सततोदयोन्मुखोदयन-प्रियेषु सुहृत्सुहृत्सु परस्परं सानन्दमभिनन्दत्सु गोपालकयौगन्धरा-यणरुमण्वद्वसन्तकेषु विचित्रकथासंश्रवणार्वाजितमनःसु तेषु संकौतुकं समाकर्णयत्सु कमनीयवासवदत्तानयनेन्दीवरलाञ्छितं तथा पेशल-पद्मावतीवदनेन्दुप्रतिबिम्बाधिकस्वादु मद्यं पायं पायं मतिसचिवा-ग्रेसरस्य वपुषि सुधाधवलस्मितिपुरस्सरां दृष्टिसुधाधारामभिवर्षन् युगपदवाप्त-दुर्लभकान्तायुगलसंगमोद्भिन्नसर्वाङ्गीण-रोमाञ्चप्रहृ-ष्टान्तरङ्गो वत्सजनपदपरिवृढः सहस्रानीकात्मज उदयनोऽयि सखे यौगन्धरायण सततोपकारिणस्तवोपकारेण व्यपेताहंकारेण-

तिभूशमनुगृहीतोऽस्मि त्वदीयाप्रतिहतबुद्धिसामर्थ्यसंभवेन संप्रमोदोद्रेकेण मदीयं हृदयं सर्वतोऽङ्कुरितपुलकोद्भेदेन शरीरेण साकं द्रवीभवतीतीव ननु चक्रनेमिरिव भाग्यक्रमोऽप्यनारतं परिवरीवर्ति येन सुखान्ते दुःखं दुःखान्ते सुखं संजायते प्राधान्येनाभिमतप्रियबन्धुजनविरहधूमकेतुनिर्वापणेन ममेव कस्य मनः सोच्छ्वासं न प्रीयतेऽस्त्यत्र निदर्शनं श्रूयतां मयेदानीमुपवर्ण्यमानं तात्विकमुपाख्यानकं यद्युपशुश्रूषेति प्रस्तुत्य वक्तुमुपचक्रमे पुरा राजवतीमपि राजन्वतीमक्षय्यधनधान्यविभूतिसंपन्नसुखितसमस्तप्रजालोकां कामधेनुमिव मनीषितानेकविधादभ्रवसुदामुर्वीमुर्वीं न्यायतः प्रशशास महाविक्रमः सत्यसंगरो लोकत्रितयविश्रुतकीर्तिरस्मदीयस्य सोमवंशस्यादिपुरुषः पुरूरवोनामा वसुधायामिव विशाले त्रिविष्टपेऽपि स्वैरसंचारी मेदिनीपतिरथ कदाचित् स पुरूरवाः स्वच्छन्दं नन्दनोद्याने चंचूर्यमाणः सर्वंदममनोभूवशीकरणौषधीमिव हृदयमुपमप्सरसमुर्वशीं यदृच्छयावलुलोक दृष्ट्वा चाविलष्टकान्तितरङ्गतरङ्गिणीं सपदि व्यपेतसंज्ञो भूतले निपपात तत्कालं चासावपि स्वर्वधूस्तं चक्षुष्यं पुरुषोत्तमं समुद्वीक्ष्य दुष्टरमन्मथमोहाब्धौ निममज्ज तस्मिन्नेव मुहूर्ते क्षीरोदसुखशयितः सर्वज्ञो विष्टरश्रवास्तथाभूतं प्राथमिकदर्शनोत्थोभयानुरागातिवेलमूर्च्छितं कामिमिथुनं परिज्ञाय कृपाविष्टमनाः सन् परिचर्यार्थमुपस्थितं नारदमाज्ञापयाञ्चकार भोः कलिप्रिय संप्रति कामातुरः पुरूरवा नन्दनोपवने वीतसंज्ञ आस्ते तथोर्वश्यपि तद्रूपदर्शनापहृतचेतना मदनवशं

गतास्ति तच्छीघ्रं गत्वा दिवस्पतिना पुलोमजाजानिना तस्मै महीक्षिते पुरूरवसे तां दिविषद्योषितं प्रदाप्य कलहप्रियोऽपि त्वमघटितौ तौ परस्परप्रणयिनौ संघटयेति ततः स पद्मनाभाज्ञावशंवदो नारदो मङ्क्षूत्पत्यान्तरिक्षं मुहूर्तान्तिरे पौरंदरमुद्यानं प्राप्य हे राजन् करुणानिधिना पुण्डरीकाक्षेण त्वदीयकांक्षितार्थनिर्वाहणायात्र प्रेषितोऽहमस्मि तदेहीत्युक्त्वा तं राजानं पुनः प्रकृतिस्थं समादाय दिवौकसामधिपतेः शतमन्योरभ्यर्णं गत्वा च तस्मै वैकुण्ठस्य मनीषां निवेदयाम्बभूव तत्क्षणं च देवदेवस्य विष्टरश्रवसो निदेशस्य सर्वथानुल्लङ्घ्यत्वात् सद्योजनिष्यमाणं स्निग्धद्युयोषिद्विरहितानां सुमनसां दैन्यं विजानन्नपि मेघवाहनः पुरूरवसे तामप्सरसं ददौ ततसमनन्तरं निजमनोरथशतास्पदीभूतया तयोर्वश्या समं पुरुहूतनारदप्रभृतींस्त्रिदिवेशानापृच्छ्य प्रहर्षरोमाञ्चितवर्ष्मा भूभुक्कुञ्जरः पुरूरवा अतिशयचमत्कारक्षमद्युयुवतिदर्शनप्रीति लोकलोचनेभ्यो ददानो मर्त्यलोकमवततार तदानीं दिवो ललामभूतायामप्सरस्युर्वश्यां तिरोहितायां सदानन्दमयोऽपि द्युलको विषण्णालोक इवाजरामरोऽपि निर्जीव इव परःशतसहस्रानिमेषलोचननिवहसंकुलोऽपि शून्यीभूत इव किल ददृशे ततोऽविनश्वरप्रेमपाशनिबिडबद्धैकीभूतहृदयौ विधिवद्विहितविवाहमहामहौ तौ जंपती स्वर्लोकेऽपि दुर्लभं मनोभूसाम्राज्यसौख्यं यथातृप्ति निर्विशन्तौ सुखमासाञ्चक्रातेऽथ गच्छति काले जातु नाके सुरासुरविग्रहे सुघोरे रोमहर्षणे संप्रवृत्ते बलीयोभिर्दिविषद्वैरिभिर्नितरामभिभूयमानेन

पराजयापमानाशङ्कितेन नमुचिसूदनेन राजन् संग्रामेऽस्मिन् नः साहाय्यं कुर्वित्युदञ्जलिना प्रार्थितो राजसिंहः परोपकारनिरतः पुरूरवा झटिति विहायसा त्रिदशालयमुद्गत्य दानवेन्द्रप्रमुखान् प्रबलबलोत्सिक्तान् संख्यातिगान् सुरद्विषोऽत्यद्भुतेन भुजवीर्येण निहत्य ततोऽवशिष्टांस्तान् सहस्राक्षशत्रून् कांदिशोकान् कारयामास ततश्च विजयमहोत्सवे प्रारब्धे श्रुतिपेये च दिव्यतौर्यत्रिके सहर्षं विधीयमाने मृदङ्गादिवादित्रानुसारेण नरीनृत्यमानां प्रमादप्रकटिताभिनयदोषां स्वर्वधूं रम्भां निर्वर्ण्य पुरूरवाः समग्राणां दिवौकसां सगन्धर्वविद्याधराणां साक्षात् पश्यतामप्यट्टहासं चक्रे तत्क्षणात् प्रज्वलितामर्षानलप्रदीप्ताननो गान्धर्वाचार्यस्तुम्बुरू रे रे दुर्विनीत विक्रमदुर्ललित स्तोकाभिनयस्खलितेन लोकत्रयसंपूजितानां वास्तोष्पतिपुरस्सराणां विबुधानां समक्षमपि प्रोच्चैः प्रहसतस्तवोर्वशीविरहो मनोप्रमाथी बहुसंवत्सरावधिको भवत्विति शशाप तच्छ्रुत्वा कुलिशप्रहारोन्मूलिते भूरुह इव दुस्सहशापवज्रताडिते सनिर्वेदमधोमूखीभूते पुरूरवसि संकटसुहृदः सांपरायिकसहायस्य तस्य दयमान आखण्डलस्तुम्बुरुं सखेदमादिदेश गांधर्वमर्मज्ञ किं न वेत्सि नो बहुमतोपकारिणमेनं तदिदानीं शापावधिरतिमात्रं संक्षिप्यतामिति तथेत्यभिधाय स सुनासीराज्ञाप्रशमितमन्युः संगीतोपाध्यायो राजन् यद्यपि समुद्घोषितः शापो मयाप्यन्यथाकर्तुं न शक्यते तथापि यदा हृदिस्थोर्वशीविश्लेषविह्वलेन भुवं पर्यटाट्यमानेन त्वया बदरीतपोवने तपस्यत उर्वशीजनकस्य नारायणस्य

दर्शनप्रसादो लप्स्यते तदा शापोऽयं समाप्स्यत इति शापावधिं परिकल्पयाञ्चक्रे ततश्चासा अस्मदीय आदिपुरुषस्तीक्ष्णाभिशापनिर्घातविनष्टतेजा क्षितितलं पुनरवतीर्य निजवह्निश्चरजीवितभूतां प्रियतमामलभमानो दुर्विषहतद्विरहजोन्मादमुपितविवेकबुद्धिः सन्नितस्ततः सर्वत्र तां शापवशतिरोभूतामपि परिमार्गयितुं परिवभ्रम्यमाणो दैवयोगाद्धिमाद्रि समया बदरीतपोवनं समासाद्य तपसोग्रेण तपोनिमग्ननिश्चलमतिं नरनारायणमाराधात्रान्तरे तच्छापदोषादुर्वश्यप्यकस्मादुत्पन्नदयितभर्तृ-विप्रयोगपराधिपरिमरीमृद्यमानसुकुमाराङ्गयष्टिश्चिरन्यस्तेव समुत्क्रान्तप्राणेव निःसज्ञा भूत्वा पुत्तलिका तन्तुभिरिव तनीयोभिरसुभिः कथंचिद् दध्रे ततः प्रीणितेन बदरीनाथेन निजोरुसंभवाया दुहितुरुर्वश्या वात्सल्याच्छापावसाने पुनस्तया समायोजितः पुरूरवाः पीयूषरसप्रतीकाशानि मिथोविरहसमयपुञ्जीभूतसाराणि सहवाससुखानि प्रकामतोऽनुबभूवैवंकारं चेतःप्रमाथिदुःखपर्यवसाने मनोह्लादिसुखोदयः संजायत इति । समाकर्ण्य भर्तृमुखोदीरितामुर्वशीपुरूरवसोराख्यायिकां कथं हृदयवेधिन्यपि विप्रयोगे हतप्राणानवलम्ब्य जीविते श्वराय तनुप्रणयमात्मानं निस्त्रपमदीदृशमिति व्रीडावैलक्ष्यावनतमुखीं वासवदत्तां प्रत्यक्षीकृत्य यथाकालप्राप्तरूपनयप्रयोगकुशलः परमनोज्ञिग्रः सुधियां वरो यौगन्धरायणोऽपि श्रूयतां वो मनःसुश्रवणकौतूहल्यं चेदिति प्रस्तावं कृत्वा कथानकमित्युपावर्णदस्ति नाम्ना निमिराप्यतिमिरा वसुंधराहारयष्टिर्लक्ष्मीविहृतिभूमिर्महा-

मृत्युमिव कण्ठे गृहीत्वा विस्मयानां सर्वेषामतिभूमिं गतो रोमहर्षण-निर्भराङ्गः सन् निजविपदर्णवोद्धर्तॄंस्तान् मन्त्रिणश्च तां च सुतरां संमानयामास राजन् केवलं स्वामिमुखच्छायानिरूपणदक्षां तच्चित्तानुवर्तिनीं वेतसीं वृत्तिं समाश्रित्यैव मन्त्रिभावः कथमुपलभ्यते तदेव साचिव्यं यद् राज्यकल्याणसंपदुदयप्रजापरिपालनयोगक्षेमसाधनं पुनश्च देवि गरीयान् देवीशब्दः प्रियंवदतामात्रासाध्योऽपि सो भर्तृहितकारित्वेन प्राप्यते तस्माद्धेतोर्देव तव दिग्विजयप्रतिरोधकेन पाणिग्राहेण प्रद्योतेन विवाहसम्बन्धद्वारा संधित्सुभीरुमण्वदादिभिरस्माभिरीदृग्रूप उद्यमस्त्वत्साम्राज्यार्थमन्वस्थायि तथा देव्या वासवदत्तयापि चेतःप्रमाथिनीं त्वद्विरहवेदनां सोढ्वा भृशं तवोपाकारि। निर्विकारप्रणयसौहार्दनिधिभिः परमविश्वासपात्रैर्युष्माभिः सर्वैः सततोपकारिभिर्नितरामुपकृतोऽहं कृत्स्नां पृथ्वीं पृथ्वीं हस्तगतामिव तर्कयामीत्यूचिवान् सौभाग्यवानुदयनस्तैः साकमेवंविधान् विश्रम्भसंलापानविश्रान्तं कारं कारं वासवदत्तायास्त्रपाजं वैलक्ष्यं च तद् दिवसं च सुखं व्यतिवीवहत् ततश्चोत्तरेद्युर्यावद् रतिलक्ष्म्योरिव परिपूर्णकान्ति-शोभिन्योस्तयोर्वासवदत्तापद्मावत्योर्मध्ये विराजमानो विहृतिमकरोत् तावन्मागधवाचिकहरस्तत्समीपमुपेत्य तस्मै मगधराजस्य संदेशमित्थं न्यवीविदत् कपटनीतिप्रयुक्तिपारंगतैरसमञ्जसकारिभिस्तावकीनैः सचिवैः कूटोपायेन निपुणमतिसंधाय मुषितात्माधिकदुहितृका वयमुद्दामां व्यथामनुवोभूमस्तत्तथा कुरु यथा नो जीवितं निर्वेदसागरनिमग्नं न स्यादिति

निवेद्य च स संदेशहरः पद्मावतीमुखन्यस्तदृष्टिः सन् तामभ्यभाषिष्ट राजपुत्रि ते मातरपितरौ त्वां सविषादमाज्ञापयतोऽयि वत्सेऽपराङ्मुनाप्रसक्तेन वत्सराजेन कुटिलनयद्वारा दूरमपहृतां स्निग्धां त्वामिदानीं बुद्ध्वा सुतरां व्यथमाना आवां दैवदुर्विपाकादीदृशं कटुरसं कन्याप्रसूतिफलमास्वादावहे इति। तयोर्वाचिकं निशम्य नवपरिणया पद्मावती तं दूतमवादीत् सौम्य मद्वचनादेवं मम मातापितरौ विज्ञापय यदसमीचीनेन विषादेन कोऽर्थ इहस्थाहं सुखिता भर्तृसहवासनिर्वृतिमनुत्तमां निर्विशामि यथा प्रेमानुकोशार्द्रहृदयो भर्ता मयि स्निह्यतितरां वासवदत्तापि भगिनीव मां सस्नेहमपेक्षते तथा युवाभ्यां मयि चिन्ता न कार्येति। इत्थंकारं सपत्न्या पद्मावत्या प्रतिवाचिके प्रोक्ते सवत्सराजा वासवदत्ता तं मागधसंदेशहारकं यथावदतिथिसत्कारेण सभाजयित्वा स्वदेशं प्रत्यजीगमत् ततश्च तस्मिन् प्रस्थिते विदूरवर्तिनो वन्धुजनस्यानुस्मारमनुस्मारमुत्कलिकासहस्रकीलितां दरविषण्णवदनां मागधीं दृष्ट्वा तस्या उत्कण्ठां व्यपनोदयितुं पार्श्ववर्तिनं नर्मावतारं वसन्तकं हे नर्मपरिहासकथाकोविद कथय कामपि मनोविनोदिनीं कथामित्यभ्यार्तिथत। अयि भोः कर्णौ सावधानं दद्ध्वं यूयं सर्वे यदि मदीयाख्यायिकाशुश्रूषा मनसि भुजङ्गमीव मूर्धानमुन्नमयतीति कथामुखे साटोपं समुदीर्य चिकथयिषितं कथाजालं स्वैरं वितनितुं प्रारब्धेत उत्तराहि निःशेषक्षितिमण्डलालंकारभूषणायिते लक्ष्मीसरस्वतीप्रसादलब्धप्राज्यहिरण्यविद्यासंपन्नसमग्रपौरलोके पाटलिपुत्राभिधे

महानगरे कोऽपि महाधनः सार्थवाहो धर्मगुप्तो नाम बभूव तस्या गृहिणी चन्द्रप्रभा नाम चन्द्रप्रभाद्योतितालोका निर्मले मुकुरे प्रतिबिम्बिता चान्द्रमसी मूर्तीव सुरूपा या कदाचिदापन्नसत्त्वा कालेऽतिमानुषाकृतिविशेषविराजितामप्सरसमिव तनयां प्रसुषुवे, सा शुभ्रस्मितविकसिताननेन्दुरदभ्रवपुष्कान्तिदीपितसूतिवेश्मा प्रसूतमात्रैव सा कन्यकोपविश्य सर्वतो दशनचन्द्रिकां किरती हे पितरौ कस्मैचिदपि कर्हिचिदपि मां परिणयहेतोः प्रदातुं नार्हथ इति सुस्पिष्टाक्षरं व्याजहार जगदेकाश्चर्यसदृशं तच्छ्रुत्वा सत्रासविस्मयकोटिमधिरूढेन जनकेन वद का त्वमसि देवी नूताहोस्विदसुरी किमर्थमस्मद्गेहेऽवतीर्णासीति प्रणतिपूर्वं पृष्टा सा सद्योजाता बाला पुनः सस्मितं बभाषे तात सविस्तरं मां मा प्राक्षीः केवलमिदं ते निवेदयामि यहहं शुभा युष्मद्वेश्मनि गूढं स्थास्यामि तन्मां कस्मैचिदपि मा खलु दिथा इति । ततः कालक्रमेण नाम्ना सोमप्रभा सा दिव्यकन्या मर्त्येन वपुषा वासन्ती मधुमिव प्रफुल्लयौवनं संप्राप्य जातु हर्म्यपृष्ठगता वसन्तोत्सवयात्रां सानन्दमवलोकयन्ती तस्थौ तत्कालं च सर्वाङ्गशोभिनीं पुष्पधन्वसर्वस्वनीकाशां कुसुमस्मेराभिनवतारुण्योद्यानवल्लरीं हृदयमुषं युवजनवशीकरणौषधीमिन्दुमुखीं तां यदृच्छयोद्वीक्ष्य सपद्युद्भिन्नचक्षूरागगाढरञ्जितहृदयो गुहसेनाह्वयस्य वणिजस्तनूद्भवो गुहचन्द्रः कुसुमायुधकलम्बसन्निपातशतधाविदारितहृदयत्वादेकपदे समुल्लङ्घितमदनावस्थानवको दशम्यामवस्थायां मकरध्वजेन निर्दयमारोपितो

मोमूर्च्छ्यमानः प्रस्खलितगतिः कथमपि निजवसतिमियाय । ततो दूरीकृताहारं मनोभूजनितोन्मादमूर्च्छातुरं प्रज्वलितज्वरतातप्यमानत्वाच्छय्यायामितस्ततः परिवर्तमानं प्राणसंदेहवर्तिनं वराकमात्मजं विदित्वा सहचरमुखोपलब्धतद्वृत्तान्तो गुहसेनो धर्मगुप्तगृहं गत्वा निजपुत्रकार्थे तं दुहितरं प्रार्थयांचक्रे सखे त्वत्कन्यादर्शनमात्रोत्पन्नतीव्रमदनज्वरसंतप्तो मम पुत्रको जीवितसंशये वर्तते तदस्मै तां सकृपं दातुमर्हसीति । हे सुहसेन त्वं मूढ इव स्वप्नायसे यत्र मे कन्येति तेन याचितो धर्मगुप्त उचाव । एवं प्रत्याख्यातयाञ्चो स गुहसेनो मनस्यचिचिन्तत् स्वपुत्रीं निह्नुत्य कर्कशाशयो धर्मगुप्तस्तां दातुं नेच्छति तत् पुत्रप्राणपरित्राणाय राज्ञः साहाय्येन बलात्कारेणापि तां हस्ते करिष्यामीति तत्क्षणाद्राजानमुपेत्य तस्मै महामूल्यं रत्नमुपहृत्य च मनीषितमर्थं प्रश्रयपूर्वं व्यजिज्ञपत् ततोऽप्रतिमरत्नलाभतुष्टेन नृपेण सार्थवाहस्यास्य साहाय्यं कुर्विति तूर्णमेव रामादिष्टं पुराध्यक्षमादाय पुनर्गत्वा धर्मगुप्तस्य वसतिगृहमायुधीयैर्नगररक्षिभिर्नीरन्ध्रं प्रतिरुध्य भो भो धर्मगुप्त कण्ठगतप्राणाय पुत्राय कन्यां देहीत्युच्चैस्तमाचुक्रोश । भयानकशस्त्रपाणीनां नगररक्षानियुक्तसैन्यानामतर्कितस्वगृहप्रतिरोधपुरस्सरं प्रसह्य तनूद्भवामपहर्तुं चेष्टमानेन वणिजा गुहसेनेन नितरां निर्भर्त्स्यमानत्वात् कण्ठगतप्राणमिव निष्प्रभं वातुलमिव ससाध्वसं वेपमानमपि सत्यसंगरत्वाद् गृहीततूष्णींभावं पितरं धर्मगुप्तं दृष्ट्वा सा दिव्ययोषित् सोमप्रभा तमभाणीन्मन्मूलको

निःशेषकुलविनिपातो मा तावदुत्पादि तात परिणेत्रा गुहचन्द्रेण न कर्हिचिदपि मम वपुः स्प्रष्टव्यं नाहं तेन साधारणमर्त्येन सहैकस्मिञ्छयने कदाचिदपि शयिष्य इति यावज्जीवमनपायिनीं याथार्थिकीं प्रतिश्रुतिं लब्ध्वा मां तस्मै काममोहिताय वणिक्सुताय दत्स्वेति। तद्वचसा युगपदुच्छ्वसितान्तरात्मा स सत्यसन्धो वणिग्वरो धर्मगुप्तो भो भो गुहसेन केयं निःसत्त्वस्य ते विभीषिका यया स्तोकमपि नाहं विभीषितः केवलं स्वमनीषितार्थसिद्धये त्वादृशाः कदर्याः क्लीवा इव सत्त्वार्जवविहीना अन्यान् भाययितुं सर्वसज्जनजुगुप्सितमीदृग्विधं बलात्कारं प्रयुञ्जते तथापि मदनार्त्या मुमूर्षोस्त्वदात्मजस्य दयमानोऽहं प्राणाधिकस्निग्धां दुहितरं तस्मै दद्यां विवाहदिवसात् प्रभृति यावज्जीवेन ते पुत्रहतकस्तां शरीरस्पर्शेन न खलु दूषयिष्यतीति प्रतिज्ञालेखं दद्याश्चेदिति स्वीयवेश्मप्रतिरोधकस्य गुहसेनस्याभिमुखमाक्रुक्षत् तदनन्तरं च मरणोन्मुखस्य पुत्रस्य जीवातुसमेन तद्वचसा प्रहृष्टमनसि तस्मिन् प्रतिज्ञां पत्रे लिखित्वा समर्पितवति दिव्यकान्तिद्योतितविग्रहां सोमप्रभां तेन वणिक्पुत्रेणोदवीवहत्। ततोऽग्निसाक्षिकं यथाविधि भूतलेऽप्सरायमाणमप्रतिद्वन्द्ववरवर्णिनीं परमार्थतः प्राणदां सोमप्रभां परिणीय स्वस्थीभूते तस्मिन् पुलकितवर्ष्मणि गुहचन्द्रे नवोढया तया साकं स्वीयं वास्तव्यमायाते वत्स चिरात्फलितमनोरथोऽसि वैवाहिकक्षणदां क्षणदामिमामपि यथातृप्ति सफलीकर्तुमात्मीयां जायां सोमप्रभां तल्पेऽध्यारोप्य शेष्वेति निशीथे जनको गुहसेनो

निजौरसमभिदधे । तस्मिन्नेव क्षणे कृतसंविद्व्यतिक्रमस्य मायाविन एवंविधामपत्रपां गिरमुपश्रुत्य प्रतिज्ञाभङ्गजनितप्रचण्डामर्षानल-प्रदीप्तसभ्रूभङ्गमुखभीषणालोका सकलजगद्विध्वंसोत्सुकदानव-सूदनी चण्डीव चण्डी सा नवनधूः सोमप्रभा पश्यतस्तस्य पुरतः कृतान्तनिदेशाभां प्रदेशिनीं चक्रवदविभ्रमत् । दृष्ट्वैव तां तस्या-स्तर्जनीं मण्डलेन प्रचाल्यमानां सहसापक्रान्तचेतनोऽसौ व्यवहारकः साष्टाङ्गं दण्डवत् क्षितितले निपत्यापुनःप्राप्यैरसुभिर्व्ययोजि तथा च तत्रस्था गुहचन्द्रादयः सर्वेऽपरे दुर्निवाराभिस्त्रासोद्वेगाशङ्काभिः समयोजिषत । एवमपमृत्युं गते जनयितरि तीव्रशोकावेगाविष्ट-मानसः स गुहचन्द्रोऽहो कष्टं दशाविपर्यासेन मदीयसदसि सर्वप्राण-हारिणी सर्वंकषा मारी तिष्ठतीति सनिर्वेदं मनसि ध्यायं ध्यायम-पदेवताया इव प्रशान्तचित्तोद्वेजयित्र्या न केवलं शरीरेण मनसा-प्यगम्यायाः परकीययोषित इव स्वकीयभार्याया दर्शनमपि सर्वात्मना वर्जयन् गाङ्गेयो भीष्म इवोर्ध्वरेता भूत्वा सततमसिधाराव्रतं ब्रह्मचर्यमाचारीत् किञ्च ध्रुवमैहलौकिकविषयसंभोगे वीततृष्णो भूरिदक्षिणाभोजनादिदानेन सभाजनार्हान् द्विजातीननिशमतूतुषत् । अथैकदा वयसा विद्यया च वृद्धिं गतः कोऽप्यागन्तुकोऽग्रजन्मा प्राज्यां दक्षिणां ददतीं स्वर्वधूमिव नयनमुषं मत्तकाशिनीं वाचंयमां तां सोमप्रभां समुद्वीक्ष्य युपपदत्यद्भुततद्रूपसंपच्चमत्कृतमनाः सविस्मयं तमूर्ध्वरेतसं गृहाश्रमिणं भो गुहचन्द्र केयं युवतिरतिमानुषवपुष्का-न्तिविच्छायीकृतपौर्णमास–सुधांशुमूर्तिर्लोकलोचनमधुपमदयित्नुवद-

नाम्भोजापत्रपिताम्भोजा किंगोत्रा किंशीलेत्यन्वयुंक्तैवंकारं च साग्रहपृष्टे तस्मिन् यूनि सुदीर्घं निःश्वस्य तदपेक्षमितिवृत्तं सविस्तरं कथितवति सेयं सर्वाङ्गसुन्दरी शापाद्भुवि परिभ्रष्टा सुरयुवतिरिति निश्चित्य मनोरथसाधनमग्निमन्त्रं तस्मै सानुक्रोशं व्यशिश्रणत्। ततः स सपत्नीकोऽपि ब्रह्मचारी युवा गुहचन्द्रोऽहर्निशं प्रतिदिनमवहितेन चेतसा द्विजातिनिर्दिष्टेन हुतभुगाराधनमन्त्रेणैव हवींषि हुत्वा हविर्भुजं हिरण्यरेतसं प्रासीषदद् येनातीव प्रीणितोऽग्निवर्चोभ्राजिष्णुर्ब्राह्मणवेषधरो दिव्यपुरुषस्तस्य जातवेदसो मध्यादुत्थाय पुत्र तव परमया भक्त्या प्रसन्नोऽस्म्यद्य त्वद्गृहमध्युष्य त्वां कृतार्थीकरिष्यामीति प्रीतिपूर्वकं व्याहृत्य ततोऽर्धरात्रे संजाते सान्द्रनिन्द्राग्रस्तप्रसुप्तजनात् तस्माद्वसतिगृहात् क्वापि बहिर्निर्गच्छन्तीं प्रोज्ज्वलाकल्पमण्डितदिव्याकृतिं सोमप्रभां ददृशिवान् निद्राणं गुहचन्द्रं प्रबोध्य मामनुसर वत्स निजजायाप्रवृत्तिं साक्षात्कुरुष्वेति समुदीर्य तं चात्मानं च मधुलिड्रूपेण परिणतं विधाय पुरतो यान्तीं भार्यां तस्मा अदीदृशत्। सा हंसगामिनी सोमप्रभा पुरगोपुराद्बहिर्विदूरं गत्वा समुच्छ्रितमहाभोगं ज्योत्स्नाविद्योतितप्रकाण्डनीरन्ध्रसुपर्णशाखाभिरुचिरं मञ्जुलमञ्जुलोद्भूतश्रवणसुभगदिव्यगीतिध्वनिमधुरं महान्योग्रधशाखिनमासाद्य स्कन्धशाखामधिरूढा कयाप्यात्मानुरूपया सुरलोकयोपिता सहोपविश्य च विश्रम्भसंलापं कुर्वाणा यथासुखमासिष्ट ततश्चाश्चर्यास्पदीभूतमतिप्रेक्षणीयमिदं दिव्ययुवतिद्वयप्रेक्षणकं प्रत्यक्षीकृत्य

सुतरां विस्मापितमनसि तस्मिन् गुहचन्द्रे किं मया शशशृङ्गरूपः स्वप्न आहोस्विच्चेतोभ्रान्तिरनुभूयत इति मधुपरूपिणि संदिहति तया स्ववंध्वा समं सौहित्यप्रदमात्मानुगुणमाहारं प्राश्य सा शापच्युता त्रिविष्टपललना सोमप्रभा सस्मितदशनकौमुदीविकिरणेन ज्योत्स्नाशुभ्रामपि तां ज्यौत्स्नीं समधिकं द्योतयन्ती सहचरि कोऽप्यतनुद्युतिमान् विप्रवरेण्योऽद्य प्राप्तोऽस्मद्गेहे तिष्ठति तत् त्वामापृच्छ्य साधयामीति निगद्य तां सान्द्रप्रणयपूर्वं परिरभ्य च तस्मान्महापादपादवरूढा यथागतं जगाम। तस्मिन्नेव मुहूर्ते तौ द्विरेफरूपिणावग्निदेवगुहचन्द्रावुत्पतिष्णू विहायसा पूर्वमागत्य समुज्झितषट्पदवेषौ यथापूर्वं प्रसुप्ताविव शय्यां निःशब्दं समाशिश्रियाते तदनु प्रतिनिवृत्तां वणिग्भार्यां गर्भगृहं प्रविष्टां विदित्वा मूर्तिमान् स हव्यवाहनः किमद्राक्षीः स्वकीयां जायां या शापवशाद् भुवमवतीर्णा स्ववंधूः कथमिव मर्त्येन साधारणेन संजिगमिषते तथापि वात्सल्याद्धृदयवाञ्छितार्थसिद्धये तद्वशीकरणमन्त्रयुक्तौ तुभ्यमुपदिशामीति निगद्य तदनन्तरं तथा कृत्वा च प्रातस्तरां कुत्राप्यदर्शनमियाय। तत उत्तरेद्युः कमलिनीविरहशोकादिव सहस्रदीधिता अस्ताद्रिशिखरमतिक्रम्य पश्चिमाकूपारे निमज्जति यथोपदिष्टं मन्त्रं जपित्वा कृतोल्बणकामुकवेषः कर्पूरमलयजमृगनाभिपरिमलावलिप्तांगः कृपीटयोनिप्रसादेन यथाशीघ्रमसिधाराव्रतं परितित्यक्षुः स तरुणसार्थवाहो गुहचन्द्रो निजगृहानीतया वारमुख्यया सह परस्पराधरौष्ठमधुपानं सस्पृहं कुर्वाणोऽरंस्त तं च

तथाप्रवृत्तमन्मथकेलि निधुवनलोलुपमात्मनो भर्तारं साक्षान्निर्वर्ण्य सपदि समुत्पन्नानल्पेर्ष्याविमनीकृतमानसा प्रबलवैश्वानरमन्त्रोद्घाटितदीर्घकालवाच्यमतामुद्रितवदना सा कृतोद्वाहाप्यद्यपूर्वमक्षतयोनिर्दिव्यकन्या तदीयभार्या सोमप्रभा द्वेसान्द्रनीमूततिरस्कृतचन्द्रविम्बवद्भ्रूकुटिरचनादुर्दिनायमानमुखेन्दु-संसूचितोद्दामविप्रतीसारपुरस्सरं तं कामुकमुपांशु हे भर्तः परपुरुषासक्तया पांसलयानया किं करोषीति सरोषमवादीद् यथा पश्यसि तथैवानया पीनस्तन्या वामलोचनया हृदिस्पृशं सुरतसंभोगमुपबुभुक्षुरस्मीति तेन प्रयुक्ते च तां वारमुख्यां युगपदपहस्तयित्वा सर्वदमपञ्चशरशराधिकबलीयांसि कटाक्षवीक्षितानि सविभ्रममभिवर्षन्ती हे प्रेयन् यथा ह्यहं त्वदीया जाया तथा हीदानीं यथेच्छं मामभिगच्छेत्युदीर्य तद्वचनप्रमुदितचेतसमूर्ध्वरेतसं वाससाभ्यन्तरमनैषीत् । इत्थमग्निमन्त्रवशीकृतत्वान्नितरां वृषस्यन्तीमस्पृष्टचरपरिणेतृगात्रसंपर्कपुलकितवपुषमतिप्रमोदसामिनिमीलिताक्षीं तां सोमप्रभां रागोद्रेकात् क्रोडीकृत्य परमार्थतोऽतिशयितामृतरसं मनसिशयसर्वस्वकल्पं तदीयपक्वबिम्बौष्ठरसमनन्ततृष्णादायिनं पायं पायं तदनु मा मेति मुहुर्मुहुर्हस्तौ विक्षिपन्त्यास्तस्या आप्रपदीनं शुभ्रवसनं कथंचिदपनीय चन्द्रिकादर्शितमनोमोहिपीनकुचकुम्भवलित्रयाङ्कितावर्तनाभिहस्तग्राह्यावलग्नपीवरनितम्बबिम्बमांसलरम्भोरु-सर्वाकारातिमनोहरं पाणिपीडनदिवसात् प्रभृति कालेऽनेकतिथेऽतिक्रान्तेऽप्यनवलोकितास्पृष्टपूर्वं दिव्याङ्गनायास्तस्या अहंपूर्वयापरस्परस्पर्धमान-

सकललनाङ्गातिशायि वपुर्ददर्श दर्शं चित्रन्यस्त इव स्पर्शं स्पर्शं च सर्पिषा हविर्भुगिव दुर्निग्रहकामानलेन संधुक्षितः स ब्रह्मचारी गुहचन्द्रो मधुरकुहूरवसुभगां कोकिलाङ्गनामिव श्रवणसुभगरतिकूजितरमणीयां प्रथममैथुनवेपमानवक्षःस्थलीं रोमाञ्चितसर्वाङ्गसुन्दरीं सुन्दरीं तां गाढतरमालिङ्ग्य दीर्घकालीनमूर्ध्वरेतोभावमसिधाराव्रतेन साकमेकपदे जीर्णपटच्चरमिव समूज्झ्य ततः प्रभृति जिनभार्यया प्रेमरसतरङ्गिण्या सहवाससुखसंपदमतिप्राज्यां सुचिरं निर्विवेशेति । एवं कथाकथनकृतमुखेन वसन्तकेन कथितामभिरुचिररसनिस्यन्दिनीं कथामुपश्रुत्य तुष्यन्ती निरन्तरकथाश्रवणाकृष्टमानसा सपद्मावती वासवदत्ता प्रीतिस्मेरां दृष्टिं तन्मुखे निपात्य तं पुनरित्यभ्यभाषिष्ट हे श्रुतिपेयकथामर्मज्ञ कथकानामग्रेसर भूयोऽप्यपरकथाकथनेन त्वत्कथारसिकानामस्माकं मनांसि प्रमोदय यदीच्छसीति श्रुत्वा सोऽप्युपाख्यानान्तरमुपवर्णयितुमुपाक्रंस्त—

प्राक्तने युगे बभूव किल महातपाः कालत्रयदर्शी भारद्वाजो गौतमो नाम मुनिसत्तमस्तस्य बभूवाऽहल्या नाम धर्मपत्नी तां च कदाचिद् दृष्ट्वा तद्रूपसंपद्वशीकृतो दिवस्पतिः पुलोमजाजानिः पुरंदरो वृषस्यन्तीं तां शरीरेणाभिजगाम ततश्च निजप्रज्ञाचक्षुर्विदिताहल्याशक्रसंगमव्यतिकरो ज्ञानचक्षुः स मुनिपुंगवः प्रविश्य सपद्यतिभृशं बिभ्यति तस्मिञ्जारे वृद्धश्रवसि मार्जारूपं धृत्वा निःशब्दं स्थिते कोऽत्र तपोवनाश्रमे तिष्ठतीति तां परिभ्रष्टशीलां स्वैरिणीं स्वजायामनुययुजे महामुने विडालोऽत्र तिष्ठतीति ससाध्वसं तया

प्रतिभाषिते च भ्रूभङ्गधूमव्यक्तीकृतान्तर्ज्वलदमर्षधूमकेतुः सरोषमौडुम्बरयष्ट्या तं त्रासवेपथुविधुरं क्रीडागोलकमिव संकोचितदेहं मूषकारातिमतिदृढं ताडयित्वा निस्त्रपे पुंश्चलि विरलमनुष्यसंचारदुर्गमकान्तारनिवासिसीताजनिचरणसरोरुहसंस्पर्शपर्यन्तं सुदीर्घकालं शिला भव भो मार्जारूप पाप शतमन्यो परस्त्रीलोलुपस्य शिश्नदेवस्य तेऽङ्गेषु सर्वत्र योनिसहस्रं संजायतां पुनर्यदा त्वं विश्वकर्मनिर्मितां सुरसुन्दरीं तिलोत्तमां द्रक्ष्यसि तदा विमुक्तभगसहस्रस्त्वं सहस्राक्षो भविष्यसीति सोपपतिं दुराचारां शशापैवं स्वयमुप्तस्य दौश्चर्यबीजस्य शापफलं प्राप्य साऽहल्या दुर्विषहदुर्गतिदोदूयमानमानसा वज्रलेपकठोरां शिलावस्थां प्रपेदे तत्क्षणात् सोऽपि दिवौकसामधीश्वरोऽपि भूत्वा सुनासीरो रतिकुहरसहस्रलाञ्छितदुर्दर्शनाकृतिः सन् परेषां हास्यास्पदं संववृतेऽयि देव्यौ सुकृतैः सौभाग्योदयो दुष्कृतैश्चैवं दौर्भाग्यविनिपातो महद्भिरप्यनुभूयते तज्जन्मान्तरपरस्परानुरक्तयोः सोदरयोर्दिव्यप्रमदयोरिहलोके शापभ्रष्टयोर्युवयोर्देव्योरपि शाश्वतीः समाः सौभाग्यसंपदो भूयासुरिति । श्रुत्वा तद्वचः प्रमुदितमानसे वत्सराजसपत्न्यौ वासवदत्तापद्मावत्यौ भविष्यत्काले मनसि कदाचिदपि जनिष्यमाणमन्योन्यस्योपरि मत्सरगन्धमपि परिहर्तुं मनो बबन्धतुः । ततः कालेऽल्पीयसि व्यतीते प्रतीहारप्रवेशितो मागधदूतो वत्सराजमुदयनं प्रणम्य देव नः स्वामी मगधवसुंधराधिपतिर्महाराजः प्रद्योतस्त्वां समादिशति यदस्मदीयारलोपद्मावतीप्रतिसंदेशाधिगतत्वद्गताखिल-

वृत्तान्तातिमात्रसंतुष्टा वयं तयोः कलहहेतुकेष्यांविवर्जितमि
स्नेहादरैकीभूतमनसोः सपत्न्योः सुदृढबद्धसमानभावस्य तव राज्या-
भ्युदयमेव कामयामह इति तस्मै संदेशं विश्राणयाञ्चक्रे तदनु
वत्सराजेन भूरिप्राभृतातिसर्जनेन सत्कृते तस्मिन् दूते प्रस्थिते-
ऽवन्तिभूभर्तुश्चण्डमहासेनस्य वाचिकहरोऽप्यागत्य यथाविधि
विहितप्रणतिः सन् तमुदयनमभिवभाषे राजन् कृत्स्नराजकचूडा-
मणिरोचिष्णुरुचिसततलालितचरणरक्ताम्बुजोऽप्रतिद्वन्द्व-महाविक्र-
मोत्साहशक्तिसंपन्नो दीर्घदर्शी प्रज्ञावतां पुरस्कृतः क्षितिभृदधि-
पश्चण्डमहासेनो मन्मुखेनेदं ते संदिशति यदस्माकं वासल्यपात्रस्य
वासवदत्तायाः साहाय्येन मन्त्रिपुरोगयौगन्धरायणप्रज्ञानिष्पादितं
ते प्रद्योतात्मजापरिणयोदन्तं परिज्ञाय हृदि निरुपमा संतुष्टिः
संजायते विशेषतस्त्वद्धितकाम्यया नस्तनूजा दुष्करमपि यत् कार्य-
मन्वस्थात् तेन सुतरां प्रीताः स्मः पुनर्यथा वासवदत्तासमायां
पद्मावत्यां नः स्नेहो वर्तते तथैव तवाप्यस्तु संप्रति च पाणिग्राहे
युक्तितो मित्रीकृते सति यौगन्धरायणप्रोत्साहवचनानुरोधात् पृथ्वी-
साम्राज्यावहो दिग्विजययोद्यमो यथाबलं विधीयतामिति। एवंविधं
संदेशहरमुखात् संदिष्टं श्वशुरवाक्यमाकर्ण्य प्रीतिप्रमोदविकसित-
स्मेराननो वत्सराज उदयनः सपद्मावतीं देवीं वासवदत्तामनायसोढ-
राज्यभारं सचिवसत्तमं यौगन्धरायणं च बहुमन्यमानोऽविकलाति-
थेयसन्मानविधिप्रहृष्टं तं दूतमुज्जयिनीं प्रतिगमयामास।

(१०) विदूषककथा

अथ कदाचिदनारतपद्मावतीवदनकोकनदमधुपानपुलकितवर्ष्मणि स्पृहणीयवासवदत्तावक्षोरुहविहृतिपीयूषधारासंसिक्ते नृपतावुदयने सर्वास्थानसभामण्डपसमाश्रिते यौगन्धरायणादीनां राज्यधुरंधराणां सन्निकर्षे प्रतीहारानुमतान्तः प्रवेशोऽविरताश्रुधारासंततिस्नपितप्रबलरुदितोच्छूनाक्षः कोऽपि मध्यमवयस्को वाडवोऽप्यवाडवस्तदुपकण्ठमुपेत्य दीनवत्सल निःशरणशरण राजन् अहो अब्रह्मण्यमब्रह्मण्यमेकपुत्रस्य मम पुत्रोऽद्य कानने दुरात्मभिराभीरैर्निष्कारणं चरणेन विनाकृतो जीवितसंशये वर्तत इति सनिर्वेदं विज्ञाप्य मुक्तकण्ठमक्रन्दीत्। सानुक्रोशमाकर्ण्य तद्विज्ञप्तिं परदुःखदुर्मनायितमना उदयनस्तूर्णं योद्धृभिः कांश्चित् तरुणाभीराञ्जीवग्राहं गृहीत्वानाय्य च तानजातश्मश्रून् सरोषमप्राक्षीद् रे रे महापाप्मानः के यूयं किमर्थमस्य विप्रवरस्य युष्मद्वरिवस्याहस्य देहजस्य पादपरिच्छेदं निकृष्टकिल्बिषमकार्ष्टेति। आयुष्मन् वयमाभीरजातीया अरण्ये विहरन्तो निवसामोऽस्माकं मध्ये देवसेनो नाम गोपालकः कृतकराजः शिलामयभद्रासने समासीनः कान्तारराज्यं प्रशास्ति तदाज्ञावशंवदेषु सर्वेष्वस्मासु न कोऽपि तस्य प्रशासनं व्यतिक्रमितुमुत्सहतेऽद्य तु दैवाद् विप्रबालकस्तेनैव पथा

पालकैर्दर्शितवर्त्मा यौगन्धरायणप्रभृतीन् महामात्रानादाय शुभ्रहयारूढस्तत्र द्रुतमियाय । सान्द्रवनस्पतिराजिनीरन्ध्रं तदरण्यं समासाद्य विचित्रभूमिलक्षणज्ञेन यौगन्धरायणेन परीक्ष्य निर्दिष्टे क्षितिप्रदेशे राजयुध्वभिश्चिरं निखन्यमाने क्ष्माकुक्षितः पङ्किलशिलामयवृहदाकृतिर्धनदानुचरो यक्षोऽर्तकितमेवाविर्बभूव निमेषान्तरे चैवमुदयनमभिवभाषे हे वत्सभूमीन्द्र धन्योऽसि येन त्वमिदानीं स्वपूर्वजयुधिष्ठिरनिहितमतिवस्नं महानिधिमवाप्नोषि यमहं परःशतसमास्त्वदर्थे सावधानं पर्यरक्षिषमुररीकुरुष्व पितृपैतामहं महार्घ्यमिदं निधिरत्नमिति । तद्वचः श्रवणप्रहृष्टमनाः सौभाग्यवान् नरेश्वर उदयनस्तं गुह्यकं यथार्हसत्क्रियाविधिपूर्वकं सभाजयित्वा तस्मिन् क्वापि तिरोहिते प्रचुरहिरण्यमणिसंचयोपेतं सौवर्णरत्नसिंहासनं पाण्डवीयमादाय राजधानीं सहर्षं प्रत्याजगाम ततश्चामूल्यनिधिरत्नप्राप्तिप्रासङ्गिकं महामहं कारयित्वा परःशतसहस्रवैजयन्तीसौदामनीसमाकुले नभसि महोत्सवप्रमुदितपौरजानपदाभिहतमृदंगादिनानाविधवादित्रध्वनिसहचरे च संगीते बधिरीकृतसमस्तककुबन्तराले वारिवाहो वारीव हिरण्यराशिं भृत्येषु सानन्दमभिववर्ष । ततो वत्सभूपालाशयविविदिषया बुद्धिमतां प्रवेको यौगन्धरायणो महाराज ननु जनस्य भाग्योदये शुभंकरकल्याणपरम्परा समुत्पद्यते पूर्वं वासवदत्ता तदनु पद्मावती सांप्रतं तु युधिष्ठिरं सिंहासनं त्वद्धस्ते दैवत आगतं देव दिष्ट्या वर्धसेऽधुना त्वया चिरात् प्राप्तमिदं पितृपैतामहमत-

नुजाम्बूनदरत्नप्रभाप्रभास्वरं सर्वलोकातिदुष्प्रापं भद्रासनमुपवेशनेन समलंक्रियतामिति शुभंयुभाग्योदयनमुदयनमब्रवीन्निशम्य च तद्वाक्यं तेन प्रत्यवादि सखे समंजसमिव त्वयोक्तं तथापि कथमिव दिग्विजयानात्मसाकृतविपुलपृथ्वीमण्डलेन केवलवत्सभूभागाधिष्ठितेन निस्त्रपेण मया चक्रवर्तिसमुचितमेतद् रत्नसिंहासनमुल्लङ्घितुं शक्यते शृणु सखे पुरा सर्वानमित्रान् दमयित्वा कृत्स्नमेदिनीविजयानन्तरानुष्ठितराजसूयो दिक्षु सर्वासु प्रथितमहायशाः कुमुदबान्धवान्वयललामभूतो नः परमपूज्यः पूर्वजो वृकोदराग्रजो धर्मराज इदमात्मानुगुणं सिंहासनमधिरुह्य यथान्यायं पृथिवीसाम्राज्यं प्रशशास तस्मादहमपि जलनिधिमेखलामनल्पवसुदां वसुधां साकल्येन विजित्य भद्रासनमिदमलंकरिष्यामीति । एवंकारं विवेकदृश्वना वत्सभूभर्त्रा व्याहृतामतिप्राप्तरूपां भणितिं प्रीतिपूर्वकमनुश्रुत्य परितुष्टोऽसौ सचिवप्राग्रयः सस्मितं तं पुनरवदत् तर्हि दिवस्पतिपुरुहूताधिष्ठितां सुरनिम्नगाप्रवाहपावनां लोकलोचनोदयसततद्योतितालोकां प्राचीं ककुभं पूर्वमात्मसात्कर्तुं प्रयतस्व ततः क्रमान्महातेजोभिरप्रतिमपुरुषकारैस्त्वदीयपूर्वजैः कृतवसतिं गजासाह्वयं प्राप्य सकललोकजिष्णुश्चक्रवर्ती भवितुमर्हसि यथा युधिष्ठिरप्रभृतयस्ते पूर्वजा अपि हस्तिनापुरमाश्रित्य निखिलदिक्चक्रं विजिग्यिरे केवलं त्वदीयः पितामहः शतानीकस्तु प्रकृतिसुषमारञ्जितहृदयत्वादिमां कौशाम्बीं राजधानीमकरोदिति। देशविशेषगौरवमपक्ष्यैवं समुदीर्य तस्मिंस्तूष्णींभूतेऽर्णवाम्बरविस्वं-

भराविजयं प्रज्ञापुरस्सरपौरुषायत्तं प्रतीत्य विक्रमगौरवपक्षपाती मतिमतां वरेण्य उदयनस्तु देवीभ्यां सह सर्वेषु सुहृत्सु दत्तकर्णेषु साधुवादपुरस्सरमिति प्रतिव्याजहार सखे युक्तरूपं त्वया प्रोक्तं परन्तु कथंस्विद् देशनियममात्रं सार्वभौमताकारणं स्यान्मनोऽनुकूले कृतान्ते प्रसीदति पुरुषकारेणाकुण्ठितेन पुंसा संपदादिकं समीहितं सर्वं साध्यते समाश्रयणीयदेशविवर्जितोऽप्यूर्जस्वलसत्त्वसंपन्नः पुमान् विपुलां श्रियं हस्ते कुरुते किं पौरुषनिदर्शनरूपा वीरकथैषा यौष्माकीणश्रुतिविषयं नापतितपूर्वा, प्रभोऽद्यपूर्वमस्माभिर्नाश्रावि तदायुष्मान् कथयत्विति सखिभिस्तैः प्रार्थितश्चासावद्भुतवीररसनिर्झरिणीमिमां कथामुपवर्णयितुमुपचक्रमे। अस्ति समुपेक्षितकैलासनिलयमहाकालकृतशाश्वतिकनिवासोपलब्धपुण्यतीर्थतार्कतिविराजितपवित्रालोका नीलमरकतस्फटिकशिलाखचितशातकुम्भखर्जूरकर्बुरचाकचक्यचटूल्लोलपरःशताभ्रंलिहहर्म्य—मालाविच्छायीकृतदिविष्ठामरावती वाणिज्यसंपत्तिसमृद्धविपणिसहस्रन्यस्तविद्रुमशङ्खमौक्तिकदामतपनीयरजतपद्म—रागहीरकनीलमणिवैदूर्यादिबहुविधरत्नमयाङ्गभूषणकदम्बकविलोकनमात्रमिथ्यावितर्कितवसुंधरारत्नाकरकुक्षिशून्योभावा दुरधिगमागमशास्त्रार्थविवेचनातत्परविद्वत्कुलसंकुलसंख्यातीतविद्यामन्दिराधिगतबहुमाना लोकंपृणासरसीरुहपरिमलवाहिशिप्रासरोवरोत्यतरङ्गिणीसमीरणापनीयमानप्रणयिमिथुनोद्दामानङ्गकेलिजनितपरिश्रान्तिः शश्वच्छान्तिमयीव मन्मथयुद्धनिरतकामिद्वन्द्वकेशग्रहवर्जं कलहजकेशग्रहाविज्ञसदाचार-

भूषणभूषितनिवासिलोका सुनीतिरिव राजन्वद्राज्यरञ्जितप्रजासमूहा महापुर्युज्जयिनी नाम यत्र प्राक्तनकाले बभूव विश्रुतपुण्यकीर्तिः सार्वभौम आदित्यसेनो नाम प्रतापवान् यस्य महानुभावशालिनो नानाजनपदागतानुजीविसामन्तनृपनिवहमौलिमणिकिरणारुणितचरणयुगलस्य नितान्तप्रज्वलितेन प्रतापानलेन तिग्मांशुरपि मन्दीभूतप्रताप इव ददृशेऽमित्राणां च हृदयानि तीव्रहृच्छूलाभिभूतानीव भृशं चकम्पिरे यदीयेन च तुषाराधिकशुभ्रेण विततातपत्रेण मुषितप्रसन्ननीलिम विहायोऽपि किल धवलीबभूव। अथ जातु पौरजानपदकार्यावेक्षणार्थं सर्वास्थानगते तस्मिंस्तपनतेजसि चक्रवर्तिनि कश्चिन्महाधनः सत्कुलोत्पन्नो नगरोपकण्ठवास्तव्यो गुणवर्माभिधो द्विजातिः समस्तकन्यालालामभूतां प्रत्यग्रयौवनोद्यानप्ररूढहृदयङ्गमतनूलतामात्मसंभवां नाम्ना तेजस्वतीं तेजस्वतीमाकृतिसुषमां जुषमाणां समादाय तमादित्यसेनं राजाधिराजं समुपेत्य बद्धाञ्जलिविहिताभिवादनः सन् महाराजाधिराज शुभभाग्याभ्युदयप्रसादिते मामकीने कुले संजातं त्रैलोक्यदुर्लभं कन्यारत्नमभिनवतारुण्यविकस्वरं भवद्धस्ताम्भोजे सस्नेहमुपहर्तुमानीतवानस्मि तदेनां मदीयनन्दिनीं त्वदीयनयनानन्दिनीं सर्वेषां महार्हाणां रत्नानां विभुस्त्वं गृहाण यथेदृशी द्युवधूसमकान्तिर्लोकोत्तरवरवर्णिनी विना त्वामन्यत्र समर्पयितुं न खलु शक्यते कुत ईदृग्रूपं योपिदन्तरं पुनः संभवितुमर्हतीति निगद्य ससंतोषं तां तस्मै दर्शयाम्बभूव। एवं जनके-

नोपायनीकृतां भूतलेऽप्सरायमाणां सहजदेहद्युतिदीपितास्थानान्तरालां मनोहरसुरतदीपिकामिव तेजस्वतीं तां पुरतः साक्षात् कृत्वा सर्वाकाराभिरुचिरतदीयवपुर्द्युम्नसमालिङ्गितो द्रवीभूतहृदय इव सपदि प्रबुद्धमनसिशयपौष्पबाणशरव्यभूतः स सार्वभौम आदित्यसेनोऽतृप्तदृष्टिसुधाधारां रागलज्जान्तरालवर्तिनीं सुतनुं समुपजोषमङ्गीकृत्य कतिपयैर्दिवसैस्तामात्मानुरूपां महिषीपदवीमारोप्य सुविहितकौतुकमङ्गलपूर्वकमुपयेमे ततःभृति रोहिणीसंगतोऽमृतदीधितिरिव तेजस्वतीसंगमरोमाञ्चितवर्ष्मा स आदित्यसेनस्तदधरमधुपानपरिरम्भणतत्परत्वात् सर्वथा विस्मृताहोरात्रतारतम्यः समुज्झित-राज्यकार्योऽनाकर्णितविषण्ण-प्रजागणाक्रन्दनस्तृणीकृतमौलमन्त्रिवर्गहितोपदेशः सन् बहुतिथकालाध्युषितादपि शुद्धान्तात् कर्हिचिदपि बहिर्न निर्जगाम। ततोऽल्पीयसि काले व्यतिवाहिते प्रियतमायां तेजस्वत्यां रागरज्जुसंदानितमनसस्तस्यादित्यसेनस्य लोकलोचनकृष्णसारवागुरा प्रसूसमानकान्तिशोभिता कन्यका समुत्पेदे तत्समकालं च मनसि विजिगीषापि तथा पूर्वा तस्य हृदि संप्रमोदमुत्तरा तु भुजयोर्वीर्यं पृथग्जनयामास। अत्रान्तरेऽसौ प्रबलबलमदोन्मत्तो दुरात्मा तीव्रावेगकुसुमायुधशिलीमुखविषमोहितत्वान्निःसीमस्त्रीसुरतव्यसनाभिनिवेशनिश्चेता आदित्यसेनो राज्यभारोद्वहनमपि कात्स्न्र्येन विस्मृत्य नक्तंदिवं नवपरिणयया भार्यया रंरम्यमाण आस्ते तदहं लब्धावकाशो मदनक्रीडानिषेवणप्रसक्तिनिष्प्रभीभूतप्रतापानलस्य नृपकीटस्यास्य दुर्विषहाद् वशा-

दात्मानं ध्रुवं विमुच्य चिराभिलषितस्वातन्त्र्यपीयूषरसं यथातृप्ति पुरा समुपभुञ्ज इति मनसा कृत्वा दुश्शासनप्रकृतिप्रकोपं प्रचुचोदयिषुमभिषेणयन्तमभिमानदर्पितमेकतमं सामन्तं परिज्ञाय सहस्रचारचक्षुः सार्वभौम आदित्यसेनः सुखसुप्तप्रबुद्ध इव जिगीषाद्विगुणीकृतोत्साहशक्तिपुनःसंधुक्षिततपनप्रतापज्वलनो भूत्वा तमनुजीविनं दमयितुं विजयाधिदेवतामिव मदोत्कटमतङ्गजपृष्ठाध्यारोपितां सहचरीं महिषीं तेजस्वतीं पुरस्कृत्य सन्नाहसज्जितचतुरङ्गाविकलाङ्गवाहिनीसमुत्थापितनिबिडधूलिपटलविवर्णीकृतसहस्रांशुबिम्बोऽतिभृशबधिरीकृत-समस्तदिङ्मुखैर्जयमङ्गलकोलाहलैरभिष्टूयमानः स्वयं वाताश्वमारुह्य दण्डयात्रां चकार। ततः कियद्दूरं गत्वानुच्चावचे भूतले स क्ष्माभृदधिराज आदित्यसेनः सहजश्रीवृक्षलाञ्छितभालवक्षःस्थलं सजीवाचलसंकाशप्रांशुकायमाप्रोथोन्नमितपूर्वचरणाभ्यां वायुवर्त्मनि वायुवेगस्य पतत्रिराजवैनतेयस्येवात्मनो जवनगतिं ह्रेषितेन समं दर्शयन्तमेषा मही समीरणातिगस्य मे वल्गिताय किंस्विदलमिति संदिग्धमतिमिव दृश्यमानं निर्मलतुहिनसवर्णं वस्तुतो मनोजवमात्मीयं हयोत्तममौपवाह्यारूढाया देव्यास्तेजस्वत्याः सकौतुकं पश्यन्त्याः पार्ष्णिघातेन प्रेरयाञ्चक्रे तस्मिंश्चैव निमेषे तत्पार्ष्णिप्रहारमन्युद्विगुणितवेगः सोऽपि सप्तिः कठिनलोहतीक्ष्णाग्रैः शफैः क्षितितलमनपराधमपि निर्दयं निचखन्यमानोऽन्तरीक्षमुत्पतन्निव पृषदश्वातिशायिना रंहसात्यद्भुतेन मंक्षु वल्गज्जनलोचनगोचरात् कुत्राप्यदर्शनं ययौ।

इत्थंकारं वाताश्वेन सहसापहृते नृपतौ तथाकाण्डकुलिशनिर्घात-प्रतीकाशेनाकस्मिकेन व्यतिकरेण मुषितचेतसि मन्त्रिवर्गवाहिनी-पतिप्रमुखे सैन्यलोकेऽतर्कितोपनतविपद्विषण्णे जवनाश्वीयानि तेनैव तुरंगमेण गतां ककुभमुद्दिश्य तरसा सर्वेण तूर्णमनुद्रुद्रुवुस्तथापि दृष्टनष्टामिवापदेवतां क्वाप्यन्तर्हितं तं वाजिहृतकं नासेदुस्ततो मोघीभूतनृपपरिमार्गणोद्यमेषु तेष्वश्वीयेष्वधोमुखीभूय प्रतिनिवृ-त्तेष्वशुभशङ्किताः सेनानीसमन्विता अमात्या अचिंतितभर्तृ-विश्लेषदुःखितामनारतं शोकावेगाद्रोरुद्यमानां महिषीमग्रे कृत्वा वाहिन्या साकमुज्जयिनीं सखेदं प्रतिजग्मुः। अथ तेन सदागति-गतिना शुभ्रवीतिना कालेनाल्पीयसा नीरन्ध्रपर्णराशिप्रच्छादित-तुंगभूरुहपंक्तिसहस्रसंबाधं प्रविरलमनुष्यसंचारं भयानकहिंसारुनि-कुरुम्बसमाकुलं विन्ध्यकान्तारगहनं विस्मयोद्भ्रान्तमना अपि पतनभयादश्वपृष्ठगाढतरासक्ताष्टांगोऽसौ वसुधाधिपोऽपि तपस्वी प्राप ततश्च केनापि कारणेन सपदि मनोजवां गतिं मन्दीकृत्य तत्रैव तस्मिन् वाजिनि तिष्ठति सोच्छ्वासमवरुह्य हयलक्षण-शास्त्रवित् स आदित्यसेनस्तस्य सैन्धवस्य मूर्धानं प्रीतिपूर्वं स्पर्शं स्पर्शं भोस्तुरगोत्तम पूर्वस्मिञ्जनुषि दिविषद् बभूविथ त्वमिह जन्मनि तु शापभ्रष्टः सप्तिभावं ग्राहितोऽसि कथमिव दैवत-जातीयो युष्मादृशः स्वामिद्रोहं मनसापि कर्तुं शक्नोति तत् त्वं शरणं मामशरणं शुभंयुभिः पथिभिः पुनरुज्जयिनीं प्रापयेति तं ययाचे। आकर्ण्य तत्प्रार्थनावाक्यं जातिस्मरो भूत्वा पश्चात्ताप-

परितप्तः स घोटकसत्तमो मन्दशिरःकम्पेन तत् प्रतिपद्य तस्मिन् नृपे स्वपृष्ठं पुनरध्यारूढे ययागतं योजनशतविप्रकृष्टमन्तरमव्व-परिश्रमापनुदशीतलवारिबहुलसरोवरसामिप्यवर्तिना शुभेन पथा समतिक्रम्य झंझावातातिगेन तद्रंहसा तिरस्कृतानात्मनः सप्ताश्वा-नवलोक्य संजातापत्रप इव सप्ताश्वेऽरुणसारथावस्तमिते ततः प्रदोषे राजधानीं समासाद्यापि सुदृढार्गलितद्वाराणि प्राकारगो-पुराणि वीक्ष्य चैकरात्रनिवासार्थं पर्याणोपविष्टं राजानं नगरीं समया कृतस्थितिं मठायतनं सवितर्कमुवाह। तं मठालयं क्षपा-क्षेपणक्षमं मत्वा स महीभुगधीश्वरो यावत् तत्र प्रवेष्टुं प्रचक्रमे तावदभ्यन्तराद् युगपन्निर्गता दुर्वोधवेदाध्ययनजडीभूतविवेकाः पंडितंमन्याः श्रोत्रिया दीर्घाध्वक्लेशलिप्तलूसरविग्रहं परिश्रमातुरं प्रतिश्रयार्थिनं सान्द्रपांशुपुञ्जचोरितसहजबलिमहयारूढमादित्य-सेनं सशंकं दृष्ट्वा कोऽप्येष रात्रिचरो राक्षस उताहोस्वित् पश्यतोहरः स्यादिति मत्वा भो भो त्वया न प्रवेष्टव्यं न प्रवेष्टव्यमिति सावलेपमुच्चैस्तरामाचुक्रुशुः। तस्मिन्नेव मुहूर्ते श्रवणकटुकलकल-शब्दसहसाविबोधितः साङ्गवेदप्रमुखसकलशास्त्राकूपारनिष्णात-विपश्चित्कुलालंकारचूडामणिरपि दुश्चरतपश्चर्याप्रीणितहव्यवाह-नोपलब्धदिव्य-कौक्षेयकसमधिकोपबृंहिता-कुतोभय-सहजभुजवीर्य-शाली सौजन्यार्जवमयत्वाच्छरणार्थिने दीनलोकेऽक्रूरोऽपि पापलोके क्रूरो गुणवतां पुरोगो विदूषकनामा श्रोत्रियग्राग्रहरः क्षिप्रं निर्गत्य तैर्ब्रह्मबन्धुभिरपमानितं द्वारि स्थितं सान्द्ररेणुरुपितमपि सौम्या-

नार्थमेव महिपीमन्त्रिसुहृद्भी राजकुलनिवासिभिः प्रवर्तिते महोत्सवे कृतज्ञश्चक्रवर्ती स आदित्यसेनो विदूषकप्रभृतींस्तान् सर्वान् मठायतनवास्तव्याञ्झटिति समाहूय सर्वास्थानमण्डपे कृतोपस्थितिषु तेषु श्रोत्रियेषु सर्वेषु चान्येषु साधुवादपुरस्सरं सकौतुकमाकर्णयत्सु यथासंवृत्तं रात्रिवृत्तान्तं कथयित्वा तस्मै सुकृतिने विदूषकाय ग्रामसहस्रमतिसृज्य सामन्तसमानसंमानानुसूचकातपत्रवाहनसमन्वितायां प्रधानराजपुरोहितपदव्यां तमुपकारिणमधिष्ठाप्य च भृशं संपूजयाञ्चकार। एवं निर्व्याजोपकारेण नितान्तसंतुष्टेन क्ष्माभृता कृतज्ञतापूर्वं यद् व्यश्राणि तदग्रहाराणां सहस्रं जलनिधिवद्विशालौदार्यनिधिः पुण्यकर्मा विदूषकः सर्वेभ्यो मठनिलयेभ्यो ब्राह्मणेभ्यो दत्त्वा तेषां साधारणस्वाम्येऽतिष्ठिपत् ततश्चानुजीविसामन्तसमानभावं प्रधानपुरोहितपदं समाश्रित्य भूपतिसेवापरायणस्तमादित्यसेनं चेतसातन्द्रितेन यथाशक्ति सम्यगुपसेवमानः कर्तव्यान् नियोगान् दिवारात्रमन्वस्थात्। एवमविश्रान्तं याति काले संवत्सरेषु बहुषु व्यतीतेषु पूर्वं मेदिनीश्वराल्लब्धं पश्चादुदारधिया राजपुरोधसा विदूषकेन स्वयमात्मसादकृत्वा साधारणस्वापतेयीकृतं समग्रग्रामसहस्रमुपभुञ्जानाः धनाढ्यभूता अपि नितान्तोच्छृङ्खलतृष्णान्धीभूतमानसाः कुक्षिभरयस्ते ब्रह्मबुवा ग्रामसमुदायस्वाम्यं बलात्कारेन जिवृक्षवः समस्ताग्रहारसहस्रमेतन्ममैव भवत्यहमेवास्य स्वामीत्यहमहमिकया ग्रामलुण्ठनेऽनिशमन्योन्यं व्यवदिषत। एवंकारमनारतं कलहायमानांस्तान् ब्रह्म-

कलहप्रियाणां युष्माकं नायको भवत्विति । यथेदानीं युष्मद्धितैषिणा चक्रधरेणोपदिष्टं तथैव ग्रामसहस्रस्वाम्यं परिजिघृक्षुभिर्युष्माभिः क्रियतामिति प्रसंगतस्तत्रगतेन विदूषकेणाप्युक्ते रात्रौ प्रतिभयपितृवनगमनाद्भीतभीता वर्षवरसमनिष्पौरुषास्ते क्षुद्रजन्तवो ब्रह्मवन्धवो युगपन्मतिसाम्यमवलम्ब्येव वयं तमिस्रायां तत्र गन्तुमपि न शक्नुमः किं पुनः शवनासाश्छेत्तुं तद् यः कोऽपि प्रेतभूमितो नासिकात्रयमानयेत् सोऽस्माकमग्रणीस्तस्य वशेऽवश्यं स्थास्याम इति प्रत्यवादिषुः । भो भो भीरवः श्मशानं गत्वानयामि शूलकीलितानां नासिकास्तिस्र इति निगद्य महासत्त्वसंपन्नो विदूषको ध्यानमात्रोपस्थितकृष्णवर्त्मचन्द्रहासद्वितीयः सूचिभेद्यतमोऽवगुण्ठितायां तस्यामेव तमिस्रायामुर्ध्वकेशविकटाकारानेकरात्रिचरवेतालकोलाहलान्वितशवपललभोजन—हृष्टसारमेयवृकगृध्रादिविविधक्रव्यादसंघातनिनादभीषणं चटचटायमानप्रेतकलेवरस्रवद्रुधिरमेदोधारासंततिसमधिकप्रज्वाल्यमानज्वालाजिह्वं शवभक्षणोत्सवप्रमुदितनरीनृत्यमानभीषणकपालमालिभूतनिवहक्रीडोपवनं पितृवनं प्रविश्य तत्र शूलस्थापितांछोणितधारारूषितांस्त्रीन् प्रश्यतोहरानद्राक्षीत् तत्क्षणाच्च तदन्तिकमुपसृत्य यावन्नासिकापरिच्छेदनाय तेजितधारमाग्नेयकरवालमुद्यमे तावच्चिरोत्क्रान्तप्राणा अपि तेऽपदेवताविष्टत्वात् सहसा सुदृढवद्धैर्मुष्टिभिस्तमतिभृशमतीतडन् तथापि विक्रमोर्जितमहासत्त्वोऽशिक्षितभीतिः सोऽपि तांश्चन्द्रहासेनातिवेलं प्रहृत्य तेषां नासाश्छित्त्वा वस्त्राञ्चले-

ऽभान्त्सीत् । ततो द्रुतं प्रत्यागच्छन् स विदूषको विविक्ते श्मशान-कोणे प्रेतदेहस्योपरि कृतोपवेशं मन्त्रजपनतत्परं तापसमेकं यदृच्छया प्रेक्षाञ्चक्रे मुहूर्तान्तरे च तस्य शवस्य मुखात् फूत्कारपुरस्सरं ज्वाला नाभिकुहराच्च सर्षपा एकपदे निर्जग्मुस्तांश्च सर्षपान् सहपँ हस्ते कृत्वा स तापसः करताडनेन समुत्थितस्य करालवेता-लाधिष्ठितस्य शवस्य भुजशिखरार्पितजङ्घाद्वयः सन् कौतूहला-विष्टचेतसि तस्मिन् विदूषके पृष्ठत उपांश्वनुगच्छति कियद्दूरे जराजर्जरितालोकं शून्यदुर्गामन्दिरमासाद्य प्रेतदेहाधिष्ठिताय तस्मै वेतालाय चपेटं दत्त्वा तत्क्षणमुपविष्टस्य तस्य भुजशिरसोऽवत-तार तदनु रुद्राणीमूर्तिसनाथं गर्भमन्दिरं प्रविश्य परमसिद्धिसाध-नैकाग्रमनाः साष्टाङ्गप्रणामस्तुतिपूर्वकं मनीषितवरदां तां शर्वाणीं सुचिरमाराध्य हे देवि त्रिभुवनेश्वरि भक्तवत्सले प्रीयसे चेद् दीर्घकालसमीहितयोगप्रभावातिसर्जनेन भक्तिनम्रमिमं जनमनु-गृहाण न चेत् तर्हीदानीमात्मप्राणोपहारं ते करोमीति तामभ्यर्थ-याञ्चक्रे । एवं याचमानं तं मायायोगिनं मस्करिणं हे पुत्रक मा तावद्, गच्छ चक्रवर्तिन आदित्यसेनस्य तनूद्भवां सुन्दरीमिहानीय तस्याः प्राणान् मे सपद्युपहर तथाकृते ते मनोरथः सम्यक् सेत्स्य-तीति निशितधारनिस्त्रिंशाङ्कितचतुर्भुजा कण्ठीरववाहना सत्त्वो-पहारसततपुष्टविकटविग्रहा चण्डिका सुव्यक्तं बभाषे । आकर्ण्य तयोः समालापमशेषं चिन्ताकुले स्वामिकल्याणैकतानमनसि तद्-दुहितृप्राणपरित्राणकृतनिश्चये पुरोधसि विदूषके प्रच्छन्नं तत्र

स्थितेऽस्मौ मृडानीसमादेशपुलकितान्तरङ्गस्तापसहतकः पुनरपि वेतालाधिरूढः सन् वायुवेगेन राजभवनं गत्वा तस्मादतिभयमृतकल्पां राजपुत्रीं समानीय तत्रैव दुर्गायतने तां निषूदयितुं प्रववृते। तस्मिन्नेव निमेषे सहसा प्रादुर्भूत उद्दामामर्षानलप्रदीप्ताननः स महावीरो विदूषकोऽतितीक्ष्णधाराविद्योतितदिक्चक्रेण चन्द्रहासधवलेन चन्द्रहासेन महापापस्य नरपशोस्तापसस्य दुराशयपरिपूर्णं मूर्धानं परिच्छिद्य मनुष्यरुधिरप्रियां तामपि कात्यायनीं जगदीश्वरीं शिरोविहीनां कृत्वा च त्रासविनष्टसंज्ञां तामादित्यसेनसुतां स्वभुजान्तराले धृत्वा सिद्धसर्षपपाणिश्चपेटिकां दत्त्वा वेतालस्कन्धमधिरुह्य व्योममार्गेण क्षणान्तरेण राजकन्यकान्तःपुरमासाद्य तत्र शय्यायां तां पुनर्लब्धचेतनामपि चकितचकितां कण्ठलग्नां निदधौ। अत्रान्तरेऽशरीरिणी भारती विहायसि समुदभूत्—हे लोकोत्तराप्रतिमपराक्रमशालिन् विदूषक मासावसाने तत्रैव दुर्गामन्दिरे त्वया पुर्ननिश्चितमुपस्थातव्यं तत्र तव मनोनुकूलं प्रियं समुत्पत्स्यत इति। आकर्ण्य तां दिव्यसरस्वतीं तत्र निधाय राजतनयां निर्गन्तुमुद्यते तस्मिञ्जीवितत्रातरि विदूषके भयकम्पितवक्षःस्थली सा राजीवलोचना सार्वभौमदेहजा प्राणद विभेमितमां मां विहाय मा गा इति भूयोऽपि तत्कण्ठावलम्बितबाहुलता सती तं न पर्यत्याक्षीत्। सोऽपि तस्याः प्रार्थनानुरोधात् तत्र तस्थिवान् परिश्रमजनितया गाढसुषुप्सया परिजरीगृह्यमाणो न्यद्रासीत् ततश्च प्रातस्तरां सान्द्रप्रसुप्तं तं पुरोधसं प्रत्यक्षीकृत्य कंचुकिप्रमुखा

अन्तर्वंशिका मङ्क्षु चक्रवर्तिनं व्यजिज्ञपन् । तेषां विज्ञप्तिं कर्णे कृत्वा युगपत्संजातादभ्रकोपः स नरेश्वर आदित्यसेनस्तैस्तं पुरोहितं विदूषकं तूर्णमानाय्य कन्यकाप्रासादे किं कृतं त्वयेति सरोषं तमन्वयुक्त तेन च राज्ञा पृष्टः स परहितनिरतो महाशयो राजन् यदि श्रवणकौतूहल्यं तर्हि त्वदीयामात्मजां नैशवृत्तान्तं प्रश्नयेति व्याहृत्य ततो निजदुहितृनिवेदितोदन्तं विशृङ्खलविस्मय-प्रहर्षव्याकोशलोचनं नृपमादाय तदेव चण्डिकामन्दिरं गत्वा च निकृत्तशिरसं तं पापयोगिनं मस्तकविवर्जितां दुर्गामूर्तिं स्ववस्त्राञ्चलवद्धं तस्करनासिकात्रयं चातिविस्मितचेतसे तस्मै प्रादीदृशत् । अथ प्रमोदातिभूमिं गतः कृतज्ञो राजाधिराज आदित्यसेनो भो विदूषक मामकासुसमात्मजाप्राणद त्वदुपकृत्या पुनरनुगृहीतोऽहं किं ते प्रियमुपहरामीति प्रीतिपूर्वं सविमर्शं प्रोच्यैतत्सदृशो महानुभावसौहार्दशाली जामाता क्वापि संभवितुं नार्हतीति मनसि विधाय तस्मै सुकृतिने महावीराय सततस्नेहास्पदीभूतां स्वीयां दुहितरमदात् । सोऽपि सौभाग्यवान् विदूषकः सार्वभौमनृपानुरूप-भूरिवैवाहिकप्राभृतसंभारसंभृतयथाविधिसंवृत्त-पाणिपीडनमहामह-पुरस्सरं प्रत्यग्रविकसितहृद्ययौवनोपवनपुष्पमञ्जरीं निर्विकारप्रणय-बहुमानैकपात्रीभूतप्राणत्रातृकरसंपर्कामृतरससामिनिमीलितेन्दीवर-लोचनामादित्यसेनस्य चक्रवर्तिनः सर्वाङ्गसुन्दरीं श्रीसंज्ञां लक्ष्मी-वसतिमिव परिपूर्णकान्तिमद्वपुषमौरसीमग्निसाक्षिकं परिणीय नृपभवने वसति कुर्वन् हृदयंगमनवनवप्रेमरसनिस्यन्दिन्या तया

नवोढया यथासुखं रंरम्यमाण आसिष्ट। एवं परस्परसंगमसुखितेषु प्रेमपीयूषप्रवाहनिर्भरेषु दिवसेषु क्षणेष्विव गच्छत्सु जातु ज्योत्स्नाद्योतितायां ज्यौत्स्न्यां कृतान्तप्रेरितेव सा श्रीः प्राणेश्वरं भर्तारं सवितर्कमुवाच हे प्राणाधिकप्रिय दुर्गामन्दिरं मासपर्यवसाने त्वयागन्तव्यमिति तदानींतनीमाकाशवाणीं किमनुस्मरसि यया हि मासोऽद्य पर्यवसितस्तथा गन्तव्यं तत्रेति। अयि प्रियतमे सुष्ठु स्मरसि मया तु तत् सर्वं विस्मृतं हे चकितहरिणाक्षि यावदहं तत्रैव गत्वा तूर्णमागच्छामि तावत् त्वमपि निद्रासौख्यमनुभवेति समुदीर्य तां कपोलभित्तौ परिचुम्ब्य ततस्तस्यां निद्रितायां राजकुलवासगृहान्निर्गतश्चिन्तितमात्रोपस्थितागेयनिस्त्रिंशद्वितीयः सन् कात्यायनीमन्दिरं प्राप्य भो भोः कोऽत्र शूयतां विदूषकोऽहमायातोऽस्मीत्युच्चैर्वारंवारं समुदैरित् तदनु प्रवेष्टव्यमित्यभ्यन्तरादुत्थितं वाक्यं श्रुत्वा प्रविश्य च तत्र सुमण्डितदिव्यशयनीये समासीनां तपोभङ्गकुपितविरूपाक्षतृतीयनेत्राग्निभस्मसात्कृतानङ्गजीवातुमिव शृङ्गाररसोद्दीपिकां कान्तिरोचिष्णुनिजवपुर्द्युतिव्यर्थीकृतरत्नप्रदीपां विजिगीषुमोनकेतनमूर्धाभिषेकसुवर्णकलशायमानपीवरस्तनयुगलातिशय-मनोरमामतिपेशलाननेन्दु--निर्जितेन्दुबिम्बां दिव्यकन्यामद्राक्षीद् दृष्ट्वा च सद्यःप्रबुद्धमनसिशयप्रेरितविशिखमूर्च्छित इव सविस्मयं किमेतदिति तामप्राक्षीत्। इति पृष्टा सा दिव्यसुन्दरी प्रीतिपूर्वं तं विदूषकं स्वागतीकृत्य सुखोपविष्टं तमेवमभ्यभाषिष्ट लोकोत्तरवीर शूयतामहं त्वद्रूपसत्त्ववर्जिता

महाकुलसंभवा भद्रा नाम विद्याधरी कामरूपकामचरत्वान्मासात् पूर्वमत्र विक्रान्तं त्वां यदृच्छयाद्राक्षं ततो राजपत्नीं श्रियमादाय राजभवने कृतप्रवेशं त्वां परिज्ञाय तदानीमशरीरिणीं तां सरस्वतीं नभस्यकार्षं तदेहि त्वयि गाढतरानुरक्ताया अक्षतयोनेर्मम वपुः साकल्येन स्वीकुरुष्वेति । सोऽपि तदीयातिमानुपरूपसंपद्गुणाकृष्टमानसोऽनतिक्रमणीयमन्मथाज्ञावशंवदो गान्धर्वेण परिणयविधिना तां भार्यां कृत्वा तया समं दिव्यसंभोगाननिर्वचनीयरसान् यथारुचि समुपभुंजानः परमसुरतनिर्वृतिषु मर्त्यलोकदुर्लभासु दिवसानि बहुनि मुहूर्तमिव विद्याधरीप्रभावतिरस्कृतराजसुतास्मरणः सन् व्यत्यवीवहत् । अत्रान्तरे दीर्घयामायितत्रियामात्यये दुस्स्वप्नोत्थापिता नववधूः श्रीः प्राणनाथमनागतं विदित्वा विरहनिर्वेदविक्लवा तदानींतनाकाशवाणीस्मारणलाघवजनितपश्चात्तापपरितप्तमतिरात्मनोऽपराधं निन्दन्तो तस्यानिष्टां विपदमाशङ्कमाना ससम्भ्रमं महादेव्यै मात्रे भर्तृतिरोधानवृत्तान्तं यथासंवृत्तं न्यवीविदत चिन्तापूर्वं च तच्छ्रुत्वा वत्सावत्सलया जनन्या तत्क्षणाद् बोधिततद्वृत्तान्तव्याकुलीभूतमनाः क्षितिभृदधिराज आदित्यसेनो जामातृस्नेहान्मङ्क्षूत्थायासनात् पुराध्यक्षराजयुध्वनिवहपरिवृतः स्वयं बहिर्गत्वा श्मशाननिकटवर्तिरुद्राणीमन्दिरादारभ्य सर्वत्र सर्वतश्च प्रयत्नतो विदूपकं पर्यन्विष्यापि विद्याधरीविद्याप्रयोगतिरोधापितत्वात् तस्य छायामप्यलब्ध्वा सविषादं राजभवनं प्रतिन्यवर्तिष्ट । तत आत्मजीविताधिकप्रियजीवितेश्वरादर्शनज-

परमपराधिपराभूतायां निराहारमूर्किमसमाश्रितायां नृपात्मजायां जातवेदसि स्वप्राणाहुतिं कर्तुकामायां कश्चिदागन्तुकस्त्रिकालज्ञो मुनिः पित्रोः समक्षं राजपुत्रि मा खलु विषदो दिव्यसंभोगसुखितोऽक्षतदेहस्त्वदीयप्राणदायी भर्ता कालं कियन्तं क्षपयित्वा पूर्वाधिकानुभावविभवसंपन्नो युष्यान् सर्वान् सुतरामानन्दयितुं प्रत्यागमिष्यतीति न्यगादीच्छ्रुत्वा च प्रत्याशादायि तद्वाक्यं सा श्रीः पतिवियोगासहापि संप्रहृष्टा सती सुकुमारपुष्पवज्जीवितधारणाय मनोऽकृत। अथातिहृद्यसहवाससंप्रमोदेषु काले याति कदाचिद् योगेश्वरी नाम विद्याधरयोषिदकस्मादाविर्भूय दयितेन विदूषकेण सार्धं रममाणां सहचरीं भद्रां सचिन्तमवादीदयि सखि मर्त्यसंगतां त्वां ज्ञात्वा कुपितास्ते विद्याधरभूपाः शापदण्डेन त्वां निजिघृक्षन्ति तदितः क्षिप्रं विद्याधरलोकाप्राप्यं सिद्धलोकजुष्टमुदयशिखरिणं याहि तत्र त्वदर्थे मया लब्धं शरणं तत्रानुपदमागमिष्यता कामिनानेन पुनरपि संगमिष्यस इति। असहनीयशापनिपातभयाद् गत्यन्तराभावाच्च सौहार्दशंसि तद्वचोऽङ्गीकृत्य साश्रुवदना सा भद्रा प्रेयसे विदूषकाय निजांगुलीयकं सर्वविघ्नघ्नं समर्प्य दृढपरिरम्भणपुरस्सरं तमापृच्छ्य पौरुहूतीमुद्दिश्य ककुभं खमुत्पपात। तस्यां सहसा दृग्गोचराददर्शनं यातायामसौ कामुकः स्निग्धविद्याधरीविश्लेषसंतापप्रमथितान्तरात्मा क्षणमुन्मदिष्णुरिव क्षणं विनष्टचेतन इव हा भद्रे हा शश्वद्धृदिस्थे क्वासीति विलपन् तदंगुलीयकं परिचुम्बन् संस्मृतविद्याधरीवचनोऽपि विस्मृतराज-

पुत्रीको भूत्वा सर्वाशानिधिं लोकलोचनोदयभूधरं सहस्रसहस्रयोजन-विप्रकृष्टमभिमुखमैन्द्रदिक्प्रयाणे पदं चक्रे ततो भूरितिथे काले-ऽतिक्रान्ते पौण्ड्रवर्धनसंज्ञकं पुण्ड्रजनपदप्रमुखपुटभेदनं समासाद्य दीर्घीभूताध्वपरिश्रमातुरः कस्याश्चन स्थविराया द्विजगृहिण्या वसतिं प्रविश्य हे अम्ब विप्रपथिकोऽस्मि देहि मे केवलमेकरात्र-प्रतिश्रयमिति तामभिययाचे । दीर्घप्रयाणमार्गसंचितपांशुमलिनी-कृतकलेवरमपि कालमेघतिरस्कृतालोकं सहस्रदीधितिमिवाभिजना-नुसूचकसौम्याकृतिदर्शितसहजतेजसं तमध्वनीनं प्राज्यातिथि-सत्क्रियाविधिना देहमालिन्यक्षुत्पिपासानुदस्नानभक्ष्यपेयसमुपेतेन संपूज्य सा वयोवृद्धा ब्राह्मणी विधवा सायं सुखोपविष्टं तं सदीर्घं-निःश्वासमभिवभाषेऽयि पुत्रक यथा मदीयजीवितं पर्यवसितप्राय-मिदानीं संवृत्तं तथाभिमतेन त्वया स्वीक्रियतामिदं सकलं गृहादिक-मस्मत्स्वापतेयमिति तन्निशम्य विस्मयकोटिमारूढेन तेन कस्माद-कस्मादित्थं वदसीति पृष्टे च सा प्रत्युवाद पुरीहास्ति पुण्ड्रदेशाधि-नाथस्य देवसेनाभिधस्य निःशेषभूतलयोषिल्ललामभूतेव लोकाधिक-कान्तिद्युतितसर्वाङ्गाभिरामा मया दुःखाल्लब्धैषेति दुःखलब्धिकेति पित्रा कृतसंज्ञा तनूजा हा शान्तं पापं यो यस्तया कृतविवाहः स स ध्रुवं दिष्टान्तं गच्छति क्रमानुसारेण नृपाज्ञया सैन्यैः प्रतिरात्रम-पहृतानि पुरुषशतानि भयानके मृत्युमुखेऽपतन्नद्य तु प्रतिकूलदैव-दुर्विपाकान्मन्दभागाया हताशाया मेऽङ्गजस्य क्रमे समायातेऽधुनैव वराकोऽयं तत्र राजकुले नीयतेऽहहा शान्तं पापं ध्रुवं राजसुताया

उपकण्ठं नीयमानस्य पापायाः ममैकपुत्रस्य मरणं भविष्यति तस्मात् कारणाद् दग्धविधिदग्धापि नाहं पुत्रमाय ते वेरमान्वितं सर्वं रिक्थं स्वयं दत्त्वा प्रभाते चितामारोक्ष्यामीति। एवं सविषाद-मुक्त्वा समीपस्थमात्मजं क्रोडीकृत्य स्थविरापि वात्सल्योद्रेकक्ष-रत्स्तन्याद्रद्रिभुजान्तराला तं गात्रेषु समस्तेषु स्पर्शं स्पर्शमतिस्ने-हाच्छिरसि सस्पृहमुपजिघ्रन्ती निःशब्दं रुरोद तां च दृष्ट्वा निर्वेद-निराशामेकपुत्रातिवत्सलां लोकोत्तमवीर्यवानकुनोभयः परदुःख-दुःखितो दीनबन्धुर्विदूषको हे मातर् जीवतु शरदां शतं ते पुत्ररत्नं संप्रति त्वत्पुत्रस्थानेऽहमेव तत्र गच्छामि ततो न कर्हिचिदपि ज्ञात-त्रासमरिष्टशरीरमुद्घाटितराजतनयारहस्यं पुनरागतं मां द्रक्ष्य-सीति सुव्यक्तं व्याहृत्य तया सपुत्रया सनिर्बन्धं निषिद्धोऽपि तत्क्षणागतैरायुधजीविभिः सार्धं यमसदनसंकाशं पौण्ड्रजानपदसमु-दायभयनिवासं नृपात्मजाशय्यागृहमयासीन्नचिराच्च तत्र प्रविश्य परःशतपुरुषव्यूढपूर्वापि केनापि पुरुषेणासंस्पृष्टदेहां भुवि परिभ्रष्टां सैंहिकग्रस्तमूर्तेः कुमुदबान्धवस्य ज्योत्स्नामिवातनुवपुश्चन्द्रिका-द्योतितशय्यागारामपि वृषध्वजतार्तीयीकलोचनवह्निप्लुष्टपतिवि-नाशाभिशोकमूर्दितां मन्मथभार्यामिव दुर्विगाहचिन्ताविषादाकू-पारनिमग्नां नृपतनुसंभवां दुःखलब्धिकां दृष्ट्वा तद्रहस्यपरिज्ञान-कौतूहलकीलितमना ध्यानसमकालोपस्थिताग्नेयासिहस्तः सन् द्वार-देशे तूष्णीं तस्थौ। ततोऽर्धरात्रे संजाते दृढदत्तार्गलं द्वारमुद्घाट्य निजग्रीवाजिघृक्षा प्रवेशितं गजयूथपहस्ताकारं विकटासिधेनुकाव-

दतितीक्ष्णनखरभीषणं वलीमुखभुजवद्रोमशं बाहुं रम्भास्तम्भसि-
वैकेनैव प्रहारेण करवालेनाब्जसोत्कृत्य स महावीरो विद्युत्प्रभो
भुजच्छेदकृतार्तस्वरं तथापि निमेषान्तरोत्थितरोषानलप्रदीप्तोल्मु-
कसंनिभाक्षं महाद्रिशृङ्गप्रांशुकायमूर्ध्वकेशविततास्यप्रतिभयरूपं
कृतान्तकिंकरमिवाभिपतन्तं निशाचरं तेनैव दिव्यकरवालेनोत्कृत्यो-
त्कृत्य यमधानीमजीगमत् । अथ प्रभातायां रजन्यां सूर्योदये-
ऽमात्यसेनानीप्रभृतिभिर्मन्त्रामात्यैः समं द्रुतमागत्य स्वदुहितृवसतौ

राजानुमतिर्विद्याधरीभद्रासमागमोन्मुखः पूर्वाशाभिमुखं पुनः प्रतस्थे । ततो द्रुततरगतिरूर्जस्वलवीर्यवान् विदूषकः पूर्वार्णववेला-निकटवर्तिनीं महापुरीं ताम्रलिप्तिकां प्राप्य वाणिज्यव्यवहारार्थं पारावारपारं यियासुना स्कन्ददासनाम्ना सांयात्रिकेण दत्तसहया-नानुज्ञस्तस्य प्रचुरभाण्डभारसंचितां नावमधिरुह्यादृष्टपारमण्डला-काराकूपारतितीर्षया प्रबलविद्याधरीप्रेमपाशाचरीकृष्यमाणान्त-रात्मा सोत्कण्ठं प्रस्थानं चक्रे । अथ महाकल्लोलमालासमुल्लसितं सागरमध्यभागमासाद्य सहसा बृहच्छिलोच्चयसंलग्नायामिव स्तिमितगत्यां तस्यां नावि निश्चलीभूतायां वणिक्स्वभावस्याल्प-सत्त्वमयत्वादतित्रासवैक्लव्यातुरः स स्कन्ददासोऽदभ्राभिराहुतिभिः समुद्राधिदेवं पाशपाणिं वरुणमारराध तथापि प्रयत्नतो विहित आराधने मोघीभूते सर्वविनाशभीरुरसौ पोतवणिक् शपथपूर्वं सर्वेषु चिन्ताभयाकुलेषु यात्रिकेष्वाकर्णयत्सु तारं निजगाद भो भो युष्मासु यः कोऽपि केनापि प्रतिरुद्धां नावं मदीयां विमोचयति तस्मै जीवितप्रदायिने महोपकारिणेऽत्मारोपितस्वापतेयार्धं दुहितरं चोपहरामीति । श्रुत्वापि महाभोगप्रतिश्रुतिगर्भं तद्वाक्यं क्लीबसमेषु तेषु मूकीभूतेषु सततार्तसमुद्धरणसाहसप्रियो रज्जुदृढबद्धकक्षो विदूषकः स्मितपूर्वं बभाण भोः स्कन्ददास मध्येसमुद्रं विगाह्य युगपन्निराकृतसंरोधकमिदं तेऽर्णवयानं प्रचालयामि तद् विमुक्तायां नौकायामवलम्बनरज्जुभिर्मामुद्धर्तुमर्हसीति तदनन्तरं च तेन प्रहृष्ट-चेतसा सांयात्रिकेण तथेति प्रतिपन्ने नावोऽधस्ताद् विगाह्य

चिन्तितमात्र-सहसोपागत- दिव्य-चन्द्रहासाङ्कित-वामेतरपाणिस्तत्र निद्राणं क्रोशायताभोगं तर्कातीतसागरपर्वतायमानविकटाकृतिं तिमिंगिलगिलं दृष्ट्वा मर्मसु प्रहृत्य चन्द्रहासेन निशातधाराप्रभादूरीकृततमसा तं शतधा निचकर्त। तस्मिन्नेव मुहूर्ते प्रवहणे प्रचलिते महासत्त्वं निखिलयात्रिकप्राणसमुद्धर्तारं तं विदूषकमुन्मग्नमवलोक्य स पोतवणिग् नरपशुः स्कन्ददासः स्वयं प्रतिश्रुतधनलोलुपावशात् तस्यावलम्बनरज्जूः परिच्छिद्यानुकूलवातप्रचोदितेन तेन प्रवहणेन तूर्णमपससार। इत्थंकारं तेन कृतघ्नेन निकृष्टव्यवहारकाष्ठमेन सर्वंकषदंष्ट्रादंतुरे मृत्युमुखे निष्कृपं निपातितोऽप्यबलवदबलधैर्यसागरो विक्रान्तानां प्राग्रहरो विदूषक उत्प्लवमानः कल्लोलमालासंक्षोभिते समुद्रतले दैवादुत्प्लवमानं निषूदितस्य तिमिंगिलाशनस्य महीयांसं खण्डमारुह्य हस्तक्षेपणीभ्यामम्बुराशीन् व्यस्य कृच्छ्राद्विपन्महार्णवं तं महार्णवं चोत्ततार। सोच्छ्वासं पारमासाद्य महायादसांपतिनरणातिप्रयासजपरिश्रममृदितवर्ष्मा स सत्त्ववतां वरो विदूषकश्छायाद्रुममूले विश्रमितुं यावदुपविवेश तावदकस्माद्विहायसः समुत्थिता दिव्यभारती भो महावीर विदूषक प्रीतोऽस्मि स्थिरधृतिनिर्वेस्तव कृत्स्नजगच्चमत्कारिणा पौरुषेण त्वत्कल्याणाभिलाषिणो हुतभुजो मम प्रसादादद्यप्रभृति बुभुक्षापिपासापरिश्रमविनाकृतस्त्वमप्रमेयसौहार्दविक्रमभूषणः सप्ताहेन कार्कोटकनगरीमतिक्रम्य ततः शिप्रमुदयशैलमासाद्य कृतार्थीकृतमनोरथो भविष्यसि तद् वत्स संप्रति पूर्णाशां

पूर्वाशां प्रति प्रतिष्ठस्व सन्तु शुभंकरास्ते पन्थान इति तमभिनन्द । कृपीटयोनिवचनाकर्णनसमकालव्यपेताङ्गग्लानिः प्रमुदितमानसो मंक्षूत्थाय विद्याधरयोपित्पुनःसमागमप्रत्याशायस्कान्ताकृष्यमाणसर्वाङ्गः सन् निरन्तरप्रयाणमार्गे भूयः पदं निचिक्षेप ततो योजनशताध्वानं समुल्लङ्घ्य सप्तमेऽहनि कार्कोटकं नाम राजार्यवर्माधिष्ठितं पत्तनं समासाद्य प्रदोषे भो भोः शृणुत यः कोऽपि मेदिनीभर्तुरार्यवर्मणो लोकोत्तरवरवर्णिनीं तनयां प्रातस्तरामुपयियंसति स नक्तमद्य तद्वासगृहमधिवसत्विति वारंवारं दुन्दुभिध्वनिपुरस्सरं राजभृत्यैर्घण्टापथे साकूतमुच्चार्यमाणां घोषणां निशम्य तत्रायमयं गच्छामीत्युच्चैर्व्याहृत्य तत्रत्यैर्नागरिकैर्हे वैदेशिक कथमिव निर्विचारस्त्वं पतङ्गो ज्वलनमुखमिव नृपसुतावसतिवेश्म प्रवेष्टुमुत्सहसे ये संख्यातिगाः साहसाध्यवसायिनो युवानो विवृतकृतान्तास्यसन्निभे तत्र रात्रौ रात्रौ प्राविक्षंस्ते सर्वे विदारिताङ्गा अपमृत्युमयासिपुस्तद् यदि क्षेममात्मनः समीहसे तत्रगमनसाहसं मा स्म कार्षीरिति सौहार्दान्निवारितोऽपि स्मयमानः प्रीतिपूर्वकमर्पितात्मा राजकिंकरैस्तैर्दर्शितमार्गो राजकुलं प्राविक्षत् । स्वागतं ते वीर मदीयतनूजाशय्यागारेऽद्य विभावरीं कृत्स्नां क्षेमेण यापयसि चेत् तर्हि श्वः पुत्रसमविभूतिसत्क्रियासंमानितेन त्वया दुहितुः करं ग्राहयिष्यामीति संविदं दत्त्वा राज्ञा सुस्वादुभोजनोपेतातिथेयसत्कृतः स साहसिकानामग्रेसरो विदूषको महीक्षित्तनयाशयनगृहं निशि प्रविश्य तत्र राहुग्रसनाद्भुवि परिच्युतां चान्द्रमसीं मूर्तिमिव मनो-

भिरामकान्तिमद्वपुषमपि निर्वेदव्यथातुरमभिशोकमयीमिव निरन्त-
रप्रवहद्वाष्पविन्दुसंततिनिष्पादितकृत्रिममुक्तावलीसनाथ-कुचतटी-
मद्यापि मदर्थेऽपरं जीवितं लोकमिमं नूनमापृच्छेतेति निःशब्दं
क्रन्दन्तीं शय्यागतां तां राजकुमारीमवालोकिष्ट ततो निशीथे
मन्दीभूतत्विषि प्रदीपे कथमपि लब्धनिद्रायां नृपात्मजायां सहसा
प्रादुर्भावितातिभीषणमहाकायं रात्रिचरमभिपत्य शिरोरुहेषु वामेन
हस्तेनातिभृशं गृहीत्वा दक्षिणकरधृतेनातनुद्युतिमुषिततमसा चन्द्र-
हासाधिकशुभ्रेण दिव्यचन्द्रहासेन तं निहन्तुं प्रावर्तिष्ट। तस्मिन्नेव
निमेषे शिखरिशिखराभप्रांशुकलेवरोऽधृष्यभुजबलोत्सिक्तोऽप्यसौ
राक्षसेन्द्रो बलीयसस्तस्य महापराक्रमभीषितः सन् प्रभोऽभयं देहि
मां मा खलु जह्यद्यप्रभृति त्वदाज्ञावशंवदो भूत्वा तत् तन्निर्विका-
रेण निर्ममेण मनसा करिष्यामि यद्यदिच्छसीति साष्टाङ्गप्रणति-
पुरस्सरमवोचत्। इत्येवमभयं याचमानं रात्रिचरं विमुच्य किंनामा
त्वं कस्मादेवं महापातकमत्र प्रतिरात्रमाचरसीति तेन महातेजसा
विदूषकेणानुयुक्तः स रजनिचरेन्द्रो हे सखे मया शाश्वतिकं सख्यं
वधान यमदंष्ट्र इति संज्ञितोऽहं महाश्मशाननिवासिना पार्वती-
जानिन समादिष्टो नपुंसककल्पानां वीर्यरहितानां पुंसां संगमाद्
वीरभोग्यामिमां नृपसुतां निवारयाम्यधुना तु ममाचिन्तितपराज-
यादप्रतिमविक्रमस्य महावीरस्य ते हस्ते गतैषा राजपुत्री तदधुना
साधयामि यदा यदा मां स्मरिष्यसि तदा तदा त्वत्कृतेऽहं त्वामुप-
स्थास्ये सर्वास्ववस्थास्वपीति समयं दत्त्वा तिरोऽधात्। ततः

प्रभाते सकलपौरलोकस्तुताद्भुतबाहुबलः पुण्यकर्मा विदूषकः प्रमुदितेन क्षमाभृता प्राज्यविभवेन समं समर्पितां विषादसागरोत्तीर्णामकाण्डसौभाग्योदयविकस्वरस्मिताननेन्दुं सुचिरमनोपितविवाहपरमनिर्वृतिरोमाञ्चितसर्वाङ्गमनोरमामभुक्तपूर्वपीयूषसंकाशसुरतरसनिर्भरां तां वामलोचनामप्यवामहृदयां कन्यामुपयम्य कंचित् समयं तया नवनवरिरंसया सहवाससौख्यमनुभूय विरहविधुरां साश्रुवदनां तां पुनरागमनप्रतिश्रुतिदानेन कृच्छ्रादामन्त्र्य लोकलोचनोदयमहीध्रोन्मुखः सन् दुरासदपर्वतमालातरङ्गिणीनिवहसंकटं मानुपानतिक्रमणीयमध्वानमग्रे दृष्ट्वा सहायं तं राक्षसेन्द्रमस्मार्षीत् तत्क्षणाच्च सन्निहितं कृताञ्जलिं तं वयस्य विद्याधरयोपिद्भद्रासंगमाय मया सिद्धलोकाध्युषित उदयाद्रिर्यातव्य इत्यभिभाष्य तथेति प्रतिपन्नवाक्यस्य तस्य भुजशिखरमधिरुह्य मनोजवेन तेन वाह्यमानो मनोरथशतेनाप्यगम्यां मनसाप्यप्राप्यां

द्राक्षीत् । अथानल्पकौतुकाकृष्टेन तेन विदूषकेण हे पुण्यशीलाः कुत्र तदुदकं नयथेति सस्मितं पृष्टास्ताः सिद्धयोषितः सौम्य सहस्रदीधितिप्रादुर्भावपावनेऽत्र शिखरिणि विद्याधरेन्द्रतनया भद्रा नाम मनुजसङ्गमकुपितविद्याधरशापभयात् पलायिता प्रवसति तस्याः स्नानार्थमिदं नीरमस्माभिर्नीयत इति प्रत्यवोचंस्ततश्चैकतमा तमभ्यभाषिष्ट सुभग शिरसि मे कलशोऽयं निधीयतामिति । दयिताकुशलप्रवृत्तिशंसिना तेनैव वनचामृतेन संसिक्त इव प्रहृष्टमना विदूषको वारिकुम्भं तस्याः सिद्धाङ्गनाया मूर्ध्नि समारोप्य तत्र कुम्भे प्रत्यभिज्ञानांगुलीयकं निभृतमवक्षिप्य ततः सोत्सुकं दीर्घिकाकूले न्यसदत् । अत्रान्तरे सिद्धेन्द्रभवने ताभिर्युवतिभिर्दीयमानेनाम्भसा स्नान्ती सा विद्याधरी भद्रा कलशादधो निपतितं निजरत्नांगुलीयकं सविस्मयं निरीक्ष्य सोत्कण्ठमयि सख्यः कोऽपि चक्षुष्याकृतिर्युवा किं युष्माकं दृष्टिगोचरे प्रादुर्भूत इत्यप्राक्षीत् । अतनुद्युतिशोभिताकारो मनुष्यः सरोवरतटस्थोऽस्माभिरदर्शि तेनैष सुवर्णकलशः शिरस्युत्क्षिप्त इति ताभिः प्रत्युक्ते प्रियसमागमपुलकितविग्रहा सा पुनस्ता अवादीदहो हन्त मे प्राणनाथः समायातो हन्त जीवितं मे सफलीभूतमिदानीं हे सहचर्यः शीघ्रं तमत्रानयत सततहृदिस्थं मम हृदयवल्लभमिति । तथेति प्रतिपद्य दीर्घकालविरहितप्रियभर्तृ पुनर्दर्शनसंप्रमोदप्रफुल्लतद्वदनाम्भोजावलोकनमात्रसंजातादभ्रस्मितविकसितनयनाः स्पृहणीयौजन्यस्नेहहृदयालवस्ताः सिद्धप्रमदा द्रुतं गत्वा दिव्यवापीमध्याप्लवनिर्मलीकृत-

शुभ्रवपुषं पर्यवसितप्रायभार्याविरहावधिकं प्रणयिनं विदूषकं विद्याधरीसमक्षमानैषुः। आगच्छन् विक्रान्तानां प्राग्रथः स कामी निजागमनवर्त्मार्पितनिश्चलाक्षीं बहुतिथकालविश्लेषपरितापानलसंतप्तदुर्बलाङ्गीं प्रसूनकोमलमनःशोषणोत्कलिकासहस्रकीलितहृदयां सर्वलोकचमत्कारिणः स्वपराक्रमभूरुहस्य चिरात्परिणतफलसमृद्धिमिव दुर्लभमनोरथसिद्धिमिव हृदयप्रमोदिनीं तामारात् सोत्सुकमवालोकिष्ट तत्क्षणं च सापि भद्रा भद्रानना प्राणनाथं त्वरितगतिं दृष्ट्वैव ससम्भ्रममभ्युद्गम्य च हन्त भद्रे सोऽहमायातोऽस्मि ते प्रणयनिर्विघ्नमनोरथशतास्पदीभूत इति समुच्चारणपुरस्सरं दूरप्रसारितभुजयुगलं तं दयितदयितं बाहुलताभ्यां सुदृढं कण्ठेऽवलम्ब्य प्रमोदातिशयोद्गतबाष्पाम्बुना तस्याश्रुक्लिन्नमपि वदनमसिञ्चत्। तदनु गाढकण्ठाश्लेषपरिचुम्बनपूर्वं विद्याधरसुन्दर्या तया हे प्राणाधिकदयित कथममर्त्यसंचारां मनोरथसहस्रेणापि मानवैरप्राप्यां भूमिमेनां प्राप्तवानसीति सप्रणयकौतुकपेशलमनुयुक्तः सः साहसिकः प्रत्यवादीदयि हृदयवल्लभे बलीयसा त्वदनुरागायस्कान्तेन लोहखण्डवदाकृष्यमाणोऽहं प्राणसंकटानि महान्ति समुल्लङ्घ्य त्वदन्तिकं प्राप्तोऽस्मि किं बहुनेति। केवलं प्रणयस्यार्थे सहर्षमुपेक्षितस्वजीवितं तं प्राणेश्वरं परमार्थतो विज्ञाय बहुगुणीभूतस्नेहबहुमाना सा वरारोहा परिपक्वबिम्बाधरेण रागोद्रेकात् तमभीक्ष्णं परिचुम्बन्ती हे प्रेयन् दिव्यविद्याप्रभावेन किं विद्याधरीभावेनापि किं मे प्रयोजनमात्मा तेऽर्पितः कात्स्न्र्येन यत्र यत्र त्वं

स्त्रीसमग्रपौरलोकविस्मयविस्फारितनेत्रपेपीयमानाद्भुतदर्शनः प्राज्य-हिरण्यरत्नराशीन् मञ्जुलाकृतिविशोभितचतुर्वरारोहासहितो जंगमविन्ध्याद्रिशृङ्गप्रमाणमहाकायरात्रिचरेन्द्रभुजशिरोऽधिष्ठितः शनैः शनैर्मूर्तिमतीं निर्वृतिमिवाप्रमेयानंदधुदायिनीमात्मीयां महापुरीमुज्जयिनीं प्राविक्षत्। क्षणान्तरेऽतिविस्मयव्याकुलीभूतमनोभिः पुराध्यक्षप्रमुखैर्नागरिकैः सत्वरविज्ञप्तमहाघोरराक्षसाधिरूढप्रमदाचतुष्टयसमन्वितजामातृसमागमः कौतूहल्यप्रहर्षव्यतिकरसमविकोत्कण्ठितचेताश्चक्रवर्ती स्वयं तमभिनन्दितुं सहसाभ्युत्थाय बहिर्मार्गे निर्जगाम। सोऽपि विदूषको जामातृस्नेहादारात् सत्वरमागच्छन्तं श्वशुरं दृग्गोचरीकृत्य यमदंष्टस्कन्धात् प्रौढयौवनोद्यानपुष्पमञ्जरीसन्निभास्ताश्चतस्रः स्वभार्या विपुलद्युम्नसंभारैः सहावतार्य ससंभ्रममुपागत्य च श्वशुरमादित्यसेनं सादरं प्रणनाम। अयि विदूषक सुचिराद् दृष्टोऽसि कालमेतावन्तमतिवाह्य कुत आगतोऽसीति सनिन्दमिवोक्त्वा सार्वभौम आदित्यसेनस्तं जामातरं प्रीतिपूर्वं परिरभ्य तदनु तेन समं प्रहृष्टान्तरात्मा संश्चतसृभिर्वधूभिः कृतानुयात्रः कौतुकाकृष्टसंख्यातिगप्रजासमवायोच्चारितैर्वंधिरितकृत्स्नककुब्भिर्जयशब्दैस्तोष्ट्यमानो निजमन्दिरं प्राविशत्। तत्राकाण्डोपनतभर्तृविरहदौर्भाग्यमृदितामकालप्रालेयमथितां पद्मिनीमिव रमणस्य त्विषांपतेरुदयावलम्बिताशां तत्प्रतिनिवर्तनधृतप्रत्याशासमाश्रितजीवितां चक्रवर्तितनूद्भवां स्वीयां प्रथमजायामतप्तदृष्टिपातपीयूषेण नितरामानन्दयन् प्रीतिस्मेराननेन श्वशुरेण

कुत एता योषितस्त्वया प्राप्ताः कश्चासौ राक्षसः कालमियन्तं कुत्र तस्थिवांस्त्वं किमकार्षीरिति सकौतुकं पृष्टः सन् यथावृत्तं निखिलवृत्तान्तजातं विस्तरशस्तस्मै विस्मितचेतसे न्यवेदयत्। ततो महाविक्रमसौहार्दपरितुष्टेन चक्रवर्तिना विधाणितं प्राज्यवैभवोपेतमर्धराज्यमवाप्य विप्रराजभूतो विदूषकः कालक्रमानुसारेण चतुरर्णवमेखलमशेषं मेदिनीमण्डलं विजित्य समग्रराजकमौलिरत्नारुणच्छविलाञ्छितचरणतलः सन् पञ्चभिर्देवीभिरजातेर्ष्याकोपाभिः पतिदेवताभिर्निर्विकारेण सप्रणयबहुमाननोपचर्यमाणो यावज्जीवमनपायिनीं लक्ष्मीमुपबुभुजे। इति वत्सराजकथितां विचित्राश्चर्यरसप्रसूतिं महावीरकथामुपश्रुत्य पार्श्ववर्तिनौ वासवदत्तापद्मावतीसहितास्ते मन्त्रिप्रमुखाः सर्वेऽतिभृशचमत्कारिकथाश्रवणसंतुष्टाः पुष्कलां मुदमनुबभूवुः।

इति श्रीवाक्कन्वेविरचिते कथारत्नाकरे प्रथमस्तरङ्गः समाप्तः।